नींत्वाव्वाजेद्ध्यायैसम्मार्ज्मि ॥ २९ ॥ अदित्यैरास्नासिव्विष्णो-
र्व्वेष्पोस्यूर्ज्जेत्वादब्धेनत्वाचक्षुषावपश्यामि । अग्नेर्ज्जिह्वासिसुहूर्दे-
वेभ्योधाम्नेधाम्नेमेभवयजुषेयजुषे ॥ ३० ॥ सवितुस्त्वाप्रसवऽउ-

त्पुंनाम्म्यच्छिद्रेणपवित्त्रेणसूर्य्यस्यरश्मिभिः। सवितुर्व्वः प्रस-
वऽउत्पुंनाम्म्यच्छिद्रेणपवित्त्रेणसूर्य्यस्यरश्मिभिः। तेजोसिशुक्रम-
स्यमृतमसिधामनामासिप्प्रियन्देवानामनाधृष्टन्देवयजनमसि ॥२१॥
इति प्रथमोऽध्यायः ॥

❀ अथ द्वितीयोऽध्यायः ❀

ॐकृष्णोस्याखरेष्ठाग्नयेत्वाजुष्टम्प्रोक्षामिव्वेदिरसिबर्हिषेत्वाजु-
ष्टाम्प्रोक्षामिबर्हिरसिस्रुग्भ्यस्त्वाजुष्टम्प्रोक्षामि ॥ १ ॥ अदित्यैव्युन्द-
नमसिव्विष्णोस्तुपोस्यूर्णम्म्रदसन्त्वास्तृणामिस्वासस्थान्देवेभ्योभु-

वंपतयेस्वाहाभुवनपतयेस्वाहाभूतानाम्पतयेस्वाहा ॥ २ ॥ गन्धर्व्व-
स्त्वाविश्श्वावसुः परिदधातुविश्श्वस्यारिष्ट्यैयजमानस्यपरिधिरस्य-
ग्निरिडऽईडितः। इन्द्रस्यबाहुरसिदक्षिणोविश्श्वस्यारिष्ट्यैयजमान-
स्यपरिधिरस्यग्निरिडऽईडितः। मित्त्रावरुणौत्त्वोत्तरतःपरिधत्ता-
न्ध्रुवेणधर्म्मणाविश्श्वस्यारिष्ट्यैयजमानस्यपरिधिरस्यग्निरिडऽईडितः
॥ ३ ॥ वीतिहोत्रन्त्वाकवेद्युमन्तꣳसमिधीमहि। अग्ग्नेबृहन्तमद्ध्वरे
॥ ४ ॥ समिदसिसूर्य्यस्त्वापुरस्तात्पातुकस्याश्चिदभिशस्त्यै। सवितु-

१—इत्यत्र 'विश्वसहभुवपुषवसुषु' (शु० य० प्रा० ३।१०) विश्व इत्येतत्पदं सह इत्येतेषु प्रत्ययेषु दीर्घमापद्यते।

ब्र्बाहू स्त्थऽऊर्ण्णम्म्रदसन्त्वा स्तृणामि स्वासस्थन्देवेब्भ्यऽआत्वाव्वसं-
वोरुद्द्राऽआदित्याः सदन्तु ॥ ५ ॥ घृताच्च्यसि जुहूर्न्नाम्म्ना सेदम्प्रि-
येणधाम्म्ना प्प्रियꣳ सदऽआसीद घृताच्च्यस्युपभृन्नाम्म्ना सेदम्प्रियेणधा-
म्म्ना प्प्रियꣳ सदऽआसीद घृताच्च्यसि द्ध्रुवानाम्म्ना सेदम्प्रियेणधाम्म्ना
प्प्रियꣳ सदऽआसीद प्प्रियेणधाम्म्ना प्प्रियꣳ सदऽआसीद । द्ध्रुवाऽअ-
सदन्नृतस्य योनौ ता व्विष्णो पाहि पाहि यज्ञम्पाहि यज्ञपतिम्पाहि मां यज्ञ-
न्न्यम् ॥ ६ ॥ अग्ने व्वाजजिद्द्वाजन्त्वा सरिष्यन्तं व्वाजजितꣳ सम्मा-
र्ज्मि । नमो देवेब्भ्यः स्वधा पितृब्भ्यः सुयमे मे भूयास्तम् ॥ ७ ॥
अस्कन्नमद्य देवेब्भ्यऽआज्ज्यꣳ सम्भ्रियासमङ्घ्रिणा व्विष्णो मा त्वाव-

कक्कमिषंव्वसुमतीमग्ग्नेतेच्छायामुपंस्थेषंव्विष्ष्णोस्त्थानंमसीतऽइ-
न्द्रोव्वीर्य्यमकृणोदूद्ध्वोद्ध्वरऽआस्त्थात् ॥ ८ ॥ अग्ग्नेव्वेर्होत्रंव्वे-
र्दूत्यमवंतान्त्वान्द्यावापृथिवीऽअवत्वन्द्यावापृथिवीस्विष्टकृद्देवेब्भ्यऽ
इन्द्रऽआज्ज्येनहविषाभूत्स्वाहासञ्ज्योतिषाज्योतिः ॥ ९ ॥ मयीदमि-
न्द्रऽइन्द्रियन्दधात्वस्मान्न्रायोमघवानःसचन्ताम् । अस्माकंᳬसन्त्वा
शिषः सत्यानः सन्त्वाशिषऽउपंहूतापृथिवीमातोपमाम्पृथिवीमा-
ताह्व्वयतामग्निराग्नीद्ध्रात्स्वाहा ॥ १० ॥ उपंहूतोद्यौष्पितोपमा-
न्द्यौष्पिताह्व्वयतामग्निराग्नीद्ध्रात्स्वाहा । देवस्यंत्वासवितुः प्प्र-
सवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्ष्णोहस्ताब्भ्याम् । प्रतिगृह्णाम्म्यग्ग्नेष्ट्वा-

स्येनप्राश्नामि ॥ ११ ॥ एतन्तेदेवसवितर्यज्ञम्प्राहुर्बृहस्पतयेब्र-
ह्मणे। तेनयज्ञमवतेनयज्ञपतिन्तेनमामव ॥ १२ ॥ मनोजूतिर्ज्जुषता-
माज्ज्यम्म्यबृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टंयज्ञꣳसमिमन्दधातु ।
व्विश्वेदेवासऽइहमादयन्तामो३म्प्रतिष्ठ ॥ १३ ॥ एषातेऽअग्नेस-
मित्तयाव्वर्द्धस्वचाचप्प्यायस्व । व्वर्द्धिषीमहिचव्वयमाचप्प्यासिषी-
महि । अग्नेव्वाजजिद्वाजन्त्वाससृवाꣳसंव्वाजजितꣳसम्मार्ज्मि
॥ १४ ॥ अग्नीषोमयोरुज्जितिमनूज्जेषंव्वाजस्यमाप्प्रसवेनप्प्रोहामि।
अग्नीषोमौतमपनुदतांयोऽस्मान्द्वेष्टियञ्चव्वयन्द्विष्मोव्वाजस्यैनम्प्र-
सवेनापोहामि । इन्द्राग्न्योरुज्जितिमनूज्जेषंव्वाजस्यमाप्प्रसवेनप्प्रो-

हामि । इन्द्राग्नीतमपनुदतांय्योऽस्मान्द्वेष्टियञ्चवयन्द्विष्मोव्वाज-
स्यैनम्प्रसवेनापोहामि ॥ १५ ॥ व्वसुभ्यस्त्वारुद्रेभ्यस्त्वादित्ये-
भ्यस्त्वासञ्जानाथान्द्यावापृथिवीमित्रावरुणौत्वाव्वृष्ट्यावताम् ।
व्यन्तुव्वयोक्तꣳरिहाणामरुताम्पृषतीर्गच्छव्वशापृश्निर्भूत्वादि-
वङ्गच्छततोनोव्वृष्टिमावह । चक्षुष्पाऽअग्नेसिचक्षुर्म्मेपाहि ॥ १६ ॥
यम्परिधिम्पर्यधत्थाऽअग्नेदेवपणिभिर्गुह्यमानः । तन्तऽएतमनु-
जोषम्भराम्येषनेत्त्वदपचेतयाताऽअग्नेः प्रियम्पाथोपीतम् ॥ १७ ॥
सꣳस्रवभागास्थेषाबृहन्तः प्रस्तरेष्ठाः परिधेयाश्चदेवाः । इमांव्वा-
चमभिविश्वेगृणन्तऽआसद्यास्मिन्बर्हिषिमादयध्वꣳस्वाहाव्वाट्

॥१८॥ घृताचीस्त्थोधुय्यौं पातꣳसुम्म्नेस्त्थ ÷ सुम्म्नेमाधत्तम् । यज्ञन-
मश्श्चतऽउपंचयज्ञस्यं शिवेसन्तिंष्ठस्वस्विष्टेमेसन्तिंष्ठस्व ॥ १९ ॥ अ-
ग्ग्नेंदब्धायोशीतमपाहिमादिद्योꣳपाहिप्प्रसित्यैपाहिदुरिंष्ट्यैपाहिदुंर-
द्मन्न्याऽअंविषन्नं ÷ पितुङ्कृणुसुषदायोनौस्वाहाव्वाडग्ग्नयेंसंव्वेशपंतये-
स्वाहासरंस्वत्यैयशोभगिन्न्यैस्वाहा ॥ २० ॥ व्वेदोंसियेनत्वन्देंवव्वे-
ददेंवेब्भ्योंव्वेदोभंवस्तेनमह्यंव्वेदोभूंयाः । देवागातुविदोगातुंव्वित्वा-
गातुमिंत । मनंसस्पतऽइमन्देंवयज्ञꣳस्वाहाव्वातेंधाः ॥ २१ ॥ स-

१—'अकारे च' ४।४३ अकारे परे सति सर्वो अकार ओकारमापद्यते । व्वेदोऽसि ।
इत्यादि ।

म्बर्हिरङ्क्ताꣳहविषाघृतेनसमादित्यैर्व्वसुभिःसम्मरुद्भिः । स-
मिन्द्रोव्विश्श्वेदेवेभिरङ्क्तान्दिव्यन्नभोगच्छतुयत्स्वाहा ॥ २२ ॥ क-
स्त्वाविमुञ्चतिसत्वाव्विमुञ्चतिकस्मैत्वाव्विमुञ्चतितस्मैत्वाव्विमुञ्च-
ति । पोषायरक्षसाम्भागोसि ॥ २३ ॥ संवर्च्चसापयसासन्तनूभिरग-
न्महिमनसासꣳशिवेन । त्वष्टासुदत्रोव्विदधातुरायोनुमार्ष्टुतन्न्वो-
यद्विलिष्टम् ॥ २४ ॥ दिविव्विष्णुर्व्व्यक्रꣳस्तजागतेनच्छन्दसा-
ततोनिर्भक्तोयोस्मान्द्वेष्टियञ्चवयन्द्विष्मोन्तरिक्षेव्विष्णुर्व्व्यक्र-
ꣳस्तत्रैष्टुभेनच्छन्दसाततोनिर्भक्तोयोस्मान्द्वेष्टियञ्चवयन्द्वि-
ष्मः पृथिव्यांव्विष्णुर्व्व्यक्रꣳस्तगायत्रेणच्छन्दसाततोनिर्भक्तो-

षोस्म्मान्द्वेष्टि्यञ्चंव्वयन्द्विष्म्मोस्म्मादन्नादस्यैप्रतिष्ठायाऽअगन्मस्व-
÷सञ्ज्योतिषाभूम ॥ २५ ॥ स्वयम्भूरसिश्रेष्ठोरश्मिर्व्वर्चोदाऽअसि-
व्वर्चोमेदेहि। सूर्य्यस्यावृतमन्न्वावर्त्ते ॥ २६ ॥ अग्ग्नेगृहपतेसुगृहपति-
स्त्वयाग्ग्नेहङ्गृहपतिनाभूयासठं०सुगृहपतिस्त्वम्मयाग्ग्नेगृहपतिनाभू-
याः। अस्त्थूरिणौगार्हपत्त्यानिसन्तुशतठं०हिमाः सूर्य्यस्याव्वृतमन्न्वा-
वर्त्ते ॥२७॥ अग्ग्नेव्व्रतपतेव्व्रतञ्चारिषन्तच्छकेयन्तन्मेराध्यतामिदमहंय्यऽ
एवाम्स्मिसोस्मि ॥ २८ ॥ अग्नयेकव्व्यवाहनायस्वाहासोमायपितृ-
मतेस्वाहा। अपहताऽअसुरारक्षाठंसिव्वेदिषदः ॥ २९ ॥ येरूपा-
णिप्रतिमुञ्चमानाऽअसुराः सन्तः स्वधयाचरन्ति । परापुरोनिपुरो-

येभरन्त्यग्निष्वाँल्लोकात्प्रणुदात्यस्म्मात् ॥ ३० ॥ अत्त्रंपितरोमादय-
द्ध्वंयथाभागमावृषायद्ध्वम् । अमीमदन्तपितरोयथाभागमावृषा-
यिषत ॥ ३१ ॥ नमोवःपितरोरसायनमोवःपितरःशोषायनमोवःपि-
तरोजीवायनमोवःपितरःस्वधायैनमोवःपितरोघोरायनमोवःपितरो-
मन्न्यवेनमोवःपितरःपितरोनमोवोगृहान्नः पितरोदत्तसतोवः पि-
तरोदेष्म्मैतद्वः पितरोवासः ॥३२॥ आधत्तपितरोगर्ब्भङ्कुमारम्पु-
ष्करस्रजम् । यथेहपुरुषोसत् ॥ ३३ ॥ ऊर्ज्जंवहन्तीरमृतङ्घृतम्प-
यः कीलालंपरिस्रुतम् । स्वधास्त्थतर्प्पयतमेपितॄन् ॥ ३४ ॥ इति
द्वितीयोऽध्यायः ॥

❀ अथ तृतीयोऽध्यायः ❀

ॐसमिधाग्निन्दुवस्यतघृतैर्ब्बोधयतातिथिम् । आस्मिन्न्हव्याजुहोतन ॥ १ ॥ सुसमिद्धायशोचिषे । घृतन्तीव्रञ्जुहोतन । अग्नयेजातवेदसे ॥ २ ॥ तन्त्वासमिद्भिरङ्गिरोघृतेनव्वर्द्धयामसि । बृहच्छोचायविष्ठ्य ॥ ३ ॥ उपत्वाग्नेहविष्मतीर्घृताचीर्य्यन्तुहर्य्यत । जुषस्वसमिधोमम ॥ ४ ॥ भूर्भुवःस्वर्द्यौरिवभूम्नापृथिवीवव्वरिम्णा । तस्यास्तेपृथिविदेवयजनिपृष्ठेग्निमन्नादमन्नाद्यायादधे

१—'चलुर्नौकास्फुटोदण्डी स्वस्तिकोमुष्टिकाकृतिः । एते वै हस्तदोषाः स्युः परशुश्चैव सप्तमः' (या० शि० ४४) परशुः–पर्श्वाकारः ।

॥ ५ ॥ आयङ्गौ॒ऽपृश्नि॑रक्रमीद॒सद॑न्न्मा॒तर॑म्पु॒रः । पि॒तर॑ञ्च प्र॒यन्त्स्वः॑॥ ६ ॥ अ॒न्तश्च॑रति रोच॒नास्य प्रा॒णाद॑पान॒ती । व्य॑ख्यन्म॒हि॒षो दिव॑म् ॥ ७ ॥ त्रि॒ᳪशद्धाम॒ विरा॑जति॒ वाक्प॑त॒ङ्गाय॑ धीयते । प्रति॒ वस्तो॒रह॒ द्युभिः॑ ॥ ८ ॥ अ॒ग्निर्ज्योति॒र्ज्योति॑र॒ग्निः स्वाहा॒ सूर्यो॒ ज्योति॒र्ज्योतिः॒ सूर्यः॒ स्वाहा॑ । अ॒ग्निर्वर्चो॒ ज्योति॒र्वर्चः॒ स्वाहा॒ सूर्यो॒ वर्चो॒ ज्योति॒र्वर्चः॒ स्वाहा॑ । ज्योतिः॒ सूर्यः॒ सूर्यो॒ ज्योतिः॒ स्वाहा॑ ॥ ९ ॥ स॒जूर्दे॒वेन॑ सवि॒त्रा स॒जू रात्र्येन्द्र॑वत्या । जु॒षा॒णो॑ऽअ॒ग्निर्वे॑तु॒ स्वाहा॑ । स॒जूर्दे॒वेन॑ सवि॒त्रा स॒जूरु॒षसेन्द्र॑वत्या । जु॒षा॒णः सूर्यो॑ वेतु॒ स्वाहा॑ ॥ १० ॥ उ॒प॒प्र॒यन्तो॑ऽअध्व॒रम्मन्त्रं॑ वोचेमा॒ग्नये॑ । आ॒रेऽअ-

स्म्मेचं॑श्शृण्वते ॥ ११ ॥ अग्निर्म्मूर्द्धा॑दि॒वः॒क॑कु॒त्पतिं॑÷ पृथि॒व्व्याऽअ॒-
यम् । अ॒पा॒ᳬरेता॑ᳬसि जिन्न्वति ॥ १२ ॥ उभा॒वा॑मिन्द्राग्नीऽआहु॒व-
द्धयाऽउ॒भारा॒धसः॒स॒ह मा॑द॒यद्ध्यै॑ । उ॒भा दा॒तारा॑वि॒षाᳬर॑यी॒णामु॒-
भाव्वाजस्य॑ सा॒तये॑हुवे वाम् ॥ १३ ॥ अ॒यन्ते॒ योनि॑र्ऋ॒त्वियो॒ यतो॒ जा॒तोऽ-
अरो॑चथाः । तञ्जा॒नन्न॑ग्नऽआ॒रो॒हाथा॑ नो॒ व्वर्द्धया र॒यिम् ॥ १४ ॥ अ॒य-
मि॒ह प्प्र॑थ॒मो धा॑यि धा॒तृभि॒र्होता॒ यजि॑ष्ठोऽअध्व॒रेष्व्वीड्यः॑÷ । यमप्न॑-
वानो॒ भृग॑वो विरुरु॒चुर्व्वने॑षु चि॒त्रं व्वि॒भ्वं॑ व्वि॒शेविशे ॥ १५ ॥ अ॒स्य प्प्र-
त्नामनु॒ द्द्युतं॑ᳬ शु॒क्रन्दु॑दु॒ह्रे॒ऽअह्र॑यः । पयः॑÷ सहस्र॒सामृषि॑म् ॥१६॥
त॒नू॒पाऽअ॑ग्ने॒ऽसि त॒न्न्वम्मे पाह्यायु॒र्द्दाऽअ॑ग्ने॒स्यायु॑र्म्मे देहि व्वर्चो॒दाऽअ॑-

ग्ग्नेसिव्वर्च्चोमेदेहि । अग्ग्नेयन्न्मेतन्न्वाऽऊनन्तन्न्मऽआपृण ॥ १६ ॥
इन्धानास्त्वाशतᳪहिमाद्युमन्तᳪसमिधीमहि । व्वयंस्वन्तोव्वयस्कृ-
तᳪसहस्वन्तᳪसहस्कृतम् । अग्ग्नेसपत्नदम्भनमदब्धासोऽअदाभ्यम् ।
चित्रावसोस्वस्तितेपारमशीय ॥ १८ ॥ सन्त्वमग्ग्नेसूर्य्यस्यव्वर्च्चसा-
गथाᳪसमृषीणाᳪस्तुतेन । सम्प्रियेणधाम्न्नासमहमायुषासंव्वर्च्चसा-
सम्प्रजयासᳪरायस्पोषेणग्मिषीय ॥१९॥ अन्धस्थान्धोवोभक्षीयमह-
स्थमहोवोभक्षीयोर्ज्जस्थोर्ज्जंवोभक्षीयरायस्पोषस्थरायस्पोषंव्वोभ-
क्षीय ॥२०॥ रेवतीरमध्वमस्मिन्न्योनावस्मिन्न्गोष्ठेऽस्मिँल्लोकेऽस्मि-
न्न्क्षये । इहैवस्तमापगात ॥२१॥ सᳪहितासिव्विश्वरूप्यूर्ज्जामावि-

शगौपत्त्येन॑ । उप॑त्त्वाग्ग्नेदि॒वेदि॑वे॒दोषा॑वस्तर्द्धि॒याव्वयम् । नमो॒भर॑न्त॒ऽ-
एम॑सि ॥२२॥ राजन्तमद्ध्वराणाङ्गोपामृतस्यदीदिविम् । व्वर्द्धमान॑ᳫँ
स्वेदमे॑ ॥ २३ ॥ सन॑÷ पि॒तेव॑सू॒नवेग्ग्नेसूपायनो॒भव॑ । सच॑स्वानᳬस्व-
स्तये॑ ॥ २४ ॥ अग्ग्नेत्त्वन्नो॒अन्त॑मऽउ॒तत्त्राता॒शि॒वोभ॑वाव्वरू॒त्थ्य÷ ।
व्वसु॒रग्ग्निर्व्वसु॑श्श्रवाऽअच्छानक्षि॒द्द्युमत्त॑मᳬरयिन्दाᳬ ॥ २५ ॥ त-
न्त्वाशोचिष्ठदीदिवᳬसुम्म्नाय॑नू॒नमीमहे॒सखिब्भ्यᳬ । सनो॑बोधिश्श्रु॒-
धीहव॑मुरु॒ष्ष्याणोऽअघायतᳬसमस्म्मात् ॥ २६ ॥ इडएह्यदि॑तऽए-
हि॒कामाऽए॒त॑ । मयि॑वᳬकामधर॑णम्भूयात् ॥ २७ ॥ सोमा-
नᳫँस्वर॑णङ्कृणुहिब्ब्रह्मणस्प्पते । कक्षीव॑न्तंय्यऽऔ॑शिजᳬ ॥ २८ ॥

योरेवान्न्यो ऽअमीवहा व्वसुवित्पुष्टिवर्द्धनः। सनः सिषक्तु यस्तुरः
॥ २९ ॥ मानःशंसोऽअररुषो धूर्तिःप्रणङ्मर्त्यस्य। रक्षाणो ब्रह्म-
णस्पते ॥ ३० ॥ महि त्रीणामवोस्तु द्युक्षम्मित्रस्यार्य्यम्णः।
दुराधर्षंव्वरुणस्य ॥ ३१ ॥ नहितेषाममा चन नाध्वसु व्वारणेषु। ईशे-
रिपुरघशंसः ॥ ३२ ॥ तेहिपुत्रासोऽअदितेः प्रजीवसे मर्त्याय।
ज्योतिर्यच्छन्त्यजस्रम् ॥ ३३ ॥ कदाचन स्तरीरसि नेन्द्र सश्चसि दा-
शुषे। उपोपेन्नुमघवन्भूयऽइन्नुतेदानन्देवस्य पृच्यते ॥ ३४ ॥
तत्सवितुर्व्वरेण्यम्भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्
॥ ३५ ॥ [शतम् १००] परि ते दूडभो रथोस्माँ२ऽअश्नोतु व्विश्वतः-

तं÷। येनरक्षांसिदाशुषे÷ ॥ ३६ ॥ भूर्भुवःस्व÷ सुप्रजाःप्रजाभि÷
स्या सुवीरोव्वीरैःसुपोषःपोषैः । नर्य्यप्रजाम्मेपाहिशंस्यंपशू-
न्मेपाह्यथर्य्यपितुम्मेपाहि ॥ ३७ ॥ आगन्मविश्ववेदसमस्म-
भ्यंव्वसुवित्तमम् । अग्नेसम्राडभिद्युम्नमभिसहऽआयच्छस्व
॥ ३८ ॥ अयमग्निर्गृहपतिर्गार्हपत्यःप्रजायाव्वसुवित्तमः। अग्ने-
गृहपतेभिद्युम्नमभिसहऽआयच्छस्व ॥ ३९ ॥ अयमग्निःपुरीष्योर-
यिमान्पुष्टिव्वर्द्धनः । अग्नेपुरीष्याभिद्युम्नमभिसहऽआयच्छस्व
॥ ४० ॥ गृहामाबिभीतमावेपद्ध्वमूर्ज्जम्बिभ्रतऽएमसि । ऊर्ज्जम्बि-
भ्रद्वःसुमनाःसुमेधागृहानैमिमनसामोदमानः ॥ ४१ ॥ येषाम-

द्ध्येतिप्प्रवसन्न्येषुसौमनसोबहुः । गृहानुपंह्वयामहेतेनोजानन्तु-
जानतः ॥ ४२ ॥ उपंहूताऽइहगावऽउपंहूताऽअजावयं÷ । अथोऽ-
अन्नंस्यकीलालऽउपंहूतोगृहेषुनंः । क्षेमायवंःशान्त्यैप्रपंद्येशिवꣳ
शग्मꣳशंय्योःशंय्योः ॥ ४३ ॥ प्रघासिनोहवामहेमरुतंश्चरिशा-
दंसः । करम्भेणंसजोषंसः ॥ ४४ ॥ यद्ग्रामेयदरंण्ण्येयत्सभायांय्य-
दिन्द्रियें । यदेनंश्चकृमाव्वयमिदन्तदंवयजामहेस्वाहा ॥ ४५ ॥
मोषूणंऽइन्द्रात्रंपृत्सुदेवैरस्तिहिष्मातेशुष्मिन्नवयाः । महश्चि-
द्यस्यंमीदुषोयव्व्याहविष्मंतोमरुतोव्वन्दंतेगीः ॥ ४६ ॥ अक्रन्क-
र्म्मंकर्म्मकृतं÷सहव्वाचामंयोभुवा । देवेब्भ्यःकर्म्मंकृत्त्वास्तम्प्रेतंस-

चाभुवं ॥ ४७ ॥ अवभृथनिचुम्पुणनिचेरुरसिनिचुम्पुणः। अवदेवै-
र्द्देवकृतमेनोयासिषमवमर्त्त्यैर्म्मर्त्त्यकृतम्पुरुराव्णोदेवरिषस्पाहि ॥४८॥
पूर्णादर्व्विपरापतसुपूर्ण्णापुनरापत । व्वस्नेवव्विक्क्रीणावहाऽइष-
मूर्ज्जꣳशतक्क्रतो ॥ ४९ ॥ देहिमेददामितेनिमेधेहिनितेदधे। निहा-
रञ्चहरासिमेनिहारन्निहराणितेस्वाहा ॥ ५० ॥ अक्षन्नमीमदन्तह-
्यवप्प्रियाऽअधूषत । अस्तोषतस्वभानवोव्विप्प्रानविष्ठयामतीयो-
जान्न्विन्द्रतेहरी ॥ ५१ ॥ सुसन्दृशन्त्वाव्वयम्मघवन्न्वन्दिषीमहि।
प्रनूनम्पूर्ण्णबन्धुरस्तुतोयासिव्वशाँ२ऽअनुयोजान्न्विन्द्रतेहरी ॥ ५२ ॥
मनोन्न्वाह्वामहेनाराशꣳसेनस्तोमेन। पितॄणाञ्चमन्मभिः ॥५३॥

आ नऽएतु मनः पुनः क्क्रत्वे दक्षाय जीवसे । ज्योक्च सूर्यन्दृशे ॥ ५४ ॥
पुनर्न्नः पितरो मनो ददातु दैव्यो जनः । जीवव्व्रातठं सचेमहि ॥५५॥
व्वयठं सोम व्व्रते तव मनस्तनूषु बिब्भ्रतः । प्रजावन्तः सचेमहि ॥५६॥
एष ते रुद्र भागः सह स्वस्राम्बिकया तञ्जुषस्व स्वाहैष ते रुद्र भागऽआ-
खुस्ते पशुः ॥ ५७ ॥ अव रुद्रमदीमह्यव देवन्त्र्यम्बकम् । यथा नो-

---

१—'तथयोः सम्' शु० प्रा० ३।८ तकारथकारयोः परयोः विसर्जनीयः सकारमापद्यते । तकारे-'आखुः ते पशुः' इत्यत्र विसर्गस्य सकारो भवति । एवम्—'नमः ते रुद्र' १६।१। इत्यादिषु । संहितायां विसर्जनीयसन्धिस्तु न विद्यते अतो रूपोदाहरणं दीयते कः थकारः कस्थकारः ।

व्वस्यंसस्करद्यथानःश्रेयंसस्करद्यथानोव्व्यवसाययात् ॥ ५८ ॥
भेषजमसिभेषजङ्गवेश्श्वायपुरुषायभेषजम् । सुखम्मेषायमेष्यै ॥५९॥
त्र्यम्बकंयजामहेसुगन्धिम्पुष्टिवर्द्धनम् । उर्व्वारुकमिवबन्धनान्मृ-
त्योर्म्मुक्षीयमामृतात् । त्र्यम्बकंयजामहेसुगन्धिम्पतिवेदनम् । उ-
र्व्वारुकमिवबन्धनादितोमुक्षीयमामुतः ॥ ६० ॥ एतत्तेरुद्रावं-
सन्तेनपरोमूजवतोतीहि । अवततधन्वापिनाकावसःकृत्तिवासाऽ-
अहिंसन्नःशिवोतीहि ॥ ६१ ॥ त्र्यायुषञ्जमदग्नेःकश्यपस्यत्र्यायु-
षम् । यद्देवेषुत्र्यायुषन्तन्नोऽअस्तुत्र्यायुषम् ॥ ६२ ॥ शिवोनामासि-
स्वधितिस्तेपितानमस्तेऽअस्तुमामाहिंसीः । निर्वर्त्तयाम्म्यायुषेन्ना-

द्र्यायप्रजननायरायस्पोषायसुप्रजास्त्वायंसुवीर्य्याय ॥ ६३ ॥

इति तृतीयोऽध्यायः ॥

❀ अथ चतुर्थोऽध्यायः ❀

ॐ एदमगन्मदेवयजनम्पृथिव्यायत्रदेवासोऽअजुषन्तविश्वे। ऋक्सामाभ्याᳬ सन्तरन्तोयजुर्भीरायस्पोषेणसमिषामदेम। इमा-ऽआपः शमुमेसन्तुदेवीरोषधेत्रायस्वस्वधितेमैनᳬ हिᳬ सीः ॥ १ ॥

आपोऽअस्मान्मातरः शुन्धयन्तुघृतेननोघृतप्व: पुनन्तु। वि-

१—'न कुर्वीत पदं दीर्घं न चाऽत्यन्तविलम्बितम्। पदस्य ग्रहमोक्षौ च यथा-शीघ्रगतिर्हयः।' (या० शि० ४६)

श्श्वꣳहिरिप्रम्प्रवहन्तिदेवीरुदिदाभ्यꣳशुचिरापूतऽएमि । दीक्षातप-
सोस्तनूरसितान्त्वाशिवाꣳशग्ग्मामपरिदधेभद्द्रंव्वर्णम्पुष्यन् ॥ २ ॥
महीनाम्पयोसिव्वर्चोदाऽअसिव्वर्चोमेदेहि । व्वृत्रस्यासिकनीनक-
श्चक्षुर्दाऽअसिचक्षुर्म्मेदेहि ॥ ३ ॥ चित्पतिर्म्मापुनातुव्वाक्पतिर्म्मा-
पुनातुदेवोमासविता पुनात्वच्छिद्द्रेणपवित्त्रेणसूर्य्यस्यरश्मिभिः ।
तस्यतेपवित्त्रपतेपवित्त्रपूतस्ययत्कामः पुनेतच्छकेयम् ॥ ४ ॥ आवो-
देवासऽईमहेव्वामम्प्रयत्यध्वरे । आवोदेवासऽआशिषोयज्ञियासो-
हवामहे ॥ ५ ॥ स्वाहायज्ञम्मनसः स्वाहोरोरन्तरिक्षात्स्वाहाद्यावा-
पृथिवीभ्याꣳस्वाहाव्वातादारभेस्वाहा ॥ ६ ॥ आकूत्यैप्रयुजेग्नये-

स्वाहामेधायैमनसेऽग्नयेस्वाहादीक्षायैतपसेऽग्नयेस्वाहासरस्वत्यैपूष्णे-
ऽग्नयेस्वाहा । आपोदेवीर्बृहतीर्विश्वशम्भुवोद्यावापृथिवीऽउरोऽ-
अन्तरिक्ष । बृहस्पतयेहविषाविधेमस्वाहा ॥ ७ ॥ विश्वोदेवस्य
नेतुर्मर्त्तोव्वुरीतसख्यम् । विश्वोरायऽइषुद्ध्यतिद्युम्नंव्वृणी-
तपुष्यसेस्वाहा ॥ ८ ॥ ऋक्कसामयोःशिल्पेस्थस्तेवामारभेतेमापा-
तमास्ययज्ञस्योदृचः । शर्म्मासिशर्म्ममेयच्छनमस्तेऽअस्तुमामा-
हिंसीः ॥ ९ ॥ ऊर्ग्गस्याङ्गिरस्यूर्णम्म्रदाऽऊर्ज्जमयिधेहि । सोमस्य
नीविरसिविष्णोःशर्म्मासिशर्म्मयजमानस्येन्द्रस्ययोनिरसिसुस-

स्याꣳकृ॑षीस्कं॒धि । उच्छ्र॑यस्व॒वनस्पत॒ऽऊर्द्ध्वोमा॑पाह्य॒ꣳहस॒ऽआ-
स्यय॒ज्ञस्योद्द॒चः॑ ॥ १० ॥ व्व्रतङ्कृ॑णुता॒ग्निर्ब्व्रह्मा॒ग्निर्य्य॒ज्ञोव्वन॒स्प-
ति॑र्य्य॒ज्ञियः॑ । दैवीन्धियम्मनामहेसुमृडीकाम॒भिष्ट॑येव्वर्चोधांय॒ज्ञ-
वा॑हस॒ꣳसुती॒र्त्थानो॒ऽअस॒द्द्वशे । येदे॒वामनो॒जातामनो॒युजो॒दक्षक्क्रत-
वस्तेनो॑वन्तु॒तेनः॑पान्तु॒तेभ्य॒ꣳस्वाहा॑ ॥ ११ ॥ श्वा॒त्रा॒ऽपीताभ॑वत

१—इत्यत्र 'कृषीश्च कृधौ सकारम्' (शु० य० प्रा० ३।३४) इति सूत्रेण कृधौ प्रत्यये (परे सति) कृषीरित्ययं विसर्जनीयः सकारमापद्यते । ननु—कविष्करत्कृधिषु (३।३२) इत्यनेनैव गतार्थत्वात् व्यर्थमिदं सूत्रमिति चेत्सत्यम् । भाव्युपधस्य षत्वं नियतं तन्माभूदित्येतदर्थमित्यदोषः ।

यूयमापोऽअस्माकमन्तरुदरेसुशेवाः । ताऽअस्मभ्यमयक्ष्माऽअन-
मीवाऽअनागसः स्वदन्तुदेवीरमृताऽऋतावृधः ॥ १२ ॥ इयन्तेय-
ज्ञियातनूरपोमुञ्चामिनप्रजाम् । अꣳहोमुचः स्वाहाकृताः पृथिवीमा-
विशतपृथिव्यासम्भव ॥ १३ ॥ अग्नेत्वꣳसुजागृहिवयꣳसुमन्दि-
षीमहि । रक्षाणोऽअप्रयुच्छन्प्रबुधेनः पुनस्कृधि ॥ १४ ॥ पुनर्म्मनः
पुनरायुर्म्मऽआगन्न्पुनः प्राणः पुनरात्मामऽआगन्न्पुनश्चक्षुः पुनः
श्श्रोत्रम्मऽआगन् । वैश्वानरोऽअदब्धस्तनूपाऽअग्निर्न्नः पातुदु-
रितादवद्यात् ॥ १५ ॥ त्वमग्नेव्रतपाऽअसिदेवऽआमर्त्येष्वा ।
त्वंयज्ञेष्वीड्यः । रास्वेयत्सोमाभूयोभरदेवोनः सविताव्वसोर्द्दाता

व्वस्वदात् ॥ १६ ॥ एषातेशुक्रतनूरेतद्वर्चस्तयासम्भवभ्राजङ्गच्छ ।
जूरसिधृतामनसाजुष्टाविष्णवे ॥ १७ ॥ तस्यास्तेसत्त्यसवसःप्प्रस-
वेतन्न्वोयन्त्रमशीयस्वाहा । शुक्रमसिचन्द्रमस्यमृतमसिव्वैश्श्वदेवम-
सि ॥ १८ ॥ चिदसिमनासिधीरसिदक्षिणासिक्षत्त्रियासियज्ञियास्य-
दितिरस्युभयतःशीर्ष्णी । सानःसुप्राचीसुप्प्रतीच्च्येधिमित्रस्त्वाप-
दिबध्नीतात्पूषाद्ध्वनस्प्पात्त्विन्द्रायाद्ध्यक्षाय ॥ १९ ॥ अनुत्त्वामा-
तामन्न्यतामनुपितानुभ्भ्रातासगर्ब्भ्योनुसखासयूत्थ्यः । सादेविदेव-
मच्छेहीन्द्रायसोमꣳरुद्द्रस्त्वावर्त्तयतुस्वस्तिसोमसखापुनरेहि ॥२०॥
व्वस्व्यस्यदितिरस्यादित्त्यासिरुद्द्रासिचन्द्रासि । बृहस्प्पतिष्ट्वासु-

स्म्नेरंम्मणातुरुद्रुद्रोव्वसुंभिराचंके ॥ २१ ॥ अदिंत्यास्त्वामूर्द्धं-
न्नाजिघर्म्मिदेवयजंनेपृथिव्व्याऽइडायास्प्पदमंसिघृतवत्स्वाहा । अ-
स्म्मेरंमस्वास्म्मेतेबन्धुस्त्वेरायोमेरायोमाव्वयꣳरायस्प्पोषेणव्वियौं-
ष्मतोतोरायंः ॥ २२ ॥ समंक्ख्येदेव्व्याधियासन्दक्षिणयोरुचंक्षसा ।
मामऽआयुंःप्रमोषीम्मोऽअहन्तवंव्वीरंव्विदेयतवंदेविसन्दृशिं ॥ २३ ॥
एषतेगायत्त्रोभागऽइतिंमेसोमायब्रूतादेषतेत्त्रैष्टुंभोभागऽइतिंमेसोमा-
यब्रूतादेषतेजागंतोभागऽइतिंमेसोमायब्रूताच्छन्दोनामानाꣳसा-
म्म्राज्ज्यङ्गच्छेतिंमेसोमायब्रूतादास्म्माकोसिशुक्रस्तेग्ग्रहोव्विचितं-
स्त्वाव्विचिन्न्वन्तु ॥ २४ ॥ अभित्यन्देवꣳसंवितारंमोण्योः कविक्क्रं-

तुमर्चामिसत्त्यसंवꣳरत्नधाममभिप्प्रियम्मतिङ्कविम् । ऊर्द्ध्वायस्या-
मतिर्भाऽअदिद्द्युतत्सवीमनिहिरण्ण्यपाणिरमिमीतसुक्क्रतुः कृपा-
स्वः । प्रजाब्भ्यस्त्वाप्प्रजास्त्वानुप्प्राणन्तुप्प्रजास्त्वमनुप्प्राणिहि
॥ २५ ॥ शुक्क्रन्त्वाशुक्क्रेणक्क्रीणामिचन्द्रञ्चन्द्रेणामृतममृतेन । सग्ग्मे-
तेगोरस्म्मेतेचन्द्राणितपसस्तनूरसिप्प्रजापतेर्व्वर्ण्णः परमेणपशुना-
क्क्रीयसेसहस्रपोषम्पुषेयम् ॥ २६ ॥ मित्त्रोनऽएहिसुमित्त्रधऽइन्द्रस्यो-
रुमाविशदक्षिणमुशन्नुशन्तꣳस्योनःस्योनम् । स्वानभ्भ्राजाङ्घारिब-
म्भारिहस्तसुहस्तकृशानवेतेवःसोमक्क्रयणास्तान्त्रक्षद्ध्वम्मावोदभन्
॥ २७ ॥ परिमाग्ग्नेदुश्चरिताद्बाधस्वामासुचरितेभज । उदायुषा

स्वायुषोदस्त्थाममृताँऽअनु ॥ २८ ॥ प्रतिपन्थामपद्महिस्वस्तिगामने-
हसम् । येनव्विश्वाःपरिद्विषोव्वृणक्तिव्विन्दतेव्वसु ॥ २९ ॥
अदित्यास्त्वगस्यदित्यैसदऽआसीद । अस्तभ्नाद्द्यांव्वृषभोऽअन्तरि-
क्षममिमीतव्वरिमाणम्पृथिव्व्याः । आसीदद्विश्वाभुवनानिसम्म्रा-
ड्विश्वेत्तानिव्वरुणस्यव्व्रतानि ॥३०॥ व्वनेषुव्व्यन्तरिक्षन्ततानव्वा-
जमर्व्वत्सुपयऽउस्रियासु । हृत्सुक्क्रतुंव्वरुणाव्विक्ष्वग्निन्दिविसू-
र्य्यमदधात्सोममद्रौ ॥३१॥ सूर्य्यस्यचक्षुरारोहाग्नेरक्ष्णःकनीनकम् ।
यत्रैतशेभिरीयसेभ्राजमानोव्विपश्चिता ॥ ३२ ॥ उस्रावेतन्धूर्षा-

हौषुज्ज्येथामनश्श्रूऽअवींरंहणौब्रह्मचोदनौ । स्वस्तिबजमानस्यगृ-
हान्गच्छतम् ॥ ३३ ॥ भद्द्रोमेसिप्प्रच्च्यवस्वभुवस्प्पतेव्विश्श्वान्न्य-
भिधामानि । मात्त्वापरिपरिणोव्विदन्न्मात्त्वापरिपन्थिनोव्विदन्न्मा-
त्वाव्वृकाऽअघायवोव्विदन् । श्येनोभुत्वापरापतबजमानस्यगृहान्गं-
च्छतन्नौसँस्कृतम् ॥ ३४ ॥ नमोमित्त्रस्यव्वरुणस्यचक्षसेमहोदेवायत-
हत ॠसंपर्यंत । दूरेदृशेदेवजातायकेतवेदिवस्प्पुत्त्रायसूर्य्यायश ॠसत

१—अत्र तत्पुरुषसमासः ।

२—इत्यत्र 'दिवोऽककुत्पृथिव्योः (३।२४) इति सूत्रेण ककुत्पृथिवीशब्दौ वर्जयित्वा दिव इत्येतस्य सम्बन्धी विसर्जनीयः सकारमापद्यते ।

॥ ३५ ॥ व्वरुणस्योत्तम्भनमसिव्वरुणस्यस्कम्भसर्ज्जनीस्त्थोव्वरुण-
स्यऽऋतसदन्न्यसिव्वरुणस्यऽऋतसदनमसिव्वरुणस्यऽऋतसदनमा-
सीद ॥ ३६ ॥ यातेधामानिहविषायजन्तिताते व्विश्श्वापरिभूरस्तुय-
ज्ञम् । गयस्फानः प्रतरणः सुवीरोवीरहाप्प्रचरासोमदुर्य्यान् ॥३७॥
इति चतुर्थोऽध्यायः ।

❀ अथ पञ्चमोऽध्यायः ❀

ॐ अग्ग्नेस्तनूरसिव्विष्णवेत्त्वासोमस्यतनूरसिव्विष्णवेत्त्वातिथे-

---

१—'यथा वाणी तथा पाणी रिक्तं तु परिवर्जयेत् । यत्र यत्र स्थिता वाणी पाणि-
स्तत्रैव तिष्ठति (या० शि० ४७) ।

रातिरथ्यमसिविष्णवेत्त्वाश्येनायत्त्वासोमभृतेविष्णवेत्त्वाग्ग्नयेत्त्वा-
रायस्प्पोषदेविष्णवेत्त्वा ॥ १ ॥ अग्ग्नेर्ज्जनित्रमसिव्वृषणौस्त्थऽउ-
र्व्वश्यस्यायुरसिपुरूरवाऽअसि । गायत्रेणत्त्वाच्छन्दसामन्थामित्रै-
ष्टुभेनत्त्वाच्छन्दसामन्थामिजागतेनत्त्वाच्छन्दसामन्थामि ॥ २ ॥
भवतन्नःसमनसौसचेतसावरेपसौ । मायज्ञꣳहिꣳसिष्टम्मायज्ञपतिं
जातवेदसौशिवौभवतमद्यनः ॥ ३ ॥ अग्ग्नावग्ग्निश्चरतिप्प्रविष्टऽ-
ऋषीणाम्पुत्रोऽअभिशस्तिपावा । सनःस्योनःसुयजायजेहदेवेभ्यो-
हव्यꣳसदमप्प्रयुच्छन्त्स्वाहा ॥ ४ ॥ आपतयेत्त्वापरिपतयेगृह्णामितनू-
नप्त्रेशाक्कररायशक्क्कनऽओजिष्ठाय । अनाधृष्टमस्यनाधृष्यन्देवाना-

मोजोनंभिशस्त्यभिशस्तिपाऽअंनभिशस्तेन्न्यमञ्जंसासत्त्यमुपंगेषꣳ
स्वितेमाधाः ॥ ५ ॥ अग्ग्नेंव्व्रतपास्त्वेव्व्रंतपायातवंतनूरियꣳसामयि-
योममंतनूरेषासात्त्वयि । सहनौंव्व्रतपतेव्व्रतान्न्यनुंमेदीक्षान्दीक्षापं-
तिम्मंन्न्यंतामनुतपस्तपंस्प्पतिः ॥ ६ ॥ अꣳशुरंꣳशुष्टेदेवसोमाप्प्या-
यतामिन्द्रायैकधनविदें । आतुब्भ्यमिन्द्रःप्प्यायंतामात्त्वमिन्द्राय-
प्प्यायस्व । आप्प्याययास्स्मान्त्सखीन्त्सन्न्यामेधयास्वस्तितें देवसो-
मसुत्त्यामंशीय । एष्टारायःप्प्रेषेभगायऽऋृतमृंतवादिब्भ्योनमोद्द्या-
वापृथिवीब्भ्याम् ॥ ७ ॥ यातेंऽअग्ग्नेयःशयातनूर्व्वर्षिष्ठागह्वरेष्ठा ।
उग्ग्रंव्वचोऽअपावधीत्त्वेषंव्वचोअपावधीत्स्वाहा । यातेंऽअग्नेरजःश-

या तनूर्व्वर्षिष्ठा गह्वरेष्ठा । उग्ग्रंव्वचोऽअपावधीत्त्वेषंव्वचोऽअपाव-
धीत्स्वाहा । या तेऽअग्ग्ने हरिशया तनूर्व्वर्षिष्ठा गह्वरेष्ठा । उग्ग्रंव्व-
चोऽअपावधीत्त्वेषंव्वचोऽअपावधीत्स्वाहा ॥ ८ ॥ तप्तायनी मेऽसि-
व्वित्तायनी मेस्यवतान्न्मा नाथितादवतान्न्मा व्यथितात् । व्विदेदग्निर्-
न्नभो नामाग्ग्नेऽअङ्गिरऽआयुना नाम्नेहि योस्याम्पृथिव्यामसि यत्तेना-
धृष्टन्नाम यज्ञियन्तेन त्वादधे व्विदेदग्ग्निर्न्नभो नामाग्ग्नेऽअङ्गिरऽआयुना

१—इत्यत्र 'हरिशयेत्येके' (३।१२९) शयप्रत्यये परे सति हरीत्यस्य एके आचार्या दीर्घमिच्छन्ति । अत्र पाठव्यवस्था कृता–प्रथमशाखिनां काण्वानां दीर्घपाठः । अन्येषां ह्रस्वपाठ इत्यर्थः ।

नाम्नेहिषोद्द्वितीयस्यामृथिव्यामसिषत्तेनाधृष्टन्नामंयज्ञियन्तेनत्त्वा
दधेव्विदेदग्निर्न्नभोनामाग्नेऽअङ्गिरऽआयुनानाम्नेहिषस्तृतीयस्या-
मृथिव्यामसिषत्तेनाधृष्टन्नामंयज्ञियन्तेनत्त्वादधे। अनुत्त्वादेववीतये
॥९॥ सिꣳह्यसिसपत्नसाहीदेवेभ्यः कल्पस्वसिꣳह्यसिसपत्न-
साहीदेवेभ्यः शुन्धस्वसिꣳह्यसिसपत्नसाहीदेवेभ्यः शुम्भस्व
॥ १० ॥ इन्द्रघोषस्त्वाव्वसुभिःपुरस्तात्पातुप्रचेतास्त्वारुद्रैःपश्चात्पा-
तुमनोजवास्त्वापितृभिर्दक्षिणतःपातुव्विश्वकर्म्मात्त्वादित्यैरुत्तरतः
पात्विदमहन्तप्तंव्वार्बहिर्द्धायज्ञान्निःसृजामि ॥ ११ ॥ सिꣳह्यसि-

१—यथा कामातुरा नारी शब्दं कुर्यादिने दिने। तच्छब्दं कुरुते प्राज्ञः 'सिꣳ'

स्वाहासि॑ घृ॒षस्या॑दि॒त्यव॑निꣳ स्वाहासि॑ घृ॒षसि॒ ब्रह्म॒वनि॑ क्षत्र॒व॑निꣳ स्वाहासि॑ घृ॒षसि॑ सुप्रजा॒वनी॑ रायस्पोष॒वनि॑ꣳ स्वाहासि॑ घृ॒षस्या॒वह॑ दे॒वान्यज॑मानाय॒ स्वाहा॑ भू॒तेभ्य॑स्त्वा ॥१२॥ ध्रु॒वोसि॑ पृथि॒वीं दृ॑ꣳह ध्रु॒वक्षिद॑स्य॒न्तरि॑क्षं दृꣳहाच्युत॒क्षिद॑सि॒ दिवं॑ दृꣳहा॒ग्नेः पुरी॑षमसि ॥१३॥ युञ्ज॒ते मन॑ऽउ॒त यु॑ञ्जते॒ धियो॒ विप्रा॒ विप्र॑स्य बृह॒तो वि॑प॒श्चित॑ः। वि होत्रा॑ दधे वयुना॒विदेक॒ऽइन्म॒ही दे॒वस्य॑ सवि॒तुः परि॑ष्टुति॒ꣳ स्वाहा॑ ॥ १४ ॥ इ॒दं विष्णु॒र्विच॑क्रमे त्रे॒धा निद॑धे प॒दम्। समू॑ढमस्य पाꣳसु॒रे॥

ह्यसि' इति दर्शनम्। कामातुरा रतिभावं प्राप्ता नारी दिने दिने रात्रौ पतिप्रसंङ्गे 'सिऽसिऽ' इति ध्वनिं करोति। तथा प्राज्ञः तदनुकारिध्वनिं कुर्वीत।

स्वाहा ॥ १५ ॥ इरावतीधेनुमतीहिभूतꣳसूयवसिनीमनवेदशस्या ।
व्व्यस्कब्भ्नारोदसीव्विष्ष्णवेतेदाधर्त्थम्पृथिवीमभितोमयूखैः स्वाहा
॥ १६ ॥ देवश्श्रुतौदेवेष्ष्वाघोषतम्प्राचीप्प्रेतमद्ध्वरङ्कल्प्पयन्तीऽऊर्द्ध्वं-
य्यज्ञन्नयतम्माजिह्वरतम् । स्वङ्गोष्ठमावदतन्देवीदुर्य्येऽआयुर्म्मा-
निर्व्वादिष्ष्टम्प्रजाम्मानिर्व्वादिष्ष्टमत्ररमेथांव्वर्ष्ष्मन्पृथिव्याः ॥ १७ ॥
व्विष्ष्णोर्न्नुकंव्वीर्य्याणिप्प्रवोचंयः पार्थिवानिव्विममेरजाꣳसि ।
योऽअस्कभायदुत्तरꣳसधस्त्थंव्विचक्क्रमाणस्त्रेधोरुगायोव्विष्ष्णवे-
त्त्वा ॥ १८ ॥ दिवोवाव्विष्ष्णऽउतवापृथिव्यामहोवाव्विष्ष्णऽउरोर-
न्तरिक्षात् । उभाहिहस्तावसुनापृणस्वाप्प्रयच्छदक्षिणादोतसव्व्या-

दिव्विष्ण॑वेत्त्वा ॥ १९ ॥ प्रतद्विष्णुस्तवतेव्वीर्य्येणमृगोनभीमः कुच-
रोगिरिष्ठाः । षस्योरुषुत्त्रिषुव्विक्रमणेष्वधिक्षियन्तिभुवनानिव्वि-
श्श्वा ॥ २० ॥ व्विष्णोर्रराटमसिव्विष्णोः श्नप्त्रेस्त्थोव्विष्णोः स्यूर-
सिव्विष्णोर्ध्रुवोसि । व्वैष्णवमसिव्विष्णवेत्त्वा ॥ २१ ॥ देवस्य-
त्त्वासवितुः प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् । आददेना-
र्य्यसीदमहꣳरक्षसाङ्ग्रीवाऽअपिकृन्तामि । बृहन्नसिबृहद्द्रवाबृहती-
मिन्द्रायव्वाचंव्वद ॥ २२ ॥ रक्षोहणंव्वलगहनंव्वैष्णवीमिदमहन्तंव्वल-
गमुत्किरामिषम्मेनिष्ट्योषममात्त्योनिचखानेदमहन्तंव्वलगमुत्किरा-
मिषम्मेसमानोषमसमानोनिचखानेदमहन्तंव्वलगमुत्किरामिषम्मेस-

वंन्धुर्ष्यंमसंवन्धुर्न्निचखानेदमहन्तंव्वलगमुत्किरामियम्मेंसजातोयम-
संजातोनिचखानोत्कृत्त्याङ्किरामि ॥ २३ ॥ स्वराडंसिसपत्नहासंत्रराडं-
स्यभिमातिहाजंनराडंसिरक्षोहासंव्वंराडंस्यमित्रहा ॥२४॥ रक्षोहणों-
वोव्वलगहनंप्प्रोक्षामिव्वैष्ष्णवान्त्रंक्षोहणोंवोव्वलगहनोवंनयामिव्वै-
ष्ष्णवान्त्रंक्षोहणोंवोव्वलगहनोवंस्तृणामिवैष्ष्णवान्त्रंक्षोहणौंवांव्वलग-
हनाऽउपंदधामिव्वैष्ष्णवीरंक्षोहणौंवांव्वलगहनौपर्य्यूहामिव्वैष्ष्णवी-
व्वैंष्ष्णवमंसिव्वैष्ष्णवास्त्थ ॥ २५ ॥ देवस्यंत्त्वासवितुःप्प्रंसवेशिव-
नोर्ब्बाहुभ्भ्यामपूष्ष्णोहस्ताभ्भ्याम् । आदंदेनार्य्यसीदमहꣳरक्षंसा-
ङ्ग्रीवाऽअपिंकृन्तामि । यवोंसियवयास्मद्द्वेषोयवयारातींर्द्दिवेत्त्वा-

न्तरिक्षायत्त्वापृथिव्यैत्त्वाशुन्धन्ताँल्लोकाꣳपितृषदनाःपितृषदनमसि
॥२६॥ उद्दिवꣳस्तभानान्तरिक्षम्पृणदृꣳहस्वपृथिव्यान्द्द्युतानस्त्वा-
मारुतोमिनोतुमित्त्रावरुणौद्ध्रुवेणधर्म्मणा । ब्रह्मवनित्त्वाक्षत्त्रवनि-
रायस्पोषवनिपर्य्यूहामि । ब्रह्मदृꣳहक्षत्त्रन्दृꣳहायुर्दृꣳहप्प्रजान्दृꣳह
॥२७॥ ध्रुवासिध्रुवोयंय्यजमानोस्मिन्नायतनेप्प्रजयापशुभिर्ब्भूयात् ।
घृतेनद्द्यावापृथिवीपूर्य्येथामिन्द्रस्यच्छदिरसिव्विश्वजनस्यच्छाया
॥२८॥ परित्त्वागिर्व्वणोगिरऽइमाभवन्तुव्विश्श्वतः । व्वृद्धायुमनुवृद्ध-
योजुष्टाभवन्तुजुष्टयः ॥२९॥ इन्द्रस्यस्यूरसीन्द्रस्यद्ध्रुवोसि । ऐन्द्रम-
सिव्वैश्श्वदेवमसि ॥३०॥ व्विभूरसिप्प्रवाहणोव्वह्निरसिहव्व्यवाहनः ।

श्वात्रोसिप्प्रचेतास्तुथोसिव्विश्ववेदाऽउशिगसि ॥ ३१ ॥ उशिगसि
कविरङ्घारिरसिबम्भारिरवस्यूरसिदुवस्वाञ्छुन्ध्यूरसिमार्ज्जालीयः
सम्म्राडसिकृशानुः परिषद्द्योसिपवमानोनभोसिप्प्रतक्वामृष्टोसिहव्यसूदनऽऋतधामासिस्वर्ज्योतिःसमुद्द्रोसि ॥ ३२ ॥ समुद्द्रोसि
व्विश्वव्यचाऽअजोस्येकपादहिरसिबुध्न्योव्वागस्यैन्द्रमसिसदोस्यृ-
तस्यद्वारौमामासन्ताप्प्तमद्ध्वनामद्ध्वपतेप्प्रमातिरस्वस्तिमेस्मिन्प-
थिदेवयानेभूयान्मित्त्रस्यमा ॥ ३३ ॥ मित्त्रस्यमाचक्षुषेक्षद्ध्वमग्नयः
सगराःसगरास्त्थसगरेणनाम्म्नारौद्द्रेणानीकेनपातमाग्ग्नयःपिपृत-
माग्ग्नयोगोपायतमानमोवोस्तुमामाहिꣳसिष्ट ॥ ३४ ॥ ज्योतिरसि

विश्श्वरूपंव्विश्श्वेषान्देवानाꣳसमित् । त्वꣳसोमतनूकृद्भ्योद्द्वेषो-
भ्योन्न्यकृतेभ्यऽउरुयन्तासिव्वरूथꣳस्वाहाजुषाणोऽअप्तुराज्ज्यस्य-
व्वेतुस्वाहा ॥ ३५ ॥ [शतम् २००] अग्ग्नेनयसुपथारायेऽअस्मान्न्वि-
श्श्वानिदेवव्वयुनानिव्विद्द्वान् । युयोद्ध्यस्म्मज्जुहुराणमेनोभूयि-
ष्ठान्तेनमऽउक्तिंव्विधेम ॥ ३६ ॥ अयन्नोऽअग्निर्व्वरिवस्कृणोत्त्वय-
म्मृधः पुरऽएतुप्प्रभिन्दन् । अयंव्वाजाञ्जयतुव्वाजसातावयꣳशत्रू-
ञ्जयतुजर्हृषाणःस्वाहा ॥ ३७ ॥ उरुव्विष्णोविक्क्रमस्वोरुक्षयायन-
स्कृधि । घृतङ्घृतयोनेपिबप्प्रप्प्रयज्ञपतिन्तिरस्वाहा ॥ ३८ ॥ देवस-
वितरेषतेसोमस्तꣳरक्षस्वमात्त्वादभन् । एतत्त्वन्देवसोमदेवोदेवाँ२ऽ-

उपांगाऽइदमहम्मनुष्यान्त्सहरायस्पोषेणस्वाहानिर्वरुणस्यपाशा-
न्मुच्ये ॥ ३९ ॥ अग्नेव्रतपास्त्वेव्रतपाव्रातवतनूर्मय्यभूदेषासा-
त्वयियोममतनूस्त्वय्यभूदियꣳसामयि । यथायथन्नोव्रतपतेव्रतान्य-
नुमेदीक्षान्दीक्षापतिरमꣳस्तानुतपस्तपस्पतिः ॥ ४० ॥ उरुविष्णो-
विक्रमस्वोरुक्षयायनस्कृधि । घृतङ्घृतयोनेपिबप्रप्रयज्ञपतिन्तिर-
स्वाहा ॥ ४१ ॥ अत्यन्याँ२ऽअगान्नान्याँ२ऽउपागामर्वाक्त्वापरे-
भ्योविदम्परोवरेभ्यः । तन्त्वाजुषामहेदेवव्वनस्पतेदेवयज्यायैदे-
वास्त्वादेवयज्यायैजुषन्तांविष्णवेत्वा । ओषधेत्रायस्वस्वधितेमैनꣳ-
हिꣳसीः ॥ ४२ ॥ द्यामालेखीरन्तरिक्षम्माहिꣳसीःपृथिव्यासम्भव ।

अयꣳहित्त्वास्वधितिस्तेतिजानःप्प्रणिनायंमहतेसौभंगाय । अतस्त्व-
न्देवव्वनस्प्पतेशतवंल्शोव्विरोहसहस्रंवल्शाव्विवयꣳरुहेम ॥ ४३ ॥

इति पञ्चमोऽध्यायः ॥

❀ अथ षष्ठोऽध्यायः ❀

ॐ देवस्यत्त्वासवितुःप्प्रसवेऽश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्या-
म् । आददेनार्य्यसीदमहꣳरक्षसाङ्ग्रीवाऽअपिकृन्तामि । यवोसिय-
वयास्मद्द्वेषोयवयारातीर्द्दिवेत्त्वान्तरिक्षायत्त्वापृथिव्यैत्त्वाशुन्धन्ताँल्लो-
काःपितृषदनाःपितृषदनमसि ॥ १ ॥ अग्ग्रेणीरसिस्वावेशऽउन्नेतृणा-

मेतस्यव्वित्तादधित्त्वास्थास्यतिदेवस्त्वासवितामद्ध्वानक्तुसुपिप्पला·
ऽब्भ्यस्त्वौषधीब्भ्यः । द्यामग्ग्रेणास्पृक्षऽआन्तरिक्षम्मद्ध्येनाप्प्राः पृथि-
वीमुपरेणादृꣳहीः ॥ २ ॥ यातेधामान्युश्मसिगमद्ध्यैयत्रगावोभूरि-
शृङ्गाऽअयासः । अत्राहतदुरुगायस्यव्विष्णोः परमम्पदमवभारि-
भूरि । ब्रह्मवनित्त्वाक्षत्रवनिरायस्पोषवनिपर्य्यूहामि । ब्रह्मदृꣳह-
क्षत्रन्दृꣳहायुर्दृꣳहप्रजान्दृꣳह ॥ ३ ॥ विष्णोः कर्म्माणिपश्यतयतो·
व्व्रतानिपस्पशे ॥ इन्द्रस्ययुज्ज्यः सखा ॥ ४ ॥ तद्विष्णोः परमम्पदꣳ
सदापश्यन्तिसूरयः । दिवीवचक्षुराततम् ॥ ५ ॥ परिवीरसिपरि·
त्वादैवीर्व्विशोव्व्ययन्ताम्परीमंय्यजमानꣳरायोमनुष्ष्याणाम् । दिवः

सूनुरस्येषतेपृथिव्व्याँल्लोकऽआरण्यस्तेपशुः ॥ ६ ॥ उपावीरस्युपदे-
वान्दैवीर्व्विशःप्रागुरुशिजोव्वह्नितमान् । देवंत्वष्टर्व्वसुरमहव्यातें-
स्वदन्ताम् ॥ ७ ॥ रेवतीरमद्ध्वम्बृहस्पतेधारयाव्वसूनि । ऋतस्यंत्वा-
देवहविःपाशेनप्रतिमुञ्चामिधर्षामानुषः ॥ ८ ॥ देवस्यंत्वासवितुः
प्प्रसवेश्विनोर्ब्बाहुभ्यामपूष्णोहस्ताभ्याम् । अग्नीषोमाभ्याञ्जु-
ष्टन्नियुनज्मि । अद्भ्यस्त्वौषधीभ्योनुत्त्वामातामन्न्यतामनुपितानु-
भ्रातासगब्भ्योनुसखासयूत्थ्यः । अग्नीषोमाभ्यान्त्वाजुष्टम्प्रोक्षा-
मि ॥ ९ ॥ अपाम्पेरुरस्यापोदेवीःस्वदन्तुस्वात्तञ्चित्सद्देवहविः । स-
न्तेप्प्राणोव्वातेनगच्छताꣳसमङ्गानियजत्रैःसंयज्ञपतिराशिषा ॥ १० ॥

घृतेनाक्तौपशूँस्त्रायेथाᳪरेवतियजमानेप्प्रियन्धाऽआविश । उरोर
न्तरिक्षात्सजूर्द्देवेनव्वातेनास्यहविषस्त्मनायजसमस्यतन्न्वाभव । व्व-
र्षोव्वर्षीयसियज्ञेयज्ञपतिन्धाᳪस्वाहादेवेब्भ्योदेवेब्भ्यᳪस्वाहा ॥ ११ ॥
माहिर्भूर्म्मापृदाकुर्न्नमस्तऽआतानानर्व्वाप्प्रेहि । घृतस्यकुल्याऽउपऽ-
ऋतस्यपत्थ्याऽअनु ॥ १२ ॥ देवीरापᳪशुद्धावोढ्वᳪसुपरिविष्टा-
देवेषुसुपरिविष्टाव्वयम्परिवेष्टारोभूयास्म ॥ १३ ॥ व्वाचन्तेशुन्धा-
मिप्प्राणन्तेशुन्धामिचक्षुस्तेशुन्धामिश्श्रोत्रन्तेशुन्धामिनाभिन्तेशुन्धा-
मिमेढ्रन्तेशुन्धामिपायुन्तेशुन्धामिचरित्राँस्तेशुन्धामि ॥ १४ ॥ मन-
स्तऽआप्यायतांव्वाक्तऽआप्प्यायताम्प्राणस्तऽआप्प्यायताञ्चक्षु-

स्तऽआप्यायताꣳश्रोत्रन्तऽआप्यायताम् । यत्ते क्रूरंयदास्थितं-
तन्तऽआप्यायतान्निष्ट्यायतान्तत्ते शुद्ध्यतु शमहोभ्यः । ओषं-
धेत्रायस्वस्वधितेमैनꣳहिꣳसीः ॥ १५ ॥ रक्षसाम्भागोसिनिरस्तꣳ
रक्षऽइदमहꣳरक्षोभितिष्ठामीदमहꣳरक्षोवबाधऽइदमहꣳरक्षोधमन्त-
मोनयामि । घृतेनद्यावापृथिवीप्रोर्णुवाथांवायोवेस्तोकानामग्नि-
राज्यस्यवेतुस्वाहास्वाहाकृतेऽऊर्ध्वनभसम्मारुतङ्गच्छतम् ॥ १६ ॥
इदमापःप्रवहतावद्यञ्चमलंचयत् । यच्चाभिदुद्रोहानृतंयच्चशेपेऽ-
भीरुणम् । आपोमातस्मादेनसःपवमानश्चमुञ्चतु ॥ १७ ॥ स-
न्तेमनोमनसासम्प्राणःप्राणेनगच्छताम् । रेडस्यग्निष्ट्वाश्रीणात्वा-

पंस्त्वासमंरिणङ्क्वातंस्यत्वाद्ध्राज्ज्यैपूष्णोरꣳहसाऽऊष्मणोव्व्यथि-
षत्प्रयुतन्द्वेषः ॥ १८ ॥ घृतङ्घृतपावानःपिबतव्वसांव्वसापावानः
पिबतान्तरिक्षस्यहविरसिस्वाहा । दिशः प्रदिशऽआदिशोव्विदिशऽ-
उद्दिशोदिग्भ्यःस्वाहा ॥ १९ ॥ ऐन्द्रःप्प्राणोऽअङ्गेऽअङ्गेनिदीध्यदै-
न्द्रऽउदानोऽअङ्गेऽअङ्गेनिधीतः । देवत्त्वष्टर्भूरितेसꣳसमेतुसलक्ष्मा-
यद्विषुरूपम्भवाति । देवत्रायन्तमवसेसखायोनुत्वामातापितरोमद-
न्तु ॥ २० ॥ समुद्रङ्गच्छस्वाहान्तरिक्षङ्गच्छस्वाहादेवꣳसवितारङ्ग-
च्छस्वाहामित्रावरुणौगच्छस्वाहाहोरात्रेगच्छस्वाहाच्छन्दाꣳसिग-
च्छस्वाहाद्यावापृथिवीगच्छस्वाहायज्ञङ्गच्छस्वाहासोमङ्गच्छस्वाहा

दिव्वयन्नभोगच्छस्वाहाग्निंव्वैश्श्वानरङ्गच्छस्वाहामनोमेहार्दिँषच्छदि-
वन्तेधूमोगच्छतुस्वर्ज्ज्योतिः पृथिवीम्भस्मनापृणस्वाहा ॥ २१ ॥
मापोमौषधीर्हिँसीर्द्धाम्म्नोधाम्म्नोराजँस्ततोव्वरुणनोमुञ्च । षदाहु-
रघ्न्याऽइतिव्वरुणेति शपामहेततोव्वरुणनोमुञ्च । सुमित्रियानऽआ-
पऽओषधयःसन्तुदुर्म्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियञ्चव्वयन्द्वि-
ष्मः ॥ २२ ॥ हविष्मतीरिमाऽआपोहविष्माँ२ऽआविवासति ।
हविष्मान्देवोऽअध्वरोहविष्माँ२ऽअस्तुसूर्यः ॥ २३ ॥ अग्ने-
र्व्वोपन्नगृहस्यसदसिसादयामीन्द्राग्न्योर्भागधेयीस्स्थमित्रावरुणयो-
र्भागधेयीस्स्थव्विश्श्वेषान्देवानाम्भागधेयीस्स्थ । अमूर्याऽउपसू-

ठर्षेषाभिर्व्वासूठर्षैः सह । तानोंहिन्न्वन्त्वद्ध्वरम् ॥ २४ ॥ हृदेत्त्वा-
मनसेत्त्वादिवेत्त्वासूठर्षायत्त्वा । ऊद्ध्र्वमिममद्ध्वरन्दिविदेवेषुहो-
त्राँषच्छ ॥ २५ ॥ सोमंराजन्विश्श्वास्त्वम्प्रजाऽउपावरोहव्विश्श्वा-
स्त्वाम्प्रजाऽउपावरोहन्तु । श्शृणोत्त्वग्निःसमिधाहवम्मेश्शृण्वन्त्वा-
पोधिषणाश्श्चदेवीः । श्श्रोताग्ग्रावाणोव्विदुषोनयज्ञꣳश्शृणोतुदेवःस-
विताहवम्मेस्वाहा ॥ २६ ॥ देवीरापोऽअपान्नपाद्योवऽऊर्म्मिर्हं-
विष्ष्यऽइन्द्रियावान्मदिन्तमः । तन्देवेब्भ्योदेवत्राद्दत्तशुक्क्रपेब्भ्यो
येषाम्भागस्त्थस्वाहा ॥ २७ ॥ कार्षिरसिसमुद्रस्यत्त्वाक्षित्त्याऽउ-
न्नयामि । समापोऽअद्भिरग्ग्मतसमोषधीभिरोषधीः ॥ २८ ॥ यम-

ग्ग्नेपृत्त्सुमर्त्यमवाव्वाजेषुषञ्जुना॒ । सषन्ताशश्श्वतीरिष॑ᳬस्वाहा
॥ २९ ॥ दे॒वस्य॑त्त्वासवि॒तुः प्प्र॑स॒वेऽश्श्विनो॑र्ब्बाहुब्भ्यास्पूष्णोहस्ता-
ब्भ्याम् । आद॑देरावा॑सि॒गभी॑र॒मि॒मम॑द्ध्वरङ्कृधीन्द्राय॒सुषूतमम् ।
उत्त॒मेन॒पविनोर्ज्ज॑स्वन्तम्मधु॑मन्तम्पय॑स्वन्त॒न्निग्ग्रा॒ब्भ्यास्त्थदेवश्रुतस्त-
र्प्पय॑तमा॒मनो॑मे ॥ ३० ॥ मनो॑मेतर्प्पयत॒व्वाच॑म्मेतर्प्पयतप्प्रा॒णम्मे॑तर्प्प-
यतचक्षु॑र्म्मे॑तर्प्पयतश्श्रोत्र॑म्मेतर्प्पयता॒त्मान॑म्मेतर्प्पयतप्प्रजाम्मे॑तर्प्पय-
तपशून्म्मे॑तर्प्पयतगणान्म्मेतर्प्पयतगणा॒मेमा॒व्वितृ॑षन् ॥ ३१ ॥ इन्द्रा-
यत्त्वाव्वसु॑मते॒रुद्र॒व॑तऽइन्द्राय॒त्त्वादित्यव॑तऽइन्द्राय॒त्त्वाभिमातिघ्घ्ने ।
श्श्येनाय॑त्त्वासोमभृतेग्ग्नये॑त्त्वारायस्प्पोषदे ॥ ३२ ॥ यत्ते॑सोमदिवि-

ज्ज्योतिर्य्यत्पृथिव्व्यांय्यदुरावन्तरिक्षे । तेनास्म्मैयजमानायोरुराये-
कृद्ध्यधिदात्त्रेव्वोचः ॥ ३३ ॥ श्वात्त्रास्त्थवृत्त्रतुरोराधोगूर्त्ताऽअमृत-
स्यपत्नीः । तादेवीर्देवत्त्रेमंय्यज्ञन्नयतोपहूताः सोमस्यपिबत ॥ ३४ ॥
माभेर्म्मासंव्विक्क्थाऽऊर्ज्जन्धत्त्स्वधिषणेव्वीड्वीसतीव्वीडयेथामूर्ज्ज-
न्दधाथाम् । पाप्प्माहतोनसोमः ॥ ३५ ॥ प्रागपागुदगधराक्क्सर्व्व-
तस्त्वादिशऽआधावन्तु । अम्बनिष्ष्परसमरीव्विदाम् ॥ ३६ ॥ त्वम-
ङ्गप्रशंसिषोदेवः शविष्ठमर्त्त्यम् । नत्त्वदन्न्योमघवन्नस्तिमर्डितेन्द्रब्ब्र-
वीमितेव्वचः ॥ ३७ ॥ इति षष्ठोऽध्यायः ॥ ६ ॥

❁ अथ सप्तमोऽध्यायः ❁

ॐ वाचस्पतये पवस्व वृष्णोऽअꣳशुभ्यां गभस्तिपूतः । देवो देवेभ्यः पवस्व येषां भागोऽसि ॥ १ ॥ मधुमतीर्न्न ऽइषस्कृधि यत्ते सोमादाभ्यन्नाम जागृवि तस्मै ते सोम सोमाय स्वाहा स्वाहोर्व्वन्तरिक्षमन्वेमि स्वाङ्कृतोऽसि ॥ २ ॥ स्वाङ्कृतोऽसि विश्वेभ्य ऽइन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यो मनस्त्वाष्टु स्वाहा त्वा सुभव सूर्याय देवेभ्यस्त्वा मरीचिपेभ्यो देवाꣳशो यस्मै त्वेडे तत्सत्यमुपरिप्लुता भङ्गेन हतोऽसौ फट् प्राणाय त्वा व्यानाय त्वा ॥ ३ ॥ उपयामगृहीतोऽस्यन्तर्यच्छ मघव-

न्पाहिसोमम् । उरुष्यरायऽएषोयजस्व ॥ ४ ॥ अन्तस्तेद्यावापृथि-
वीदधाम्यन्तर्द्दधाम्युर्व्वन्तरिक्षम् । सजूर्द्देवेभिरवरैः परैश्चान्त-
र्यामेमघवन्मादयस्व ॥ ५ ॥ स्वाङ्कृतोसिविश्वेब्भ्यऽइन्द्रियेब्भ्यो
दिव्येब्भ्यः पार्थिवेब्भ्योमनस्त्वाष्टुस्वाहात्वासुभवसूर्य्यायदेवेब्भ्य-
स्त्वामरीचिपेब्भ्यऽउदानायत्वा ॥ ६ ॥ आवायोभूषशुचिपाऽउपनः
सहस्रन्तेनियुतोव्विश्ववार । उपोतेऽअन्धोमद्यमयामियस्यदेवद-
धिषेपूर्व्वपेयंव्वायवेत्वा ॥ ७ ॥ इन्द्रवायूऽइमेसुताऽउपप्प्रयोभिरा-
गतम् । इन्दवोव्वामुशन्तिहि । उपयामगृहीतोसिव्वायवऽइन्द्रवा-
युब्भ्यान्त्वैषतेयोनिः सजोषोब्भ्यान्त्वा ॥ ८ ॥ अयंव्वाम्मित्रावरुणा-

सुतꣳसोमऽऋतावृधा । ममेदिहश्रुतꣳहवम् । उपयामगृहीतोसि
मित्रावरुणाभ्यान्त्वा ॥ ९ ॥ रायाव्वयꣳससवाꣳसोमदेमहव्व्येनं
देवाषवसेनगावः । तान्धेनुम्मित्रावरुणायुवन्नोव्विश्श्वाहाधत्तमनप-
स्फुरन्तीमेषतेयोनिर्ऋतायुभ्यान्त्वा ॥ १० ॥ याव्वाङ्कशामधुमत्य-
श्श्विनासूनृतावती । तयायज्ञम्मिमिक्षतम् । उपयामगृहीतोस्यश्श्वि-
भ्यान्त्वैषतेयोनिर्म्माध्वीभ्यान्त्वा ॥ ११ ॥ तम्प्रत्नथापूर्व्वथाव्विश्श्वथे
मथाज्ज्येष्ठतातिम्बर्हिषदꣳस्वर्व्विदम् । प्रतीचीनंव्वृजनन्दोहसेधु-
निमाशुञ्जयन्तमनुयासुव्वर्द्धसे । उपयामगृहीतोसिशण्डायत्त्वैषते-
योनिर्व्वीरताम्पाह्यपमृष्टꣳशण्डोदेवास्त्वाशुक्रपाꣳप्रणयन्त्वनाधृ-

ष्ट्टासि ॥ १२ ॥ सुवीरोव्वीरान्प्रजनयन्परीह्यभिरायस्पोषेणयज-
मानम् । सञ्जग्मानोदिवापृथिव्याशुक्रः शुक्रशोचिषानिरस्तꣳश-
ण्डः शुक्रस्याधिष्ठानमसि ॥ १३ ॥ अच्छिन्नस्यतेदेवसोमसुवीर्य्यꣳ
स्यरायस्पोषस्यददितारः स्याम । साप्रथमासंस्कृतिर्व्विश्ववारा-
सप्रथमोव्वरुणोमित्रोऽअग्निः ॥ १४ ॥ सप्रथमोबृहस्पतिश्चिकि-
त्वाँस्तस्माऽइन्द्रायसुतमाजुहोतस्वाहा । त्र्यम्पन्तुहोत्रामद्ध्वायाः
स्विष्टायाःसुप्रीताःसुहुताय्यत्स्वाहायाडग्नीत् ॥ १५ ॥ अयंव्वेन-
श्चोदयत्पृश्निगर्भाज्ज्योतिर्जरायूरजसोव्विमाने । इममपाꣳसङ्ग-
मेसूर्य्यस्यशिशुन्नविप्रामतिभीरिहन्ति । उपयामगृहीतोसिमर्कीय-

स्त्वा ॥ १६ ॥ मनोनयेषुहवनेषुतिग्ग्मंव्विपश्शचच्यांव्वनुथोद्द्रवन्ता ।
आयश्शयषीभिस्तुविनृम्म्णोऽअस्याश्श्रीणितादिशङ्गभस्तावेषतेयो-
निः ऽप्रजाऽपाह्यपमृष्टोमर्कोदेवास्त्वामन्थिपाऽप्रणयन्त्वनाधृष्टासि
॥ १७ ॥ सुप्प्रजाऽप्प्रजाऽप्रजनयन्न्परीह्यभिरायस्प्पोषेणयजमानम् ।
सञ्जग्मानोदिवापृथिव्यामन्थीमन्थिशोचिषानिरस्तोमर्कोमन्थिनो-
धिष्ठानमसि ॥ १८ ॥ येदेवासोदिव्येकादशस्त्थपृथिव्यामद्ध्येका-
दशस्त्थ । अप्पुक्षितोमहिनैकादशस्त्थतेदेवासोयज्ञमिमञ्जुषद्ध्वम्
॥ १९ ॥ उपयामगृहीतोस्याग्ग्रयणोसिस्वाग्ग्रयणः । पाहियज्ञम्पाहि
यज्ञपतिंव्विष्णुस्त्वामिन्द्रियेणपातुव्विष्णुन्त्वम्पाह्यभिसवनानिपा-

हि ॥ २० ॥ सोमं÷पवतेसोमं÷पवतेस्मैब्ब्रह्मणेस्मैक्षत्रायास्मैसु-
न्वतेयजमानायपवतऽइषऽऊर्ज्जेपवतेद्भ्यऽओषधीभ्यःपवतेद्यावा-
पृथिवीभ्याम्पवतेसुभूतायपवतेविश्वेभ्यस्त्वादेवेभ्यऽएषतेयोनि-
र्विश्वेभ्यस्त्वादेवेभ्य÷ ॥ २१ ॥ उपयामगृहीतोसीन्द्रायत्त्वा
बृहद्वतेव्वयस्वतऽउक्क्थाव्ययङ्गृह्णामि । यत्तऽइन्द्रब्बृहद्वयस्तस्मै
त्त्वाविष्ष्णवेत्त्वैषतेयोनिरुक्क्थेभ्यस्त्वादेवेभ्यस्त्वादेवाव्ययंयज्ञ-
स्यायुषेगृह्णामिमित्रावरुणाभ्यान्त्वा ॥ २२ ॥ मित्रावरुणाभ्यान्त्वा
देवाव्ययंयज्ञस्यायुषेगृह्णामीन्द्रायत्त्वादेवाव्ययंयज्ञस्यायुषेगृह्णामी-
न्द्राग्निभ्यान्त्वादेवाव्ययंयज्ञस्यायुषेगृह्णामीन्द्रावरुणाभ्यान्त्वादेवा-

व्वयंयज्ञस्यायुषेगृह्णामीन्द्राबृहस्पतिभ्यान्त्वादेवाव्वयंयज्ञस्यायुषेगृ-
ह्णामीन्द्राविष्णुभ्यान्त्वादेवाव्वयंयज्ञस्यायुषेगृह्णामि ॥ २३ ॥ मूर्द्धा-
नन्दिवोऽअरतिम्पृथिव्याव्वैश्वानरमृतऽआजातमग्निम् । कविꣳस-
म्म्राजमतिथिञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ॥ २४ ॥ उपयाम-
गृहीतोसिध्रुवोसिध्रुवक्षितिर्ध्रुवाणान्ध्रुवतमोच्युतानामच्युत-
क्षित्तमऽएषतेयोनिर्व्वैश्वानरायत्वा । ध्रुवन्ध्रुवेणमनसाव्वाचासोम-
मवनयामि । अथानऽइन्द्रइद्विशोसपत्नाःसमनसस्करत् ॥ २५ ॥
यस्तेद्रप्सस्कन्दतियस्तेऽअꣳशुर्ग्रावच्युतोधिषणयोरुपस्थात् ।
अध्वर्य्योर्व्वापरिवायःपवित्रात्तन्तेजुहोमिमनसाव्वषट्कृतꣳस्वाहा

देवानामुत्क्रमणमसि ॥ २६ ॥ प्राणायमेव्वर्च्चोँदाव्वर्च्चँसेपवस्वव्व्या-
नायमेव्वर्च्चोँदाव्वर्च्चँसेपवस्वोदानायमेव्वर्च्चोँदाव्वर्च्चँसेपवस्वव्वाचेमे
व्वर्च्चोँदाव्वर्च्चँसेपवस्वक्रतूदक्षाब्भ्याम्मेव्वर्च्चोँदाव्वर्च्चँसेपवस्वश्श्रोत्रा-
यमेव्वर्च्चोँदाव्वर्च्चँसेपवस्वचक्षुर्ब्भ्याम्मेव्वर्च्चोँदसौव्वर्च्चँसेपवेथामात्मने-
मे ॥ २७ ॥ आत्मनेमेव्वर्च्चोँदाव्वर्च्चँसेपवस्वौजसेमेव्वर्च्चोँदावर्च्चँसेपव-
स्वायुषेमेव्वर्च्चोँदाव्वर्च्चँसेपवस्वव्विश्श्वाब्भ्योमेप्प्रजाब्भ्योव्वर्च्चोँदसौ-
व्वर्च्चँसेपवेथाम् ॥ २८ ॥ कोऽसिकतमोऽसिकस्यासिकोनामासि । यस्य
तेनामामन्महियन्त्वासोमेनातीतृपाम । भूर्ब्भुवः स्वः सुप्प्रजाः प्प्रजा-
भिः स्याᳬं सुवीरोव्वीरैः सुपोषः पोषैः ॥ २९ ॥ उपयामगृहीतोऽसिम-

धवेत्त्वोपयामगृंहीतोसिमाधवायत्त्वोपयामगृंहीतोसिशुक्रायत्त्वो-
पयामगृंहीतोसिशुचंयेत्वोपयामगृंहीतोसिनभंसेत्त्वोपयामगृंहीतोसि-
नभस्यायंत्त्वोपयामगृंहीतोसीषेत्त्वोपयामगृंहीतोस्यूर्ज्जेत्त्वोपयाम-
गृंहीतोसिसहंसेत्त्वोपयामगृंहीतोसिसहस्यायत्त्वोपयामगृंहीतोसि
तपंसेत्त्वोपयामगृंहीतोसितपस्यायंत्त्वोपयामगृंहीतोस्यꣳहसस्पतयें-
त्त्वा ॥ ३० ॥ इन्द्राग्ग्नीऽआगंतꣳसुतङ्गीर्भिर्न्नभोव्वरेंण्यम् । अस्यपा-
तन्धियेषिता । उपयामगृंहीतोसीन्द्राग्निभ्यान्त्वैषतेयोनिरिन्द्राग्नि-
भ्यान्त्वा ॥ ३१ ॥ आघाये‌ऽअग्निमिन्धतेस्तृणन्तिबर्हिरानुषक् । ये-
षामिन्द्रोयुवासखा उपयामगृंहीतोस्यग्नीन्द्राभ्यान्त्वैषतेयोनिर-

ग्नीन्द्राभ्यान्त्वा ॥३२॥ ओमासश्चर्षणीधृतोविश्वेदेवासऽआगत। दाश्वाᳬंसोदाशुषः सुतम्। उपयामगृहीतोसिविश्वेभ्यस्त्वादेवेभ्यऽएषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः ॥ ३३ ॥ विश्वेदेवासऽआगतशृणुतामऽइमᳬंहवम्। एदम्बर्हिर्निषीदत। उपयामगृहीतोसिविश्वेभ्यस्त्वादेवेभ्यऽएषतेयोनिर्विश्वेभ्यस्त्वादेवेभ्यः ॥३४॥ इन्द्रमरुत्वऽइहपाहिसोमंयथाशार्य्यातेऽअपिबःसुतस्य। तवप्रणीतीतवशूरशर्म्मन्नाविवासन्तिकवयःसुयज्ञाः[१]। उपयामगृहीतोसीन्द्रायत्वामरुत्वतऽएषतेयोनिरिन्द्रायत्वामरुत्वते ॥ ३५ ॥ मरुत्व-

१—इत्यत्र नेः प्रीदते (३।५९) इत्यनेन णकारस्य स्थाने षकारमापद्यते।

न्तव्वृषभंव्वावृधानमकंवारिन्दिव्व्यꣳशासमिन्द्रंम् । व्विश्श्वांसाहमवंसेनूतंनायोग्ग्रꣳसंहोदामिहतꣳहुंवेम । उपयामगृंहीतोसीन्द्राय त्त्वामरुत्त्वंतऽएषतेयोनिरिन्द्रायत्त्वामरुत्त्वंते । उपयामगृंहीतोसिमरुतान्त्वौजंसे ॥ ३६ ॥ सजोषाऽइन्द्रसगंणोमरुद्भिꣳसोमंम्पिबव्वृत्रहाशूंरव्विद्वान् । जहिशत्त्रूँ १ रपमृधोंनुदस्वाथाभंयङ्कृणुहिव्विश्श्वतोंनꣳ । उपयामगृंहीतोसीन्द्रायत्त्वामरुत्त्वंतऽएषतेयोनिरिन्द्रायत्त्वाम-

१—'विश्वसहभुवपुषवसुषु' (शु० य० प्रा० अ० ३ सू० १०२) विश्व इत्येतत्पदं सह इत्येतेषु प्रत्ययेषु दीर्घमापद्यते । एवम् भुव यथा—'अर्च्चा विश्वा नराय विश्वाभुवे' (शु० य० सं० ३३।२३) पुष यथा—'विश्वापुषꣳरयिम् (शु० य० सं० २५।४५)

रुत्वंते ॥ ३७ ॥ मरुत्वाँ२ऽइन्द्र वृषभोरणायपिबासोमंमनुष्वधं-
म्मदाय । आसिञ्चस्वजठरेमध्वऽऊर्म्मिन्त्व राजासिप्रतिपत्सुता-
नाम् । उपयामगृहीतोसीन्द्रायत्त्वामरुत्वंतऽएषतेयोनिरिन्द्रायत्त्वाम-
रुत्वंते ॥३८॥ महाँ२ऽइन्द्रोनृवदाचर्षणिप्राऽउतद्विबर्हाऽअमिनःसह-
होभिः । अस्म्मद्र्यग्वावृधेवीर्य्यायोरुःपृथुःसुकृतःकर्तृभिर्भूत् ।
उपयामगृहीतोसिमहेन्द्रायत्वैषतेयोनिर्म्महेन्द्रायत्त्वा ॥३९॥ महाँ२ऽइ-
न्द्रोयऽओजसापर्ज्जन्योवृष्टिमाँ२ऽइव । स्तोमैर्व्वत्सस्यवावृधे ।
उपयामगृहीतोसिमहेन्द्रायत्वैषतेयोनिर्म्महेन्द्रायत्त्वा ॥ ४० ॥ उदु-
त्यञ्जातवेदसन्देवंवहन्तिकेतवः । दृशेविश्वायसूर्य्यस्वाहा

॥ ४१ ॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्मित्रस्यवरुणस्याग्नेः ।
आप्प्राद्द्यावापृथिवीऽअन्तरिक्षꣳ सूर्यऽआत्मजगतस्तस्थुषश्च-
स्वाहा ॥ ४२ ॥ अग्नेनयसुपथारायेऽअस्मान्विश्वानिदेववयुना-
निविद्वान्। युयोद्ध्यस्म्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिंविवि-
धेमस्वाहा ॥ ४३ ॥ अयन्नोऽअग्निर्व्वरिवस्कृणोत्वयम्मृधः पुरऽए-
तुप्रभिन्दन्। अयंव्वाजाञ्जयतुव्वाजसातावयꣳशत्रूञ्जयतुजर्हृषाणः-
स्वाहा ॥ ४४ ॥ रूपेणवोरूपमभ्यागान्तुथोवोविश्ववेदाविभजतु ।
ऋतस्यपथाप्रेतचन्द्रदक्षिणाविस्वःपश्यव्व्यन्तरिक्षंयतस्वसदस्यैः
॥ ४५ ॥ ब्राह्मणमद्ययविदेयम्पितृमन्तम्पैतृमत्यमृषिमार्षेयꣳसुधा-

तुंदक्षिणम् । अस्म्मदूद्धातादेवत्राग॑च्छतप्प्रदातारमाविशत ॥ ४६ ॥
अग्ग्नये॑त्त्वामह्यंव्वरु॑णोददातुसोमृतत्त्वमं॑शीयायु॑र्दात्रऽए॑धिमयोमह्यं-
म्प्रतिग्ग्रहीत्रेरुद्द्रायं॑त्त्वामह्यं॑व्वरु॑णोददातुसोमृतत्त्वमं॑शीयप्प्राणोदा-
त्रऽए॑धिव्वयोमह्यं॑म्प्रतिग्ग्रहीत्रेबृहस्प्पत॑येत्त्वामह्यंव्वरु॑णोददातुसो-
मृतत्त्वमं॑शीयत्त्वग्ग्दात्रऽए॑धिमयोमह्यं॑म्प्रतिग्ग्रहीत्रेयमायं॑त्त्वामह्यं
व्वरु॑णोददातुसोमृतत्त्वमं॑शीयहयो॑दात्रऽए॑धिव्वयोमह्यं॑म्प्रतिग्ग्रहीत्रे
॥४७॥कोदात्त्कस्म्माऽअदात्त्कामोदात्त्कामायादात् । कामो॑दाताकामं॑-
प्प्रतिग्ग्रहीताकामैतत्ते॑ ॥ ४८ ॥ इति सप्तमोऽध्यायः ॥ ७ ॥

❀ अथ अष्टमोऽध्यायः ❀

ॐ उपयामगृंहीतोस्यादित्त्येब्भ्यंस्त्वा । विष्ष्णंऽउरुगायैषते-
सोमस्त ꣳ रंक्षस्वमात्त्वादभन् ॥ १ ॥ कदाचनस्तरीरंसिनेन्द्रंसश्च-
सिदाशुषें। उपोपेन्नुमंघवन्न्भूयऽइन्नुतेदानंन्देवस्यंपृच्च्यतऽआदित्त्ये-
ब्भ्यंस्त्वा ॥ २ ॥ कदाचनप्प्रयुंच्छस्युभेनिपासिजन्न्मंनी । तुरींयादित्त्य-
सवंनन्तऽइन्द्रियमातंस्त्थावमृतंन्दिव्व्यादित्त्येब्भ्यंस्त्वा ॥ ३ ॥ यज्ञो-
देवानाम्प्रत्त्यैतिसुम्म्नमादित्त्यासोभवंतामृडयन्तं÷ । आवोव्वार्चींसु-
मतिव्वंवृत्त्याद ꣳ होश्चिद्द्याव्वंरिवोव्वितरासंदादित्येब्भ्यंस्त्वा ॥ ४ ॥

ऽविवस्वन्नादित्यैषतेसोमपीथस्तस्मिन्मत्स्व । श्रदंस्मैनरोव्वचं-
सेदधातनयदाशीर्दादम्पतीव्वाममश्नुतः । पुमान्पुत्रोजायतेव्वि-
न्दतेव्वस्वधाव्विश्वाहारपऽएधतेगृहे ॥५॥ व्वाममद्यसवितर्व्वाम-
मुश्वोदिवेदिवेव्वाममस्मभ्यᳪंसावीः । व्वामस्यहिक्षयस्यदेवभूरे-
रयाधियाव्वामभाजः स्याम ॥ ६ ॥ उपयामगृहीतोसिसावित्रोसि-
चनोधाश्चनोधाऽअसिचनोमयिधेहि । जिन्वयज्ञञ्जिन्वयज्ञपतिम्भ-
गायदेवायत्वासवित्रे ॥ ७ ॥ [शतम् ३००] उपयामगृहीतोसिसु-
शर्म्मासिसुप्रतिष्ठानोबृहदुक्षायनमः । व्विश्वेब्भ्यस्त्वादेवेब्भ्यऽए-
षतेयोनिर्व्विश्वेब्भ्यस्त्वादेवेब्भ्यः ॥ ८ ॥ उपयामगृहीतोसिबृह-

स्पतिसुतस्यदेवसोमतऽइन्द्रोरिन्द्रियावंतुःपत्नीवतोग्रहाँ२ऽऋद्ध्या-
सम् । अहम्परस्तादहमवस्ताद्यदन्तरिक्षन्तदुमेपिताभूत् । अहꣳ
सूर्य्यमुभयतोददर्शाहन्देवानाम्परमङ्गुहायत् ॥ ९ ॥ अग्नाँ३ऽइपत्नी-
वन्त्सजूर्देवेनत्त्वष्ट्रासोमम्पिबस्वाहा । प्रजापतिर्वृषासिरेतोधारेतो
मयिधेहिप्रजापतेस्तेवृष्णोरेतोधसोरेतोधामंशीय ॥ १० ॥ उपयाम-
गृहीतोसिहरिरसिहारियोजनोहरिभ्यान्त्वा । हर्य्योर्द्धानास्थसह-
सोमाऽइन्द्राय ॥ ११ ॥ यस्तेऽअश्वसनिर्भक्षोयोगोसनिस्तस्यतऽइ-
ष्टयजुषस्तुतस्तोमस्यशस्तोक्थस्योपहूतस्योपहूतोभक्षयामि ॥ १२ ॥
देवकृतस्यैनसोवयजनमसिमनुष्यकृतस्यैनसोवयजनमसिपितृकृतस्यै-

नंसोवयजंनमस्यात्मकृतस्यैनंसोवयजंनमस्येनंसऽएनसोवयजंनमसि ।
यच्चाहमेनोंविद्वाँश्चकारयच्चाविद्वाँस्तस्यसर्व्वस्यैनंसोवयजंनम-
सि ॥ १३ ॥ संव्वर्चँसापयंसासन्तनूभिरगंन्महिमनंसासᳪशिवेनं ।
त्वष्टांसुदत्रोव्विदंधातुरायोनुंमार्ष्टुतन्न्वोयद्विलिष्टम् ॥ १४ ॥ स-
मिन्द्रणोमनंसानेषिगोभिःसᳪसूरिभिर्म्मघवन्त्सᳪस्वस्त्या । सम्ब्र-
ह्मणादेवकृतंयदस्तिसन्देवानाᳪसुमतौयज्ञियानाᳪस्वाहा ॥१५॥
संव्वर्चँसापयंसासन्तनूभिरगंन्महिमनंसासᳪशिवेनं । त्वष्टासुदत्रो
व्विदंधातुरायोनुंमार्ष्टुतन्न्वोयद्विलिष्टम् ॥ १६ ॥ धातारातिःसंवि-
तेदञ्जुषन्ताम्प्रजापतिर्न्निधिपादेवोऽअग्निः । त्वष्टाविष्णुःप्रजया-

सङ्ँरराणाबजमानायद्द्रविणन्दधातस्वाहा ॥ १७ ॥ सुगावोदेवाः
सदनाऽअकर्म्मबऽआजग्मेदꣳसवनञ्जुषाणाः । भरमाणाव्वहमाना
हवीꣳष्यस्मेधत्तव्वसवोव्वसूनिस्वाहा ॥ १८ ॥ याँ२ऽआवहऽउश-
तोदेवदेवाँस्तान्प्रेरयस्वेऽअग्नेसधस्त्थे । जक्षिवाꣳसः पपिवाꣳस-
श्चविश्वेसुञ्घर्म्मꣳस्वरातिष्ठतानुस्वाहा ॥ १९ ॥ व्वयꣳहित्वा-
प्रयतिबज्ञेऽअस्मिन्नग्नेहोतारमवृणीमहीह । ऋधगयाऽऋधगुता-
शमिष्ठाःप्रजानन्यज्ञमुपयाहिविद्वान्त्स्वाहा ॥ २० ॥ देवागातु-
विदोगातुंव्वित्त्वागातुमित । मनसस्पतऽइमन्देवबज्ञꣳस्वाहाव्वाते-
धाः ॥ २१ ॥ बज्ञबज्ञङ्गच्छबज्ञपतिङ्गच्छस्वांयोनिङ्गच्छस्वाहा । एष-

तैँषज्ञोषंज्ञपतेसहसूक्तवाकःसर्व्वैँवीरस्तञ्जुषस्वस्वाहा ॥ २२ ॥
मार्हिर्ब्भूर्म्मापृदाकुः । उरुꣳहिराजाव्वरुणश्चकारसूर्य्यायपन्थाम-
न्न्वेतवाऽउ। अपदेपादाप्प्रतिधातवेकरुतापवक्ताहृदयाव्विधश्चित्।
नमोव्वरुणायाभिष्ठितोव्वरुणस्यपाशः ॥ २३ ॥ अग्नेरनीकमपऽ-
आविवेशापान्नपात्प्रतिरक्षन्नसुर्य्यम् । दमेदमेसमिधंय्यक्ष्यग्नेप्प्रति-
तेजिह्वाघृतमुच्चरण्यत्स्वाहा ॥ २४ ॥ समुद्रेतेहृदयमप्स्वन्तःसन्त्वा-
व्विशन्त्वोषधीरुतापः । यज्ञस्यत्त्वायज्ञपतेसूक्तोक्तौनमोवाकेव्वि-
धेमयत्स्वाहा ॥ २५ ॥ देवीरापऽएषवोगर्ब्भस्तꣳसुप्प्रीतꣳसुभृतम्बि-
भृत । देवसोमैषतेलोकस्तस्मिञ्छञ्चव्वक्ष्वपरिचव्वक्ष्व ॥२६॥ अवभृ-

थनिचुम्पुणनिचेरुरसिनिचुम्पुणः । अवदेवैर्देवकृतमेनोयासिषमव-
मर्त्यैर्मर्त्यकृतम्पुरुराव्णोदेवरिषस्पाहिदेवानाꣳसमिदसि ॥ २७ ॥
एजतुदशमास्योगर्ब्भोजरायुणासह । यथायंव्वायुरेजतियथासमुद्द्रऽ-
एजति । एवायन्दशमास्योऽअस्रज्जरायुणासह ॥ २८ ॥ यस्यैतेयज्ञि-
योगर्ब्भोयस्यैयोनिर्हिरण्ययी । अङ्गान्यह्रुतायस्यतम्मात्रासमजीग-
मꣳस्वाहा ॥ २९ ॥ पुरुदस्मोविषुरूपऽइन्दुरन्तर्म्महिमानमानञ्ज-
धीरः । एकपदीन्द्विपदीन्त्रिपदीञ्चतुष्पदीमष्टापदीम्भुवनानुप्रथ-
न्ताꣳस्वाहा ॥ ३० ॥ मरुतोयस्यहिक्षयेपाथादिवोव्विमहसः । ससु-
गोपातमोजनः ॥ ३१ ॥ महीद्यौःपृथिवीचनऽइमंयज्ञम्मिमिक्षताम् ।

पिपृतान्नोभरीमभिः ॥ ३२ ॥ आतिष्ठव्वृत्रहन्रथंयुक्तातेब्रह्मणा-
हरी । अर्व्वाचीनꣳसुतेमनोग्रावाकृणोतुव्वग्नुना । उपयामगृहीतो-
सीन्द्रायत्त्वाषोडशिनऽएषतेयोनिरिन्द्रायत्त्वाषोडशिने ॥३३॥ युक्ष्वा-
हिकेशिनाहरीव्वृषणाकक्ष्यप्रा । अथानऽइन्द्रसोमपागिरामुपश्रुतिञ्च-
र । उपयामगृहीतोसीन्द्रायत्त्वाषोडशिनऽएषतेयोनिरिन्द्रायत्त्वाषोड-
शिने ॥ ३४ ॥ इन्द्रमिद्धरीव्वहतोप्प्रतिधृष्टशवसम् । ऋषीणाञ्चस्तुती-
रुपयज्ञञ्चमानुषाणाम् । उपयामगृहीतोसीन्द्रायत्त्वाषोडशिनऽएषतेयो-
निरिन्द्रायत्त्वाषोडशिने ॥ ३५ ॥ यस्मान्नजातःपरोऽअन्योऽअस्ति
यऽआविवेशभुवनानिव्विश्श्वा । प्रजापतिःप्प्रजयासꣳरराणस्त्रीणि

ज्ज्योतीꣳषिसचतेसषोडशी ॥३६॥ इन्द्रश्चसम्म्राड्वरुणश्चराजातौ-
तेभक्षञ्चक्रतुरग्ग्रऽएतम् । तयोरहमनुभक्षम्भक्षयामिव्वाग्देवीजुषा-
णासोमस्यतृप्प्यतुसहप्प्राणेनस्वाहा ॥ ३७ ॥ अग्ग्नेपवस्वस्वपाऽअ-
स्म्मेव्वर्च्चः सुवीर्य्यम् । दधद्रयिम्मयिपोषम् । उपयामगृहीतोस्य-
ग्ग्नयेत्वाव्वर्च्चसऽएषतेयोनिरग्ग्नयेत्वाव्वर्च्चसे । अग्ग्नेव्वर्च्चस्विन्व-
र्च्चस्वाँस्त्वन्देवेष्व्वसिव्वर्च्चस्वानहम्मनुष्येषुभूयासम् ॥ ३८ ॥ उ-
त्तिष्ठन्नोजसासहपीत्वीशिप्प्रेऽअवेपयः । सोममिन्द्रचमूसुतम् । उप-
यामगृहीतोसीन्द्रायत्वौजसऽएषतेयोनिरिन्द्रायत्वौजसे । इन्द्रौजि-
ष्ठौजिष्ठस्त्वन्देवेष्व्वस्योजिष्ठोहम्मनुष्येषुभूयासम् ॥ ३९ ॥ अदृश्र-

मस्यकेतवोविरश्मयोजनाँ२ऽअनु । भ्राजन्तोऽअग्नयोंयथा । उपयाम-
गृहीतोसिसूर्य्यायत्वाभ्राजायैषतेयोनिःसूर्य्यायत्वाभ्राजाय । सू-
र्य्यभ्राजिष्ठभ्राजिष्ठस्त्वन्देवेष्वसिभ्राजिष्ठोहम्मनुष्येषुभूयासम्
॥ ४० ॥ उदुत्यञ्जातवेदसन्देवंव्वहन्तिकेतवः । दृशेविश्वायसूर्य्य-
म् । उपयामगृहीतोसिसूर्य्यायत्वाभ्राजायैषतेयोनिःसूर्य्यायत्वाभ्रा
जाय ॥ ४१ ॥ आजिघ्रकलशम्मह्यात्वाविशन्त्विन्दवः । पुनरूर्ज्जा
निवर्त्तस्वसानः सहस्रन्धुक्ष्वोरुधारापयस्वतीपुनर्म्माविशताद्रयिः
॥४२॥ इडेरन्तेहव्येकाम्येचन्द्रेज्ज्योतेदितिसरस्वतिमहिविश्रुति ।
एताते॑ऽअघ्न्येनामानिदेवेभ्योमासुकृतम्ब्रूतात् ॥ ४३ ॥ विनऽइन्द्रमृ-

धोजहिनीचायच्छपृतन्यतः । योऽअस्माँ२ऽअभिदासत्त्यधरङ्गमयात-
मः । उपयामगृहीतोसीन्द्रायत्त्वाव्विमृधऽएषतेयोनिरिन्द्रायत्त्वा
व्विमृधे ॥ ४४ ॥ व्वाचस्पतिंव्विश्वकर्म्माणमूतयेमनोजुवंव्वाजेऽअ-
द्याहुवेम । सनोव्विश्वानिहवनानिजोषद्विश्वशम्भूरवसेसाधु-
कर्म्मा । उपयामगृहीतोसीन्द्रायत्त्वाव्विश्वकर्म्मणऽएषतेयोनिरि-
न्द्रायत्त्वाव्विश्वकर्म्मणे ॥ ४५ ॥ व्विश्वकर्म्मन्हविषाव्वर्द्धनेनत्रा-
तारमिन्द्रमकृणोरवद्ध्यम् । तस्म्मैव्विशः समनमन्तपूर्व्वीरयमुग्ग्रोव्वि-
हव्योयथासत् । उपयामगृहीतोसीन्द्रायत्त्वाव्विश्वकर्म्मणऽएषते
योनिरिन्द्रायत्त्वाव्विश्वकर्म्मणे ॥ ४६ ॥ उपयामगृहीतोस्यग्नये

त्वागायत्रच्छन्दसङ्गृह्णामीन्द्रायत्वात्रिष्टुप्छन्दसङ्गृह्णामिविश्वेभ्य·
स्त्वादेवेभ्योजगच्छन्दसङ्गृह्णाम्यनुष्टुप्तेभिगरः ॥४७॥ व्रेशीनान्त्वा-
पत्मन्नाधूनोमिकुकूननानान्त्वापत्मन्नाधूनोमिभन्दनानान्त्वापत्म-
न्नाधूनोमिमदिन्तमानान्त्वापत्मन्नाधूनोमिमधुन्तमानान्त्वापत्मन्ना-
धूनोमिशुक्रन्त्वाशुक्रआधूनोम्यह्नोरूपेसूर्यस्यरश्मिषु ॥ ४८ ॥
ककुभꣳरूपंवृषभस्यरोचतेबृहच्छुक्रःशुक्रस्यपुरोगाःसोमꣳसोम-
स्यपुरोगाः । यत्तेसोमादाभ्यन्नामजागृवितस्मैत्वागृह्णामितस्मैते
सोमसोमायस्वाहा ॥ ४९ ॥ उशिक्त्वन्देवसोमाग्नेःप्रियम्पाथोपी-
हिवशीत्त्वन्देवसोमेन्द्रस्यप्रियम्पाथोपीह्यस्मत्सखात्वन्देवसोम-

व्विश्श्वेषान्देवानाम्प्प्रियम्पाथोपीहि ॥ ५० ॥ इहरतिरिहरमद्ध्वमिह-
धृतिरिहस्वधृतिः स्वाहा । उपसृजन्धरुणम्मात्रेधरुणोमातरन्धयन् ।
रायस्प्पोषमस्म्मासुदीधरत्स्वाहा ॥ ५१ ॥ सत्रस्यऽऋद्धिरस्यगन्न्म-
ज्ज्योतिरमृताऽअभूम । दिवम्पृथिव्व्याऽअद्ध्यारुहामाविदामदेवा-
न्त्स्वज्ज्योतिः ॥५२॥ युवन्तमिन्द्रापर्व्वतापुरोयुधायोनः पृतन्न्यादपत-
न्तमिद्धतंव्वज्ज्रेणतन्तमिद्धतम् । दूरेचत्तायच्छन्त्सद्गहनंयदिनक्षत् ।
अस्म्माकः शत्रून्परिशूरव्विश्श्वतोदर्म्मादर्षीष्टव्विश्श्वतः । भूर्भुवः
स्वः सुप्प्रजाः प्प्रजाभिः स्यामसुवीराव्वीरैः सुपोषाः पोषैः ॥ ५३ ॥
परमेष्ठ्यभिधीतः प्प्रजापतिर्व्वाचिव्व्याहृतायामन्धोऽअच्छेतः सविता-

सन्न्यांविश्वकर्म्मादीक्षायाम्पूषासोमक्क्रयण्यामिन्द्रश्च ॥ ५४ ॥
इन्द्रश्चमरुतश्चक्क्रयायोपोत्थितोसुरःपण्यमानोमित्रःक्क्रीतोवि-
ष्णु÷शिपिविष्टऽऊरावासन्नोविष्णुर्न्नरन्धिषःप्प्रोह्यमाणःसोम÷
॥५५॥ प्प्रोह्यमाणःसोमऽआगतोव्वरुणऽआसन्द्यामासन्नोग्निराग्नी-
ध्रऽइन्द्रोहविर्द्धानेथर्व्वोपावह्रियमाणोविश्श्वेदेवाः ॥ ५६ ॥ वि-
श्श्वेदेवाऽअᳬशुषुन्न्युप्तोविष्णुराप्प्रीतपाऽआप्प्याय्यमानोयमःसू-
यमानोविष्णु÷सम्भ्रियमाणोव्वायुःपूयमानःशुक्क्रःपूतःशुक्क्रःक्षी-
रश्रीर्म्मन्थीसक्तुश्रीर्विश्श्वेदेवाः ॥ ५७ ॥ विश्श्वेदेवाश्चमसेषून्नी-
तोसुर्होमायोद्यतोरुद्रोहूयमानोव्वातोभ्यावृत्तोनृचक्षाःप्प्रतिख्या-

तोभक्षोभक्ष्यमाणꣳपितरोनाराशꣳसाः ॥ ५८ ॥ सन्नःसिन्धुरवभृथा-
योद्यतꣳसमुद्रोभ्यवह्रियमाणꣳसलिलःप्रप्लुतोययोरोजसास्कभि-
भितारजाꣳसिव्वीर्येभिर्व्वीरतमाशविष्ठा । यापत्येतेऽअप्रतीतास-
होभिर्व्विष्णूऽअगन्न्वरुणापूर्व्वहूतौ ॥ ५९ ॥ देवान्दिवमगन्न्यज्ञस्त-
तोमाद्द्रविणमष्टुमनुष्यानन्तरिक्षमगन्न्यज्ञस्ततोमाद्द्रविणमष्टुपितॄ-
न्पृथिवीमगन्न्यज्ञस्ततोमाद्द्रविणमष्टुयङ्कञ्चलोकमगन्न्यज्ञस्ततोमे-
भद्रमभूत् ॥ ६० ॥ चतुस्त्रिꣳशत्तन्तवोयेव्वितत्निरेयऽइमंयज्ञꣳस्व-
धयाददन्ते । तेषाञ्छिन्नꣳसम्वेतद्दधामिस्वाहाघर्म्मोऽअप्येतुदेवान्
॥ ६१ ॥ यज्ञस्यदोहोव्वितततꣳपुरुत्रासोऽअष्टधादिवमन्वाततान । स-

षंज्ञधुक्क्ष्वमहिंसेष्प्रजायाᳬरायस्प्पोषंविश्श्वमायुंरशीयस्वाहा ॥६२॥
आपंवस्वहिरंण्यवद्दश्श्वंवत्सोमव्वीरवंत् । व्वाजङ्गोमंन्तमाभंरस्वाहा
॥ ६३ ॥ इति अष्टमोऽध्यायः ॥ ८ ॥

❀ अथ नवमोऽध्यायः ❀

ॐ देवंसवितःंप्प्रसुंवयज्ञम्प्रसुंवयज्ञपंतिम्भगाय । दिव्व्यो-
गन्धर्व्वः केतपूः केतंन्नःंपुनातुव्वाचस्प्पतिर्व्वाजंन्नःंस्वदतुस्वाहा
॥ १ ॥ ध्रुवसदंन्त्वानृषदंम्मनःंसदंमुपयामगृहीतोसीन्द्रायत्त्वाजुष्टंङ्
ह्णाम्म्येषतेयोनिरिन्द्रायत्वाजुष्टतमम् । अप्सुषदंन्त्वाघृतसदंव्व्योम-

सदमुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्वाजुष्टं-
तमम्। पृथिवीसदन्त्वान्तरिक्षसदन्दिविसदन्देवसदन्नाकसदमुपया-
मगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टतमम् ॥२॥
अपाᳫँरसमुद्वयसᳫँ सूर्य्यसन्तᳫँ समाहितम्। अपाᳫँरसस्ययोरस-
स्तंव्वोगृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनि-
रिन्द्रायत्त्वाजुष्टतमम् ॥ ३ ॥ ग्रहाऽऊर्ज्जाहुतयोव्यन्तोविप्प्रायम-
तिम्। तेषांव्विशिप्प्रियाणांव्वोहमिषमूर्ज्जᳫँ समग्ग्रभमुपयामगृहीतो-
सीन्द्रायत्त्वाजुष्टङ्गृह्णाम्म्येषतेयोनिरिन्द्रायत्त्वाजुष्टतमम्। सम्पृचौ-
स्थᳫँसम्माभद्रेणपृङ्क्तंव्विपृचौस्थोव्विमापाप्मनापृङ्क्तम् ॥ ४ ॥

इन्द्रस्यव्वज्रोसिव्वाजसास्त्वयायंव्वाजᳬसेत् । व्वाजस्यनुप्प्रसवे-
मातरम्महीमदितिन्नामव्वचसाकरामहे । बस्यामिदंव्विश्श्वम्भुवन-
माविवेशतस्यान्नोदेवः सविताधर्म्मसाविषत् ॥ ५ ॥ अप्प्स्वन्तरमृतं-
मप्प्सुभेषजमपामुतप्प्रशस्तिष्ष्वश्श्वाभवतव्वाजिनः । देवीरापो-
षोवऽऊर्म्मिः प्प्रतूर्त्तिᳬककुन्मान्व्वाजसास्तेनायंव्वाजᳬसेत् ॥ ६ ॥
व्वातोवामनोवागन्धर्व्वाः सप्तविᳬशतिः । तेऽअग्ग्रेश्श्वमयुञ्जँस्तेऽ-
अस्स्मिञ्जवमादधुः ॥ ७ ॥ व्वातरᳬहाभवव्वाजिन्न्युज्ज्यमानऽइन्द्र-
स्येवदक्षिणः श्रियैधि । युञ्जन्तुत्त्वामरुतोव्विश्श्ववेदसऽआतेत्त्वष्टा-
पत्सुजवन्दधातु ॥ ८ ॥ जवोयस्तेव्वाजिन्निहितोगुहायः श्येनेपरी-

त्तोऽअर्चंरच्चव्वातें । तेनंनोव्वाजिन्न्वलंवान्न्वलेंनव्वाजजिच्चभवसमं-
नेचपारयिष्णुः । व्वाजिंनोव्वाजजितोव्वाजꣳसरिष्ष्यन्तोबृहस्प-
तेंर्भागमवंजिग्घ्रत ॥ ९ ॥ देवस्याहꣳसंवितुःसवेसत्त्यसंवसोबृह-
स्प्पतेंरुत्तमन्नाकꣳरुहेयम् । देवस्याहꣳसंवितुःसवेसत्त्यसवसऽइन्द्रं-
स्योत्तमन्नाकꣳरुहेयम् । देवस्याहꣳसंवितुःसवेसत्त्यप्प्रंसवसोबृह-
स्प्पतेंरुत्तमन्नाकंमरुहम् । देवस्याहꣳसंवितुःसवेसत्त्यप्प्रंसवसऽइन्द्रं-
स्योत्तमन्नाकंमरुहम् ॥ १० ॥ बृहंस्प्पतेव्वाजंञ्जयबृहस्प्पतंयेव्वाचंव्व-
दतबृहस्प्पतिंव्वाजंञ्जापयत । इन्द्रव्वाजंञ्जयेन्द्रायव्वाचंव्वदतेन्द्रंव्वा-
जंञ्जापयत ॥ ११ ॥ एषावꣳसासत्त्यासंव्वागंभूद्ययाबृहस्प्पतिंव्वाज-

मजीजपताजीजपत बृहस्पतिं वाजं वनस्पतयो विमुच्यध्वम् । ए-
षा वः सा सत्या संवागभूद्ययेन्द्रं वाजमजीजपताजीजपतेन्द्रं वाजं-
वनस्पतयो विमुच्यध्वम् ॥ १२ ॥ देवस्याहꣳ सवितुः सवे सत्य-
प्रसवसो बृहस्पतेर्वाजजितो वाजं जेषम् । वाजिनो वाजजितो-
ऽध्वन स्कभ्नुवन्तो योजना मिमानाः काष्ठां गच्छत ॥ १३ ॥ एष स्य-
वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धोऽअपिकक्षऽआसनि । क्रतुं द-
धिक्राऽअनु सꣳसनिष्यदत्पथामङ्काꣳस्यन्वापनीफणत्स्वाहा ॥ १४ ॥
उत स्मास्य द्रवतस्तुरण्यतः पर्णं न वेरनु वाति प्रगर्द्धिनः । श्येनस्ये-
व ध्रजतोऽअङ्कसं परि दधिक्राव्णः सहोर्ज्जा तरित्रतः स्वाहा ॥ १५ ॥

शन्नौभवन्तुव्वाजिनोहवेषुदेवतातामितद्द्रवऽस्वर्काः । जम्भयन्तो-
हिंव्वृकᳪरक्षाᳪसिसनेम्म्यस्स्मद्युयवन्नमीवाः ॥१६॥ ते नोऽअर्व्वन्तो
हवनश्श्रुतोहवंव्विश्श्वेश्शृण्ण्वन्तुव्वाजिनोमितद्द्रवः । सहस्रसामेध
सातासनिष्ष्यवोमहोयेधनᳪसमिथेषुजब्भ्रिरे॥१७॥ वाजेवाजेवतव्वा-
जिनोनोधनेषुव्विप्राऽअमृताऽऋतज्ञाः । अस्यमद्ध्वं÷पिबतमादय-
द्ध्वन्तृप्ताय्यातपथिभिर्देवयानैः ॥ १८ ॥ आमाव्वाजस्यप्प्रसवोजग-
म्म्यादेमेद्यावापृथिवीव्विश्वरूपे । आमागन्ताम्पितरामातराचामा-
सोमोऽअमृतत्वेनगम्म्यात् । व्वाजिनोव्वाजजितोव्वाजᳪसस्रवाᳫ-
सोबृहस्प्पतेर्ब्भागमवजिघ्घ्रतनिमृजानाः ॥ १९ ॥ आपयेस्वाहास्वाप-

येस्वाहाऽपिजायस्वाहाक्क्रतवेस्वाहाव्वसवेस्वाहाहर्प्पतयेस्वाहान्ह्रे-
मुग्धायस्वाहामुग्धायव्वैनꣳशिनायस्वाहाव्विनꣳशिनऽआन्त्यायनाय
स्वाहान्त्यायभौवनायस्वाहाभुवनस्यपतयेस्वाहाधिपतयेस्वाहा॥२०॥
आयुर्ठ्यज्ञेनंकल्पताम्प्राणोयज्ञेनंकल्पताञ्चक्षुर्ठ्यज्ञेनंकल्पताꣳश्रो-
त्रंठ्यज्ञेनंकल्पताम्पृष्ठंठ्यज्ञेनंकल्पताꣳयज्ञोयज्ञेनंकल्पताम्। प्रजाप-
तेःप्रजाऽअभूमस्वर्द्देवाऽअगन्मामृताऽअभूम ॥ २१ ॥ अस्मेवोऽअ-
स्त्विन्द्रियमस्मेनृम्णमुतक्क्रतुरस्मेव्वर्चाꣳसिसन्तुवः । नमोमा-
त्रेपृथिव्यैनमोमात्रेपृथिव्याऽइयन्तेराड्यन्तासियमनोद्ध्रुवोसिधरु-
णः । कृष्यैत्वाक्षेमायत्वारय्यैत्वापोषायत्वा ॥ २२ ॥ व्वाजस्येम-

म्प्रसवःꣳसुषुवेऽग्ग्रे सोमꣳराजानमोषधीष्ष्वप्सु । ताऽअस्म्मब्भ्यम्मधु-
मतीर्ब्भवन्तुव्वयꣳराष्ट्रेजागृयामपुरोहिताःस्वाहा ॥ २३ ॥ व्वाजस्ये-
माम्प्रसवःशिश्रियेदिवमिमाचव्विश्वाभुवनानिसम्म्राट् । अदित्स-
न्तन्दापयतिप्प्रजानन्त्सनोरयिꣳसर्व्ववीरन्नियच्छतुस्वाहा ॥ २४ ॥
व्वाजस्यनुप्प्रसवऽआबभूवेमाचव्विश्वाभुवनानिसर्व्वतः । सनेमि-
राजापरियातिव्विद्वान्प्प्रजाम्पुष्टिंव्वर्द्धयमानोऽअस्म्मेस्वाहा ॥२५॥
सोमꣳराजानमवसेऽग्ग्निमन्न्वारभामहे । आदित्यान्व्विष्णुꣳसूर्य्यम्ब्र-
ह्माणञ्चबृहस्पतिꣳस्वाहा ॥ २६ ॥ अर्य्यमणम्बृहस्पतिमिन्द्रन्दाना-
यचोदय । व्वाचंव्विष्णुꣳसरस्वतीꣳसवितारञ्चव्वाजिनꣳस्वाहा

॥ २७ ॥ अग्नेऽअच्छावदेहनःप्रतिनःसुमनाभव । प्रनोयच्छसहस्र-
जित्त्वꣳहिधनदाऽअसिस्वाहा ॥ २८ ॥ प्रनोयच्छत्वर्यमाप्रपूषाप्र-
बृहस्पतिः ॥ प्रवाग्देवीददातुनःस्वाहा ॥ २९ ॥ देवस्यत्त्वासवितुः
प्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्याम् । सरस्वत्यैवाचोयन्तु-
र्यन्त्रियेदधामिबृहस्पतेष्ट्वासाम्राज्येनाभिषिञ्चाम्यसौ ॥ ३० ॥
अग्निरेकाक्षरेणप्राणमुदजयत्तमुज्जेषमश्विनौद्व्यक्षरेणद्विपदोमनु-
ष्यानुदजयतान्तानुज्जेषंविष्णुस्त्र्यक्षरेणत्रीँल्लोकानुदजयत्तानुज्जेषꣳ
सोमश्चतुरक्षरेणचतुष्पदःपशूनुदजयत्तानुज्जेषम्पूषापञ्चाक्षरेण
॥ ३१ ॥ पूषापञ्चाक्षरेणपञ्चदिशऽउदजयत्ताऽउज्जेषꣳसविताषडक्षरे-

णषडतनुदंजयत्तानुज्जेषम्मरुतं ÷ सप्ताक्षरेणसप्तग्ग्राम्यान्पशूनुदं-
जयँस्तानुज्जेषम्बृहस्पतिरष्टाक्षरेणगायत्रीमुदंजयत्तामुज्जेषम्मित्रोन-
वाक्षरेण ॥ ३२ ॥ मित्रोनवाक्षरेणत्रिवृतꣳस्तोममुदंजयत्तमुज्जेषंव्व-
रुणोदशाक्षरेणव्विराजमुदंजयत्तामुज्जेषमिन्द्रऽएकादशाक्षरेणत्रिष्टु-
भमुदंजयत्तामुज्जेषंव्विश्श्वे देवाद्द्वादशाक्षरेणजगतीमुदंजयँस्तामु-
ज्जेषंव्वसवस्त्रयोदशाक्षरेण ॥ ३३ ॥ व्वसवस्त्रयोदशाक्षरेणत्रयोदशꣳ
स्तोममुदंजयँस्तमुज्जेषꣳरुद्द्राश्चतुर्दशाक्षरेणचतुर्दशꣳस्तोममुदंज-
यँस्तमुज्जेषमादित्याःपञ्चदशाक्षरेणपञ्चदशꣳस्तोममुदंजयँस्तमुज्जे-
षमदितिꣳषोडशाक्षरेणषोडशꣳस्तोममुदंजयत्तमुज्जेषम्प्रजापतिꣳस-

प्तदंशाक्षरेणसप्तदशꣳस्तोममुदंजयत्तमुज्जेषम् ॥ ३४ ॥ एषतेनिर्ऋ-
तेभागस्तञ्जुषस्वस्वाहाग्निनेत्रेभ्योदेवेभ्यः पुरःसद्भ्यꣳस्वाहाय-
मनेत्रेभ्योदेवेभ्योदक्षिणासद्भ्यःस्वाहाविश्वदेवनेत्रेभ्योदेवेभ्यः
पश्चात्सद्भ्यःस्वाहामित्रावरुणनेत्रेभ्योवामरुन्नेत्रेभ्योवादेवेभ्यऽ-
उत्तरासद्भ्यःस्वाहासोमनेत्रेभ्योदेवेभ्यऽउपरिसद्भ्योदुवस्वद्भ्यः
स्वाहा ॥ ३५ ॥ येदेवाऽअग्निनेत्राःपुरःसदस्तेभ्यःस्वाहायेदेवायम-
नेत्रादक्षिणासदस्तेभ्यःस्वाहायेदेवाविश्वदेवनेत्राःपश्चात्सदस्ते-
भ्यःस्वाहायेदेवामित्रावरुणनेत्रावामरुन्नेत्रावोत्तरासदस्तेभ्यःस्वा-
हायेदेवाःसोमनेत्राऽउपरिसदोदुवस्वन्तस्तेभ्यःस्वाहा ॥ ३६ ॥ अ-

ग्नेसहस्वपृतनाऽअभिमातीरपास्य । दुष्टरस्तरन्नरातीर्व्वर्च्चोधायज्ञ:
वाहसि ॥ ३७ ॥ देवस्यत्त्वासवितुः प्प्रसवेश्विनोर्ब्बाहुब्भ्यांपूष्णो-
हस्ताब्भ्याम् । उपाᳬंशोर्व्वीर्य्येणजुहोमिहतᳬरक्षᳬस्वाहारक्षसान्त्वा-
व्वधायावधिष्मरक्षोवधिष्मामुमसौहतः ॥ ३८ ॥ सवितात्त्वासवा-
नाᳬंसुवतामग्निर्ग्गृहपतीनाᳬंसोमोव्वनस्प्पतीनाम् । बृहस्प्पतिर्व्वा-
चऽइन्द्रोज्ज्यैष्ठ्यायरुद्द्रःपशुब्भ्योमित्रःसत्त्योव्वरुणोधर्म्मपतीनाम्
॥३९॥इमन्देवाऽअसपत्नᳬसुवद्ध्वम्महतेक्षत्त्रायमहतेज्ज्यैष्ठ्यायमह-
तेजानराज्ज्यायेन्द्रस्येन्द्रियाय । इमममुष्ष्यपुत्त्रममुष्ष्यैपुत्त्रमस्यैव्विशऽए-
षवोमीराजासोमोस्म्माकम्ब्राह्मणानाᳬंराजा॥४०॥ इति नवमोऽध्यायः॥

❀ अथ दशमोऽध्यायः ❀

ॐअपोदेवा मधुमतीरगृभ्णन्नूर्जस्वती राजस्वश्चितानाᳪ। याभि-
र्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीᳪ ॥ १ ॥ वृष्-
णऽऊर्मिरसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहा वृष्णऽऊर्मिरसि राष्ट्र-
दा राष्ट्रममुष्मै देहि वृषसेनोसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहा वृषसे-
नोसि राष्ट्रदा राष्ट्रममुष्मै देह्यर्थेतस्थ ॥ २ ॥ अर्थेतस्थ राष्ट्रदा-

---

इत्यत्र—अव्यवहितोऽपि (३।६६) संहितायां अकारव्यवहितोऽप्यभेरुत्तरः सिञ्चतेः सकारः षकारमापद्यते ।

राष्ट्रम्मे॑दत्तस्वाहा॒र्थेतस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तौजस्वतीस्त्थरा-
ष्ट्रदाराष्ट्रम्मेदत्तस्वाहौजस्वतीस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तापः÷
परिवाहिणीस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहापः ÷ परिवाहिणीस्त्थराष्ट्र-
दाराष्ट्रममुष्मैदत्तापाम्पतिरसिराष्ट्रदाराष्ट्रम्मे देहिस्वाहापा-
म्पतिरसिराष्ट्रदाराष्ट्रममुष्मै देह्यपाङ्गर्भोसिराष्ट्रदाराष्ट्रम्मे देहि-
स्वाहापाङ्गर्भोसिराष्ट्रदाराष्ट्रममुष्मै देहिसूर्य्यत्वचसस्त्थ ॥ ३ ॥
सूर्य्यत्वचसस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहासूर्य्यत्वचसस्त्थराष्ट्र-
दाराष्ट्रममुष्मैदत्तसूर्य्यवर्चसस्त्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहासूर्य्य-
वर्च्चसस्त्थराष्ट्रदाराष्ट्रममुष्मैदत्तमान्दास्त्थराष्ट्रदाराष्ट्रम्मेद-

त्तस्वाहामान्दास्स्थराष्ट्रदाराष्ट्रममुष्मैदत्तव्व्रजक्षितस्स्थराष्ट्रदा-
राष्ट्रम्मैदत्तस्वाहाव्व्रजक्षितस्स्थराष्ट्रदाराष्ट्रममुष्मैदत्तव्वाशास्स्थ-
राष्ट्रदाराष्ट्रम्मैदत्तस्वाहाव्वाशास्स्थराष्ट्रदाराष्ट्रममुष्मैदत्तश-
विष्ठास्स्थराष्ट्रदाराष्ट्रम्मैदत्तस्वाहाशविष्ठास्स्थराष्ट्रदाराष्ट्र-
ममुष्मैदत्तशक्करीस्स्थराष्ट्रदाराष्ट्रम्मैदत्तस्वाहाशक्करीस्स्थरा-
ष्ट्रदाराष्ट्रममुष्मैदत्तजनभृतस्स्थराष्ट्रदाराष्ट्रम्मैदत्तस्वाहाज-
नभृतस्स्थराष्ट्रदाराष्ट्रममुष्मैदत्तव्विश्वभृतस्स्थराष्ट्रदाराष्ट्र-
म्मैदत्तस्वाहाव्विश्वभृतस्स्थराष्ट्रदाराष्ट्रममुष्मैदत्तापं÷ स्वरा-
जस्स्थराष्ट्रदाराष्ट्रममुष्मैदत्त । मधुमतीर्म्मधुमतीभिःपृच्च्यन्ता-

स्मर्हिक्षत्त्रङ्क्षत्त्रियायव्वन्न्वानाऽअनाधृष्टाḥसीदतसहौजसोमहित्त्र-
ङ्क्षत्त्रियायदधतीः ॥ ४ ॥ [शतम् ४००] सोमस्यत्त्विषिर-
सितवैवमेत्त्विषिर्भूयात् । अग्नयेस्वाहासोमायस्वाहासवित्त्रेस्वा-
हासरस्वत्त्यैस्वाहापूष्णेस्वाहाबृहस्पतयेस्वाहेन्द्रायस्वाहाघोषाय-
स्वाहाश्श्लोकायस्वाहाꣳशायस्वाहाभगायस्वाहार्य्यम्म्णेस्वाहा
॥ ५ ॥ पवित्त्रेस्त्थोव्वैष्ष्णव्यौसवितुर्व्वः प्प्रसवऽउत्पुनाम्म्यच्छिद्द्रे-
णपवित्त्रेणसूर्य्यस्यरश्मिभिः । अनिभृष्टमसिव्वाचोबन्धुस्तपो-
जाःसोमस्यदात्त्रमसिस्वाहाराजस्वः ॥ ६ ॥ सधमादोद्द्युम्म्निनी-
रापऽएताऽअनाधृष्टाऽअपस्युोव्वसानाः । पस्त्यासुचक्क्रेव्वरुणःस-

घस्त्थंमपाᳬशिशुंम्मातृतंमास्वन्तः ॥ ७ ॥ क्षत्त्रस्योल्ल्वंमसिक्षत्त्रस्यंजराय्व्वंसिक्षत्त्रस्ययोनिरसिक्षत्त्रस्यनाभिरसीन्द्रस्यव्वार्त्रघ्घ्नमसि मित्त्रस्यासिव्वरुंणस्यासित्वयायंव्वृत्त्रंव्वंधेत् । दवासिरुजासिक्षुमासि । पातैनम्प्राञ्चंम्पातैनंम्प्रत्यञ्चंम्पातैनंन्तिर्य्यञ्चंन्दिग्भ्यःपात ॥८॥ आविर्म्मर्य्याऽआवित्तोऽअग्निर्गृहपतिरावित्तऽइन्द्रोव्वृद्धश्रंवाऽआवित्तौमित्रावरुंणौधृतव्व्रतावावित्तंःपूषाव्विश्श्ववेदाऽआवित्तेद्यावापृथिवीव्विश्श्वशंम्भुवावावित्तादिंतिरुरुशंर्म्मा ॥ ९ ॥ अवेष्ठादन्दशूकाःप्राचीमारोंहगायत्त्रीत्त्वावतुरथन्तरᳬसामंत्त्रिवृत्स्तोमोव्वसन्तऽऋतुर्ब्ब्रह्मद्रविंणन्दक्षिणामारोंह ॥ १० ॥ दक्षिंणामारों-

हत्त्रिष्टुप्त्वावतुबृहत्सामंपञ्चदशस्तोमोग्ग्रीष्मऽऋतुःक्षत्रन्द्रविं-
णम्प्रतीचीमारोह ॥ ११ ॥ प्रतीचीमारोहजगतीत्वावतुव्वैरूपꣳ-
सामंसप्तदशस्तोमोव्वर्षाऽऋतुर्व्विड्द्रविणमुदीचीमारोह ॥ १२ ॥
उदीचीमारोहानुष्टुप्त्वावतुव्वैराजꣳसामैकविꣳशस्तोमः शरदृतुः
फलन्द्रविणमूर्द्ध्वामारोह ॥ १३ ॥ ऊर्द्ध्वामारोहपङ्क्तिस्त्वावतु-
शाक्क्वररैवतेसामंनीत्रिणवत्रयस्त्रिꣳशौस्तोमौ हेमन्तशिशिरावृतूव्व-
र्च्चोद्द्रविणम्प्रत्यंस्तन्नमुचेःशिरः ॥ १४ ॥ सोमस्यत्त्विषिरसितवं-
वमेत्त्विषिर्भूयात् । मृत्योःपाह्योजोसिसहोस्यमृतमसि ॥ १५ ॥ हिर-
ण्ण्यरूपाऽउषसोव्विरोकऽउभाविन्द्राऽउदिथःसूर्यश्च । आरोहतंव्व-

रुणमित्रगर्तन्ततंश्चक्षाथामदितिन्दितिश्चमित्रोसिव्वरुणोसि ॥ १६ ॥
सोमंस्यत्त्वाद्युम्नेनाभिषिञ्चाम्यग्ग्नेर्ब्भ्राजंसासूर्य्यंस्यव्वर्च्चसेन्द्रंस्ये-
न्द्रियेणं। क्षत्राणाङ्क्षत्रपंतिरेद्ध्यतिदिद्द्युन्न्पाहि ॥ १७॥ इमन्देवाऽअ-
सपत्क्न्ँसुवद्ध्वम्महतेक्षत्रायंमहतेज्ज्यैष्ठ्यायमहतेजानंराज्ज्यायें-
न्द्रस्येन्द्रियायं। इमममुष्ष्यंपुत्रममुष्ष्यैपुत्रमस्यैव्विशऽएषवोमीराजा-
सोमोस्म्माकंब्ब्राह्मणानाँराजा ॥ १८ ॥ प्रपर्व्वतस्यव्वृषभस्यंपृष्ठा-
न्नावंश्चरन्तिस्वसिचंऽइयानाः । ताऽआवंवृत्रन्नधरागुदंक्ताऽअहिं-
म्बुध्न्यमनुरीयंमाणाः । विष्ष्णोर्व्विक्क्रमंणमसिव्विष्ष्णोर्व्विक्क्रान्त-
मसिव्विष्ष्णोःक्क्रान्तमंसि ॥ १९ ॥ प्रजापतेनत्त्वदेतान्न्यन्न्योव्वि-

श्वारूपाणिपरिताबभूव । यत्कामास्तेजुहुमस्तन्नोऽअस्त्वयममुष्य-
पितासावस्यपिताव्वयꣳस्यामपतयोरयीणाꣳस्वाहा । रुद्रयत्ते-
क्रिविपरन्नामतस्मिन्हुतमस्यमेष्टमसिस्वाहा ॥ २० ॥ इन्द्रस्यव्व-
ज्रोसिमित्रावरुणयोस्त्वाप्रशास्त्रोःप्रशिषायुनज्मि । अव्व्यथायै-
त्वास्वधायैत्वारिष्टोऽअर्जुनोमरुताम्प्रसवेनजयापाममनसासमिन्द्रि-
येण ॥ २१ ॥ मातऽइन्द्रतेव्वयन्तुराषाडयुक्तासोऽअब्ब्रह्मताविद-
साम । तिष्ठारथमधियंव्वज्रहस्तारश्मीन्देवयमसेस्वश्वान् ॥२२॥
अग्नयेगृहपतयेस्वाहासोमायव्वनस्पतयेस्वाहामरुतामोजसेस्वाहेन्द्र-
स्येन्द्रियायस्वाहा । पृथिविमातम्मामाहिꣳसीम्मोऽअहन्त्वाम् ॥२३॥

हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद्वर-
सदृतसद्व्योमसदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥२४॥
इयदस्यायुरस्यायुर्म्मयि धेहि युङ्ङसि वर्च्चोऽसि वर्च्चो मयि धेह्यूर्ग्गस्यू-
र्ज्जम्मयि धेहि। इन्द्रस्य वाम्वीर्यकृतो बाहूऽअभ्युपावहरामि ॥ २५ ॥
स्योनासि सुषदासि क्षत्रस्य योनिरसि। स्योनामासीद सुषदामासीद क्ष-
त्रस्य योनिमासीद ॥ २६ ॥ निषसाद धृतव्रतो वरुणः पस्त्यास्वा। सा-
म्म्राज्ज्याय सुक्रतुः ॥ २७ ॥ अभिभूरस्येतास्ते पञ्च दिशः कल्पन्ता-
म्ब्रह्मँस्त्वम्ब्रह्मासि सवितासि सत्यप्रसवो वरुणोसि सत्यौजाऽइन्द्रो-
सि विशौजा रुद्रोसि सुशेवः। बहुकार श्रेयस्कर भूयस्करेन्द्रस्य व-

ज्ज्योंसितेनमेरद्ध्य ॥ २८ ॥ अग्निःपृथुर्द्धर्म्मणस्पतिज्जुषाणोऽअग्निःपृ-
थुर्द्धर्म्मणस्पतिराज्ज्यस्यव्वेतुस्वाहास्वाहाकृताःसूर्य्यस्यरश्मिभिं-
र्यतद्ध्वःसजातानाम्मद्ध्यमेष्ठ्याय ॥ २९ ॥ सवित्राप्प्रसवित्त्रा-
सरस्वत्याव्वाचात्वष्ट्रारूपैःपूष्णापशुभिरिन्द्रेणास्म्मेबृहस्प्पतिना-
ब्रह्मणाव्वरुणेनौजसाग्निनातेजसासोमेनराज्ञाव्विष्णुनादशम्म्यादे-
वतयाप्प्रसूतःप्रसर्प्पामि ॥ ३० ॥ अश्विभ्भ्याम्पच्च्यस्वसरस्वत्यैप-
च्च्यस्वेन्द्रायसुत्राम्म्णेपच्च्यस्व । व्वायुःपूतःपवित्त्रेणप्प्रत्यङ्क्सो-
मोऽअतिस्रुतः । इन्द्रस्ययुज्ज्यःसखा ॥ ३१ ॥ कुविदङ्गयवमन्तोयवं-

श्चिद्यथादान्त्यनुपूर्वंवियूयं । इहेहैषाङ्कृणुहिभोजनानियेबर्हिषो-
नमऽउक्तिंय्यजन्ति । उपयामगृहीतोस्यश्विभ्यान्त्वासरस्वत्यै-
त्वेन्द्रायत्वासुत्राम्णे ॥ ३२ ॥ युवᳪसुराममश्विनानमुचावासुरे-
सचा । विपिपानाशुभस्पतीऽइन्द्रङ्कर्मस्वावतम् ॥ ३३ ॥ पुत्रमि-
वपितरावश्विनोभेन्द्रावथुः काव्यैर्दᳪसनाभिः । यत्सुरामंव्यपिबः
शचीभिः सरस्वतीत्त्वामघवन्नभिष्णक् ॥ ३४ ॥ इति दशमोऽध्यायः ॥

१—शाखायां वानरा यद्वन्निपतन्त्युत्पतन्ति च । एवं वर्णाः प्रयोक्तव्याः 'इहेहैषां' निदर्शनम् ॥ (याज्ञ० शि० श्लो० ६१)

❀ अथ एकादशोऽध्यायः ❀

ॐ युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियः। अग्नेर्ज्योतिर्निचाय्य पृथिव्या अध्याभरत् ॥ १ ॥ युक्तेन मनसा वयं देवस्य सवितुः सवे। स्वर्ग्याय शक्त्या ॥ २ ॥ युक्त्वाय सविता देवान्त्स्वर्यतो धि-

---

१—'यथा पुत्रवती स्नेहाच्चुम्बते निजमौरसम्। एवं वर्णाः प्रयोक्तव्या 'युञ्जान' इति निदर्शनम्।' (या. शि. श्लो. ६२) अर्थात्—यथा मातुः बालकमुखचुम्बने मुखाकृतिः वर्तुला भवति। तथा चवर्गपञ्चमस्य ञकारस्योच्चारणेऽपि वर्तुलविवृतमुखाऽऽकृत्या सुस्पृष्टतया कर्तव्या इत्यर्थः।

यादिवम्। बृहज्ज्योतिः करिष्यतः सविता प्रसुवाति तान् ॥३॥ युञ्जते मनऽउत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः। विहो-

१—"ज्योतिश्च्यवनः श्येनः श्यामᳪ श्यामाकाः श्येतोज्ज्येष्ठोज्ज्योज्याच्छूयति" एते संयोगा एकयकारा भवन्ति। (शु० य० प्रा० सू० १५३ अ० ४) इति एवं प्रचुराण्येत्रोदाहरणानि संहितायां द्रष्टव्यानि। यथा—दुश्च्यवनः १७।३९) इन्दुर्दक्षः (१८।५३) श्यामाकाश्चमे (१८।१२) श्यामंचमे (१८।१३) श्येतोमलहविः (परशाखीयोदाहरणम्) 'यो ह वै ज्येष्ठ्यं च श्रैष्ठ्यं च' (इत्यपि शाखान्तरीयम्) 'ज्योक्तेसन्दृशिजीव्यासम्' (३६।१९) 'ज्याऽइयᳪ समने' (२९।४०) 'कस्त्वाऽऽच्छ्यति' (२३।३९) इदमुदाहरणमिहविहितम्। एकमेव अन्यानुपलंभात्। संहितायान्तु प्रचुराणि कथितानि।

ज्ञाद्धेव्वयुनाविदेकऽइन्न्मही देवस्यंसवितुःपरिष्टुतिः ॥४॥ युजेवाम्ब्र-
ह्मपूर्व्यन्नमोभिर्व्विश्श्लोकऽएतुपथ्येवसूरेः । शृण्वन्तुव्विश्श्वेऽअमृ-
तस्यपुत्राऽआयेधामानिदिव्व्यानितस्त्थुः ॥ ५ ॥ यस्यंप्रयाणमन्न्व-
न्न्यऽइद्धयुर्द्देवादेवस्यमहिमानमोजसा । यःपार्थिवानिव्विममेसऽए-
तशोरजाᳬसिदेवःसवितामहित्वना ॥ ६ ॥ देवसवितःप्प्रसुवयज्ञम्प्र-
सुवयज्ञपतिम्भगाय । दिव्व्योगन्धर्व्वःकेतपूःकेतन्नःपुनातुव्वाचस्प-
तिर्व्वाचन्नःस्वदतु ॥ ७ ॥ इमन्नोदेवसवितर्य्यज्ञम्प्रणयदेवाव्व्यᳬस-
खिविदᳬसत्राजितन्धनजितᳬस्वर्जितम् । ऋचास्तोमᳬसमर्द्धयं-
गायत्रेणरथन्तरम्बृहद्गायत्रवर्त्तनिस्वाहा ॥ ८ ॥ देवस्यत्वासवितुः

प्प्रसवेऽश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम्। आददेगायत्रेणच्छन्द-
साङ्गिरस्वत्पृथिव्याः सधस्थादग्निम्पुरीष्यमङ्गिरस्वदाभरत्त्रैष्टुभेन-
च्छन्दसाङ्गिरस्वत् ॥ ९ ॥ अब्भ्रिरसिनार्य्यसित्त्वयाव्वयमग्निꣳ श-
केमखनितुꣳसधस्थऽआ। जागतेनच्छन्दसाङ्गिरस्वत् ॥ १० ॥ हस्तऽ-
आधायसविताबिब्भ्रदब्भ्रिꣳहिरण्ण्ययीम्। अग्नेर्ज्ज्योतिर्न्निचाय्य-
पृथिव्याऽअध्याभरदानुष्टुभेनच्छन्दसाङ्गिरस्वत् ॥ ११ ॥ प्रतूर्त्तंव्वा
जिन्नाद्द्रववरिष्ठामनुसंव्वतम्। दिवितेजन्मपरममन्तरिक्षेतवना-
भिः पृथिव्यामधियोनिरित् ॥ १२ ॥ युञ्जाथाꣳरासभंयुवम-
स्मिन्यामेव्वृषण्ण्वसू। अग्निम्भरन्तमस्मयुम् ॥ १३ ॥ योगे-

योगेतवस्तरं॑व्वाजे॑वाजेहवामहे । सखाय॒ऽइन्द्र॑मू॒तये॑ ॥ १४ ॥ प्रतूर्व्वन्ने-
ह्य॒वक्रामन्नशंस्तीरुद्द्रस्यगाणंपत्यम्मयोभूरेहि॑ । उ॒र्व्वन्तरिक्षंव्वीहि-
स्वस्तिग॑व्यूतिरभ॑यानिकृण्वन्पूष्णासयुजासह ॥१५॥ पृथिव्व्याःस-
धस्त्थाद॒ग्निम्पुरी॒ष्यमङ्गिरस्वदाभ॑राग्निम्पुरी॒ष्यमङ्गिरस्वदच्छेमो-
ग्निम्पुरी॒ष्यमङ्गिरस्वद्भ॑रिष्यामः ॥ १६ ॥ अन्न्वग्निरुषसामग्र॑म-
क्ख्यद॒न्न्वहानिप्प्रथमोजातवे॑दाः ॥ अनुसूर्य्यस्यपुरुत्राचरश्मीननु-
द्द्यावापृथिवीऽआत॑तंथ ॥१७॥ आगत्त्यव्वाज्ज्यद्ध्वानःसर्व्वामृधो-
विधूनुते ॥ अग्निःसधस्त्थेमहतिचक्षुषानिचिकीषते ॥ १८ ॥ आ-
क्रम्यव्वाजिन्पृथिवीमग्निमिच्छरुचात्त्वम् । भूम्याव्वृत्त्वायनोब्ब्रू-

हिषतꣳखनेमतंव्वयम् ॥ १६ ॥ द्यौस्तेपृष्ठम्पृथिवीसधस्थमात्मा-
न्तरिक्षꣳसमुद्द्रोयोनिः । व्विक्ख्यायचक्षुषात्वमभितिष्ठपृतन्न्य-
तः ॥ २० ॥ उत्क्रामममहतेसौभगायास्म्मादास्थानाद्द्रविणोदाव्वा-
जिन् । व्वयꣳस्यामसुमतौपृथिव्व्याऽअग्निङ्खनन्तऽउपस्थेअस्याः
॥ २१ ॥ उदक्क्रमीद्द्रविणोदाव्वाज्ज्यर्व्वाकꣳसुलोकꣳसुकृतम्पृथि-
व्व्याम् । ततः खनेमसुप्प्रतीकमग्निꣳस्वोरुहाणाऽअधिनाकमुत्तमम्
॥ २२ ॥ आत्त्वाजिघर्म्मिमनसाघृतेनप्प्रतिक्षियन्तम्भुवनानिव्विश्श्वा ।
पृथुन्तिरश्चाव्वयसाबृहन्तंव्व्यचिष्ठमन्नैरभसन्दृशानम् ॥ २३ ॥ आ-
विश्श्वतः प्प्रत्यञ्चञ्जिघर्म्म्यरक्षसामनसातज्जुषेत । मर्यश्रीस्पृहः

षद्द्वर्णोऽअग्ग्निर्न्नाभिमृशेतन्न्वाजब्भुँराणᳩं ॥ २४ ॥ परिवाजपतिᳩं
कविरग्निर्हव्यान्न्यक्क्रमीत् । दधद्द्रत्नानि दाशुषे ॥ २५ ॥ परित्वा-
ग्ग्नेपुरँव्वयंव्विप्प्रᳩं सहस्यधीमहि । धृषद्द्वर्णन्दिवेदिवेहन्तारम्भङ्गुरा-
वताम् ॥ २६ ॥ त्वमग्ग्नेद्द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्म्मन-
स्प्परि । त्वंव्वनेब्भ्यस्त्वमोषधीब्भ्यस्त्वन्नृणान्नृपते जायसेशुचिः
॥ २७ ॥ देवस्यत्त्वासवितुःप्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्या-
म् । पृथिव्व्याःसधस्त्थादग्ग्निम्पुरीष्ष्यमङ्गिरस्वत्त्खनामि । ज्योति-
ष्मन्तन्त्वाग्ग्नेसुप्प्रतीकमजस्रेणभानुनादीद्द्यतम् । शिवम्प्रजाब्भ्यो-
हिᳩं सन्तम्पृथिव्व्याःसधस्त्थादग्ग्निम्पुरीष्ष्यमङ्गिरस्वत्त्खनामᳩं ॥ २८ ॥

अपाम्पृष्ठमंसि योनिंरग्ग्नेः समुद्रमभितः पिन्न्वंमानम्। व्वर्द्धमानो-
महाँ २ऽआ च पुष्क्करे दिवो मात्र्रंया व्वरिम्णा प्रंथस्व॥२९॥ शर्म्मं च स्त्थो
व्वर्म्मं च स्त्थोच्छिद्द्रे वहुले ऽउभे। व्यचंस्वती संव्वंसाथां भृतमग्निम्पु-
रीष्यम् ॥ ३० ॥ संव्वंसाथाᳬं स्वर्व्विदा समीची ऽउरंसा त्मनां। अ-
ग्निमन्तर्ब्भंरिष्यन्ती ज्ज्योतिंष्मन्तमजंस्रमित् ॥ ३१ ॥ पुरीष्योसि
व्विश्वभंरा ऽअथंर्व्वा त्त्वा प्रथमो निरंमन्थदग्ग्ने ॥ त्त्वामंग्ग्ने पुष्क्करांद-
द्ध्यथंर्व्वा निरंमन्थत। मूर्ध्नो व्विश्श्वंस्य व्वाघतंः ॥ ३२ ॥ तमुंत्त्वा
दद्ध्यङ्ङृषिंः पुत्र ऽईधे ऽअथंर्व्वणः। व्वृत्रहणंम्पुरन्दरम् ॥ ३३ ॥
तमुंत्त्वा पाथ्यो व्वृषा समींधे दस्युहन्तंमम्। धनञ्जयᳬं रणेरणे ॥ ३४ ॥

सीदँहोतःस्वऽउँलोकेचिकित्वान्त्सादयायज्ञ सुकृतस्ययोनौ । देवा-
वीर्द्देवान्न्हविषायजास्यग्ग्नेबृहद्यजमानेव्वयोधाः ॥ ३५ ॥ निहोता-
होतृषदनेव्विदानस्त्वेषोदीदिवाँऽअसदत्सुदक्षः । अदब्धव्रतप्प्र-
मतिर्व्वसिष्ठःसहस्रम्भरःशुचिजिह्वोऽअग्ग्निः ॥ ३६ ॥ सःसीद-
स्वमहाँऽअसिशोचस्वदेववीतमः । व्विधूममग्ग्नेऽअरुषम्मियेद्ध्यसृज-
प्प्रशस्तदर्शतम् ॥३७॥ अपोदेवीरुपसृजमधुमतीरयक्ष्मायप्रजाब्भ्यः ।
तासामास्थानादुज्जिहतामोषधयःसुपिप्पलाः ॥ ३८ ॥ सन्तेव्वायु-
र्म्मातरिश्श्वादधातूत्तानायाहृदयंय्यद्विकस्तम् । योदेवानाञ्चरसि-
प्प्राणथेनकस्मैदेवव्वषडस्तुतुब्भ्यम् ॥ ३९ ॥ सुजातोज्ज्योतिषासह-

शर्म्मंव्वरूथमासंदत्स्व ः । व्वासोंऽअग्ग्नेव्विश्श्वरूंपᳪंसंव्व्यंयस्वव्वि-
भावसो ॥ ४० ॥ उर्दुतिष्ठस्वद्ध्वरावानोदेव्व्याधिया । दृशेचंभासा-
बृहतासुंशुक्क्वनिंराग्ग्नेयाहिसुशस्तिभिंः ॥ ४१ ॥ ऊर्द्ध्वऽऊषुणंऽऊ-
तयेतिष्ठांदेवोनसंविता । ऊर्द्ध्वोव्वाजंस्यसनिंतायदञ्जिभिंर्व्वाघदिंद्भ-
र्व्विह्व्वयामहे ॥ ४२ ॥ सजातोगर्ब्भोऽअसिरोदंस्योरग्ग्नेचारुर्व्विभृंत-
ऽओषंधीषु । चित्रᳪंशिशुंᳪंपरितमाᳪंस्यक्तून्प्रमातृब्भ्योऽअधिकनिं-
क्क्रदद्गाᳪं ॥ ४३ ॥ स्थिरोभंवव्वीड्वङ्गऽआशुर्भंवव्वाज्ज्यर्व्वन् । पृ-
थुर्ब्भंवसुषदस्त्वमग्ग्नेᳪंपुरीषवाहंणᳪं ॥ ४४ ॥ शिवोभंवप्प्रजाब्भ्योमा-
नुंषीब्भ्यस्त्वमंङ्गिरᳪं । माद्यावापृथिवीऽअभिशोंचीर्म्मान्तरिंक्षम्मा-

व्वनस्पतीन् ॥ ४५ ॥ प्रैतुंव्वाजीकनिक्क्रदन्नानदद्रासभः पत्वा ।
भरन्नग्निम्पुरीष्ष्यम्मापाद्यायुषः पुरा । व्वृषाग्निंव्वृषणम्भरन्नपाङ्ग-
र्ब्भꣳ समुद्रियम् । अग्नऽआयाहिव्वीतये ॥ ४६ ॥ ऋतꣳ सत्यमृतꣳ स-
त्यमग्निम्पुरीष्ष्यमङ्गिरस्वद्भरामः । ओषधयः प्रतिमोदद्ध्वमग्निमे-
तꣳ शिवमायन्तमब्भ्यत्रयुष्ष्माः । व्यस्यन्विश्वाऽअनिराऽअमीवा-
निषीदन्नोऽअपदुर्म्मतिञ्जहि ॥ ४७ ॥ ओषधयः प्रतिगृब्भ्णीतपुष्ष्पव-
तीः सुपिप्पलाः । अयंव्वोगर्ब्भऽऋत्त्वियः प्प्रत्नꣳ सधस्थमासदत्
॥ ४८ ॥ व्विपाजसापृथुनाशोशुचानोबाधस्वद्विषोरक्षसोऽअमीवाः ।
सुशर्म्मणोबृहतः शर्म्मणिस्यामग्नेरहꣳ सुहवस्यप्प्रणीतौ ॥ ४९ ॥ आपो-

हिष्ठामयोभुवस्तानऽऊर्जेदधातन। महेरणायचक्षसे ॥ ५० ॥ योवः
शिवतमोरसस्तस्यभाजयतेहनः । उशतीरिवमातरः ॥ ५१ ॥
तस्माऽअरङ्गमामवोयस्यक्षयायजिन्वथ। आपोजनयथाचनः ॥५२॥
मित्त्रः सꣳसृज्ज्यपृथिवीम्भूमिञ्चज्ज्योतिषासह । सुजातञ्जातवेद-
समयक्ष्मायत्त्वासꣳसृजामिप्रजाब्भ्यः ॥ ५३ ॥ रुद्द्राः सꣳसृज्ज्य
पृथिवीम्बृहज्ज्योतिꣳसमीधिरे । तेषाम्भानुरजस्रऽइच्छुक्क्रोदेवेषु
रोचते ॥ ५४ ॥ सꣳसृष्टांव्वसुभीरुद्द्रैर्द्धीरैꣳकर्म्मण्ण्याम्मृदम्। हस्ता-
ब्भ्याम्मृद्द्वीङ्कृत्त्वासिनीवालीकृणोतुताम् ॥५५॥ सिनीवालीसुकप-
र्हासुकुरीरास्वौपशा। सातुभ्यमदितेमह्योखान्दधातुहस्तयोः ॥५६॥

उषाडक्कृणोतुशक्त्त्याबाहुभ्यामदितिर्द्धिया । मातापुत्रंयथोपस्त्थे साग्निम्बिभर्त्तुगर्ब्भऽआ । मखस्यशिरोसि ॥ ५७ ॥ व्वसवस्त्वाकृण्वन्तुगायत्त्रेणच्छन्दसाङ्गिरस्वद्ध्रुवासिपृथिव्यसिधारयामयिप्रजाᳬंरायस्प्पोषङ्गौपत्त्यᳬंसुवीर्य्यᳬंसजातान्यजमानायरुद्द्रास्त्वाकृण्वन्तुत्त्रैष्टुभेनच्छन्दसाङ्गिरस्वद्ध्रुवास्यन्तरिक्षमसिधारयामयिप्रजाᳬंरायस्प्पोषङ्गौपत्त्यᳬंसुवीर्य्यᳬंसजातान्यजमानायादित्त्यास्त्वाकृण्वन्तुजागतेनच्छन्दसाङ्गिरस्वद्ध्रुवासिद्यौरसिधारयामयिप्रजाᳬंरायस्प्पोषङ्गौपत्त्यᳬंसुवीर्य्यᳬंसजातान्यजमानायविश्श्वेत्त्वादेवाव्वैश्श्वानराऽआकृण्वन्त्वानुष्टुभेनच्छन्दसाङ्गिरस्वद्ध्रुवासिदिशो

सिंधारयामयिप्रजाᳬं रायस्पोषङ्गौपत्यᳬं सुवीर्यᳬं सजातान्यजमा-
नाय ॥ ५८ ॥ अदित्यैरास्नास्यदितिष्टे बिलङ्गृभ्णातु । कृत्वायसाम-
हीमुखाम्मृन्मयीं योनिमग्नये । पुत्रेभ्यः प्रायच्छददितिः श्रपयानिति
॥ ५९ ॥ वसवस्त्वाधूपयन्तुगायत्रेणच्छन्दसाङ्गिरस्वद्रुद्रास्त्वाधू-
पयन्तुत्त्रैष्टुभेनच्छन्दसाङ्गिरस्वदादित्यास्त्वाधूपयन्तुजागतेनच्छन्द-
साङ्गिरस्वद्विश्वेत्वादेवावैश्वानराधूपयन्त्वानुष्टुभेनच्छन्दसाङ्गि-
रस्वदिन्द्रस्त्वाधूपयतुव्वरुणस्त्वाधूपयतुव्विष्णुस्त्वाधूपयतु ॥ ६० ॥
अदितिष्ट्वादेवीव्विश्वदेव्यावतीपृथिव्याः सधस्थेऽअङ्गिरस्वत्खन-
त्ववटदेवानान्त्वापत्नीर्देवीर्विश्वदेव्यावतीᳬं पृथिव्याः सधस्थेऽ-

अङ्गिरस्वद्दधतूखेधिषणास्त्वादेवीर्व्विश्श्वदेव्व्यावतीःपृथिव्व्याःसध-
स्त्थेऽअङ्गिरस्वदभीन्धतामुखेव्वरूत्त्रीष्ट्वादेवीर्व्विश्श्वदेव्व्यावतीःपृथि-
व्व्याःसधस्त्थेऽअङ्गिरस्वच्छ्रपयन्तूखेऽग्नास्त्वादेवीर्व्विश्श्वदेव्व्यावतीः
पृथिव्व्याःसधस्त्थेऽअङ्गिरस्वत्पचन्तूखेजनयस्त्वाच्छिन्नपत्त्रादेवीर्व्वि-
श्श्वदेव्व्यावतीःपृथिव्व्याःसधस्त्थेऽअङ्गिरस्वत्पचन्तूखे ॥ ६१ ॥ मि-
त्त्रस्यचर्षणीधृतोवोदेवस्यसानसि । द्युम्म्नञ्चित्त्रश्श्रवस्तमम् ॥६२॥
देवस्त्वासवितोद्द्वपतुसुपाणिःस्वङ्गुरिःसुबाहुरुतशक्त्तया । अव्व्य-
थमानापृथिव्व्यामाशादिशऽआपृण ॥ ६३ ॥ उत्थायबृहतीभवोदुत्ति-
ष्ठद्ध्रुवात्त्वम् । मित्त्रैतान्तऽउखाम्परिददाम्म्यभित्त्याऽएषामाभेदि

॥ ६४ ॥ व्वसवस्त्वाच्छृन्दन्तुगायत्रेणच्छन्दसाङ्गिरस्वद्रुद्रास्त्वा-
च्छृन्दन्तुत्रैष्टुभेनच्छन्दसाङ्गिरस्वदादित्यास्त्वाच्छृन्दन्तुजागतेनच्छ-
न्दसाङ्गिरस्वद्विश्वेत्वादेवाव्वैश्वानराऽआच्छृन्दन्त्वानुष्टुभेनच्छ-
न्दसाङ्गिरस्वत् ॥६५॥ आकूतिमग्निम्प्रयुजᳪस्वाहामनोमेधामग्निम्प्र-
युजᳪस्वाहाचित्तंविज्ञातमग्निम्प्रयुजᳪस्वाहाव्वाचोविधृतिमग्नि-
म्प्रयुजᳪस्वाहाप्रजापतयेमनवेस्वाहाग्नयेव्वैश्वानरायस्वाहा ॥६६॥
व्विश्वोदेवस्यनेतुर्मर्तोव्वुरीतसख्यम्। व्विश्वोरायऽइषुध्यतिद्यु-
म्नंव्वृणीतपुष्यसेस्वाहा ॥६७॥ मासुभित्थामासुरिषोम्बधृष्णुव्वीर-
यस्वसु। अग्निश्चेदङ्करिष्यथः ॥६८॥ दृᳪहस्वदेविपृथिविस्वस्तयऽ-

आसुरीमायास्वधयाकृतासि । जुष्टन्देवेभ्यऽइदमस्तुहव्यमरिष्टात्व-
मुदिहियज्ञेऽअस्मिन् ॥ ६९ ॥ दृवन्नःसर्पिरासुतिःप्रत्नोहोतावरे-
ण्यः । सहसस्पुत्रोऽअद्भुतः ॥७०॥ [शतम् ५००] परस्याऽअधिसंव्व-
तोवराँ२ऽअभ्यातर । यत्राहमस्मितॉं२ऽअव ॥ ७१ ॥ परमस्याःपरा-
वतोरोहिदश्वऽइहागहि । पुरीष्यः पुरुप्रियोग्नेत्वन्तरामृधः
॥ ७२ ॥ यदग्नेकानिकानिचिदातेदारूणिदध्मसि । सर्व्वन्तदस्तु-
तेघृतन्तज्जुषस्वयविष्ठ्य ॥ ७३ ॥ यदत्त्युपजिह्विकायद्वम्रोऽअति-
सर्प्पति । सर्व्वन्तदस्तुतेघृतन्तज्जुषस्वयविष्ठ्य ॥ ७४ ॥ अहरहर-
प्प्रयावम्भरन्तोश्वायेवतिष्ठतेघासमस्मै । रायस्पोषेणसमिषाम-

दन्तोग्ग्नेमातेप्प्रतिविशारिषाम ॥ ७५ ॥ नाभापृथिव्व्याः समिधानेऽअ-
ग्ग्नौरायस्प्पोषायबृहतेहवामहे । इरम्मदम्बृहदुक्क्थंयजत्रञ्जेतार-
मग्ग्निम्पृतनासुसासहिम् ॥ ७६ ॥ याःसेनाऽअभीत्त्वरीराव्व्याधि-
नीरुगणाऽउत । येस्तेनायेचतस्करास्ताँस्तेऽअग्ग्नेपिदधाम्म्यास्ये
॥ ७७ ॥ दꣳष्ट्राब्भ्याम्मलिम्म्लूञ्जम्भ्यैस्तस्कराँ२उत । हनुब्भ्याꣳ
स्तेनान्भगवस्ताँस्त्वङ्खादसुखादितान् ॥ ७८ ॥ येजनेषुमलिम्म्लव-
स्तेनासस्तस्कराव्वने । येकक्षेष्व्वघायवस्ताँस्तेदधामिजम्भयोः ॥ ७९ ॥
योऽअस्म्मब्भ्यमरातीयाद्यश्चनोद्द्वेषतेजनः । निन्दाद्योऽअस्म्मा-
न्धिप्प्साच्चसर्व्वन्तम्मस्म्मसाकुरु ॥ ८० ॥ सꣳशितम्मेब्रह्मसꣳशि-

तंव्वीर्य्यम्बलम्। सछंशितङ्क्षत्रञ्जिष्णुयस्याहमस्मिपुरोहितः ॥८१॥
उदेषाम्बाहूऽअतिरमुद्वर्च्चोऽअथोबलम् । क्षिणोमिब्ब्रह्मणामित्रानुन्नयामिस्वाँ२ऽअहम् ॥ ८२ ॥ अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणः । प्रप्प्रदातारन्तारिषऽऊर्ज्जन्नोधेहिद्विपदेचतुष्पदे ॥ ८३ ॥
इति संहितायां एकादशोऽध्यायः ॥

❀ अथ द्वादशोऽध्यायः ❀

ॐ दृशानोरुक्कमऽउर्व्याव्व्यद्यौद्दुर्म्मर्षमायुः श्रियेरुचानः । अग्निरमृतोऽअभवद्वयोभिर्यदेनन्द्यौरजनयत्सुरेताः ॥ १ ॥

नक्तोषासासमनसाविरूपेधापयेतेशिशुमेकꣳसमीची । द्यावा-
क्षामारुक्मोऽअन्तर्विभातिदेवाऽअग्निन्धारयन्द्रविणोदाः ॥ २ ॥
विश्वारूपाणिप्प्रतिमुञ्चतेकविःप्प्रासावीद्भद्रन्द्विपदेचतुष्पदे ॥
विनाकमख्यत्सवितावरेण्योनुप्प्रयाणमुषसोविराजति ॥ ३ ॥
सुपर्णोसिगरुत्माँस्त्रिवृत्तेशिरोगायत्रञ्चक्षुर्बृहद्रथन्तरेपक्षौ । स्तोम-
ऽआत्माच्छन्दाꣳस्यङ्गानियजूꣳषिनाम । सामतेतनूर्वामदेव्यंय-
ज्ञायज्ञियम्पुच्छन्धिष्ण्याःशफाः । सुपर्णोसिगरुत्मान्दिवङ्गच्छस्वः
पत ॥ ४ ॥ विष्णोःक्रमोसिसपत्नहागायत्रञ्छन्दऽआरोहपृ-
थिवीमनुविक्रमस्वविष्णोःक्रमोस्यभिमातिहात्रैष्टुभञ्छन्दऽआ-

रोंहान्तरिक्षमनुविक्क्रमस्वविष्ष्णोःक्क्रमोस्यरातीयतोहन्ताजागत-
च्छन्दऽआरोंहदिवमनुविक्क्रमस्वविष्ष्णोःक्क्रमोसिशत्रूयतोहन्ता·
नुष्टुभञ्छन्द ऽ आरोंहदिशोनुविक्क्रमस्व ॥ ५ ॥ अक्क्रन्ददग्ग्नि·
स्तनयन्निवद्यौःक्षामारेरिहद्वीरुधः समञ्जन् । सद्द्योजज्ञानोवि-
हीमिद्धोऽअक्ख्यदारोदसीभानुनाभात्यन्तः ॥ ६ ॥ अग्नेभ्यावर्त्तिन्न-
भिमानिवर्तस्वायुषावर्च्चसाप्प्रजयाधनेन । सन्न्यामेधयारय्याप्पोषे-
ण ॥ ७ ॥ अग्नेऽअङ्गिरःशतन्तेसन्त्वावृतः सहस्रन्तऽउपावृतः ।
अधापोषस्यपोषेणपुनर्न्नोनष्टमाकृधिपुनर्नोरयिमाकृधि ॥ ८ ॥ पुन·
रूर्ज्जानिवर्त्तस्वपुनरग्नऽइषायुषा । पुनर्न्नःपाह्यꣳहसः ॥ ९ ॥ सहर-

ष्या निर्वर्त्तस्वाग्ने पिन्न्वस्व धारया । व्विश्वप्प्स्न्या व्विश्वतस्परि- ॥ १० ॥ आत्त्वाहार्षमन्तरभूद्ध्रुवस्तिष्ठाविचाचलिः । व्विशस्त्वा- सर्व्वा व्वाञ्छन्तु मा त्वद्राष्ट्रमधिभ्रशत् ॥ ११ ॥ उदुत्तमंव्वरुणपा- शमस्मदवाधमंव्विमध्यमꣳ श्रथाय । अथाव्वयमादित्यव्व्रतेत- वानागसोऽअदितयेस्याम ॥ १२ ॥ अग्ग्रेबृहन्नुषसामूर्द्ध्वोऽअ- स्थान्निर्ज्जगन्न्वान्तमसोज्ज्योतिषागात् । अग्निर्ब्भानुनारुशा- तास्वङ्गऽआजातोव्विश्वासद्मान्न्यप्प्राः ॥ १३ ॥ हꣳसः शुचिषद्वसु- रन्तरिक्षसद्धोताव्वेदिषदतिथिर्द्दुरोणसत् । नृषद्वरसदृतसद्व्योमस- दब्जागोजाऽऋतजाऽअद्रिजाऽऋतंबृहत् ॥ १४ ॥ सीदत्त्वम्मातुर-

स्याऽउपस्थेविचरश्वान्न्यग्ग्नेव्वयुनानिव्विद्वान् । मैनान्तपसामार्चि-
षाभिशोचीरन्तरस्याँ शुक्रज्ज्योतिर्व्विभाहि ॥ १५ ॥ अन्तरग्ग्नेरु-
चात्त्वमुखायाँ सदने स्वे । तस्यास्त्वँहरसातपञ्जातवेदःशिवोभव
॥ १६ ॥ शिवोभूत्त्वामह्यमग्ग्ने अथोसीदशिवस्त्वम् । शिवाःकृत्त्वादिशः
सर्व्वाःस्वंयोनिमिहासदः ॥ १७ ॥ दिवस्परिप्प्रथमञ्जज्ञेऽअग्निर-
स्मद्द्वितीयम्परिजातवेदाः । तृतीयमप्प्सुनृमणाऽअजस्रमिन्धानऽ-
एनञ्जरतेस्वाधीः ॥ १८ ॥ विद्मातेऽअग्ग्नेऽत्त्रेधात्त्रयाणिविद्मातेधाम-

१—इत्यत्र 'विद्मा सौत्रामण्याम्' (३।१२६) सौत्रामणीमन्त्रमुक्त्वा विद्म इत्ययं ह्रस्वो दीर्घमापद्यते ।

विभृता पुरुत्रा । विद्मा ते नाम परमं गुहा यद्विद्मा तमुत्सं यतऽआ-
जगन्थ ॥ १९ ॥ समुद्रे त्वा नृमणाऽअप्स्वन्तर्नृचक्षाऽईधे दिवोऽअ-
ग्नऽऊधन् । तृतीये त्वा रजसि तस्थिवाꣳसमपामुपस्थे महिषाऽअव-
र्द्धन् ॥ २० ॥ अक्रन्ददग्निस्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः
समञ्जन् । सद्यो जज्ञानो वि हीमिद्धोऽअख्यदा रोदसी भानुना भा-
त्यन्तः ॥ २१ ॥ श्रीणामुदारो धरुणो रयीणां मनीषाणां प्रार्पणः सोम-
गोपाः । वसुः सूनुः सहसोऽअप्सु राजा वि भात्यग्रऽउषसामिधा-
नः ॥ २२ ॥ विश्वस्य केतुर्भुवनस्य गर्भऽआ रोदसीऽअपृणाज्जाय-
मानः । वीडुं चिदद्रिमभिनत्परायञ्जना यदग्निमयजन्त पञ्च ॥२३॥

उशिक्क्पावकोऽअरतिः सुमेधामर्त्येष्वग्निरमृतोनिधायि। इयर्तिधूम-
मरुषम्भरिभ्रदुच्छुक्क्रेणशोचिषाद्यामिनक्षन् ॥ २४ ॥ दृशानोरु-
क्क्मऽउर्व्याव्व्यद्यौद्दुर्म्मर्षमायुः श्रियेरुचानः। अग्निरमृतोऽअ-
भवद्वयोभिर्य्यदेनन्द्यौरजनयत्सुरेताः ॥ २५ ॥ यस्तेऽअद्यकृणवं-
द्भद्रशोचेपूपन्देवघृतवन्तमग्ने। प्रतन्नयप्रतरंव्वस्योऽअच्छाभि-
सुम्नन्देवभक्तंय्यविष्ठ ॥२६॥ आतम्भजसौश्रवसेष्वग्नऽउक्क्थऽ-
उक्क्थऽआभजशस्यमाने। प्रियःसूर्य्येप्रियोऽअग्नाभवात्युज्जाते-
नभिनदुज्जनित्वैः ॥ २७ ॥ त्वामग्नेयजमानाऽअनुद्यून्विश्वावसु-
दधिरेव्वार्य्याणि। त्वयासहद्रविणमिच्छमानाव्व्रजङ्गोमन्तमुशि-

जोव्विवंव्वसुः ॥ २८ ॥ अस्ताव्व्यग्निर्न्नरा॑सुशेवोव्वैश्वानरऽऋषि-
भिः सोम॑गोपाः । अद्वेषेद्यावापृथिवीहुवेमदेवाधत्तरयिमस्स्मेसुवी-
रम् ॥ २९ ॥ समिधाग्निन्दुवस्यतघृतैर्बोधयतातिथिम् । आस्मिन्हव्व्य-
व्व्याजुहोतन ॥ ३० ॥ उदुत्त्वाव्विश्वेदेवाऽअग्ग्नेभरन्तुचित्तिभिः ।
सनोभवशिवस्त्वꣳसुप्प्रतीकोव्विभावसुः ॥ ३१ ॥ प्रेदग्ग्नेज्ज्योति-
ष्मयान्न्याहिशिवेभिरर्च्चिभिष्ट्वम् । बृहद्भिब्भानुभिब्भासन्न्माहिꣳ-
सीस्तन्न्वाप्प्रजाः ॥ ३२ ॥ अक्क्रन्ददग्ग्निस्स्तनयन्निवद्यौःक्षामारे-
रिहद्वीरुधः समञ्जन् । सद्योजज्ज्ञानोव्विहीमिद्धोऽअक्ख्यदारोदसी-
भानुनाभात्यन्तः ॥ ३३ ॥ प्रप्रायमग्निर्भरतस्यशृण्वेव्वियत्सूर्य्योन-

रोचंतेबृहद्भाः॥ अभियःपूरुम्पृतंनासुतस्त्थौदीदायदैव्योऽअतिथिं शिवोनं÷ ॥३४॥ आपोदेवीःप्रतिगृभ्णणीतभस्मैतत्स्योनेकृणुद्ध्वꣳ सुरभाऽउंलोके। तस्मैनमन्ताजनयꣳसुपत्नीर्म्मातेवपुत्रम्बिभृताप्स्वे-नत्॥३५॥ अप्प्स्वग्ग्नेसधिष्टवसौषधीरनुरुध्यसे। गर्भेसञ्जायसेपु-नं÷॥३६॥ गर्भोऽअस्योषधीनाङ्गर्भोव्वनस्पतीनाम्। गर्भोव्विश्श्वं-स्यभूतस्याग्ग्नेगर्भोऽअपामंसि॥३७॥ प्रसद्यभस्मनायोनिमपश्चपृ-

---

१—इत्यत्र 'सधिरठंजुरदितिः' (३।७६) इत्यनेन सधिः, अꣳसुः, अदितिः एतेषां विसर्जनीयः सकारः षकारमापद्यते संहितायाम्। एवम्—अꣳशुष्टे (५।७) अदितिष्ट्वा (११।६१) इत्यादिषु ज्ञेयम्।

थिवीमग्ग्ने । सᳬसृज्ज्यमातृभिष्ट्वञ्ज्योतिष्म्मान्पुनरासदः ॥३८॥ पुन-
रासद्द्यसदनमपश्च्चपृथिवीमग्ग्ने । शेषेमातुर्य्यथोपस्त्थेन्तरस्याᳬशि-
वतमः ॥३९॥ पुनरूर्ज्जानिवर्त्तस्वपुनरग्ग्नऽइषायुषा । पुनर्न्नःपाह्यᳬ-
हसः ॥४०॥ सहरय्यानिवर्त्तस्वाग्ग्नेपिन्न्वस्वधारया । विश्श्वप्स्न्या-
विश्श्वतस्प्परि ॥४१॥ बोधामेऽअस्यव्वचसोयविष्ठमᳬहिष्ठस्यप्रभृ-
तस्यस्वधावः । पीयतित्त्वोऽअनुत्त्वोगृणातिव्वन्दारुष्टेतन्न्वंव्वन्देऽअ-
ग्ग्ने ॥४२॥ सबोधिसूरिर्म्मघवाव्वसुपतेव्वसुदावन् । युयोद्ध्यस्म्मद्द्वे-
षाᳬसिविश्श्वकर्म्मणेस्वाहा ॥४३॥ पुनस्त्वादित्यारुद्द्राव्वसवःसमि-
न्धताम्पुनर्ब्ब्रह्माणोव्वसुनीथयज्ञैः । घृतेनत्त्वन्तन्न्वंव्वर्द्धयस्वसत्त्याः

सं᳘न्तुषजं᳘मानस्यकामाः᳘ ॥ ४४ ॥ अपे᳘तव्वीतविच᳘सर्प्पतातोयेत्रस्त्थपु᳘-
राणायेचनूतं᳘नाः᳘। अदा᳘द्यमोवसानंम्पृथिव्व्याऽअक्क᳘न्निमम्पितरो᳘लोक-
मं᳘स्म्मै ॥४५॥ सँज्ञानं᳘मसिकामधरं᳘णम्मयि᳘तेकामधरं᳘णम्भूयात् । अग्ग्ने-
र्भस्म्मास्यग्ग्ने᳘पुरीषमसिचितं᳘स्त्थपरिचितं᳘ऽऊर्द्ध्वचितं᳘ ÷ श्रयद्ध्वम्

१—इत्यादावपि तथाविधमुखाकृत्या उच्चारणेन वैदिकानां सञ्जूँ जानेति श्रुतिर्भवति। तथा च जिह्वाग्रेण आधोदन्तमूलं स्पृष्ट्वा जिह्वामध्येन च तालुं स्पृष्ट्वा नकारे उच्चारिते मुखस्य वर्तुलविवर्तनं भवति। अत एव तत्र नकारञकाराभ्यां मिलितेव श्रुतिः श्रूयते इति भावः। एतेन य (ज्ञ) ज्ञ शब्दे यग्येति यद्गेति वोच्चारणं निरस्तम्। केचन (यज्यँ) इत्युच्चारयन्ति तेऽपि परास्ताः।

॥४६॥ अयᳪं सोऽअग्निर्यस्मिन्त्सोममिन्द्रः सुतन्दधे जठरे वावशानः।
सहस्रियं वाजमत्यन्न सप्तिᳪं ससवान्त्सन्त्स्तूयसे जातवेदः ॥ ४७ ॥
अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र । येनान्तरि-
क्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः ॥ ४८ ॥ अग्ने दिवोऽअर्ण-
मच्छा जिगास्यच्छा देवाँ २॥ ऽऊचिषे धिष्ण्या ये । या रोचने परस्तात्सू-
र्य्यस्य याश्चावस्तादुपतिष्ठन्तऽआपः ॥४९॥ पुरीष्यासोऽअग्नयः
प्रावणेभिः सजोषसः । जुषन्तां यज्ञमद्रुहोऽनमीवाऽइषो महीः ॥ ५० ॥
इडामग्ने पुरुदᳪं सᳪं सनिङ्गोः शश्वत्तमᳪं हवमानाय साध । स्यान्नः सूनु-
स्तनयो विजावाग्ने सा ते सुमतिर्भूत्त्वस्मे ॥ ५१ ॥ अयन्ते योनिर्ऋत्त्वि-

योवतॉजातोऽअरोचथाः । तञ्जानन्नग्नऽआरोहाथानोव्वर्द्धयारयिम्
॥ ५२ ॥ चिदसितयादेवतयाङ्गिरस्वद्ध्रुवासीदपरिचिदसितयादेवत-
याङ्गिरस्वद्ध्रुवासीद ॥ ५३ ॥ लोकम्पृणच्छिद्रम्पृणाथोसीदद्ध्रुवात्त्व-
म् । इन्द्राग्नीत्त्वाबृहस्पतिरस्मिन्न्योनावसीषदन् ॥ ५४ ॥ ताऽअ-
स्यसूददोहसः सोमꣳ श्रीणन्तिपृश्नयः । जन्मन्देवानांव्विशस्त्रिष्वा-
रोचनेदिवः ॥ ५५ ॥ इन्द्रंव्विश्वाऽअवीवृधन्त्समुद्रव्यचसङ्गिरः ।
रथीतमꣳ रथीनांव्वाजानाꣳ सत्पतिम्पतिम् ॥ ५६ ॥ समितꣳ सङ्कल्पे-
थाꣳ सम्प्रियौरोचिष्णूसुमनस्यमानौ । इषमूर्ज्जमभिसंव्वसानौ ॥५७॥
संव्वाम्मनाꣳसिसंव्व्रतासमुचित्तान्न्याकरम् । अग्नेपुरीष्याधिपा-

भवत्त्वन्नऽइषमूर्जꣳयजमानायधेहि ॥ ५८ ॥ अग्नेत्त्वम्पुरीष्ष्योरयिमा-
न्पुष्टिमाँ२ऽअसि । शिवाःकृत्त्वादिशःसर्व्वाःस्वंयोनिमिहासदः
॥ ५९ ॥ भवतन्नःसमनसौसचेतसावरेपसौ । माय्यज्ञꣳहिꣳसिष्टम्मा-
यज्ञपतिञ्जातवेदसौशिवौभवतमद्यनः ॥ ६० ॥ मातेवपुत्त्रम्पृथि-
वीपुरीष्ष्यमग्निꣳस्वेयोनावभारुखा । तांविश्श्वैर्देवैर्ऋतुभिःसंविदा-
नःप्रजापतिर्व्विश्श्वकर्म्माव्विमुञ्चतु ॥ ६१ ॥ असुन्न्वन्तमयजमान-
मिच्छस्तेनस्येत्यामन्न्विहितस्करस्य । अन्न्यमस्मदिच्छसातऽइत्त्या-
नमोदेविनिर्ऋतेतुब्भ्यमस्तु ॥ ६२ ॥ नमःसुतेनिर्ऋतेतिग्मतेजोयस्म-
यंविचृतावन्धमेतम् । यमेनत्त्वंयम्म्यासंव्विदानोत्तमेनाकेऽअधिरो-

हयैनम् ॥ ६३ ॥ यस्यास्तेघोरऽआसञ्जुहोम्म्येषाम्बन्धानामवसर्ज्जनाय । यान्त्वाजनोभूमिरितिप्प्रमन्दन्तेनिर्ऋतिन्त्वाहम्परिवेदव्विश्श्वतं ÷ ॥ ६४ ॥ यन्तेदेवीनिर्ऋतिराबबन्धपाशङ्ग्रीवास्वविचृत्यम् । तन्तेव्विष्ष्याम्म्यायुषोनमद्ध्यादथैतम्पितुमद्धिप्प्रसूतः । नमोभूत्त्यैयेदञ्चकार ॥ ६५ ॥ निवेशनःसङ्गमनोव्वसूनांव्विश्श्वारूपाभिचष्ट्टेशचीभिः । देवऽइवसवितासत्त्यधर्म्मेन्द्रोनतस्त्थौसमरेपथीनाम् ॥ ६६ ॥ सीरायुञ्जन्तिकवयोयुगाव्वितन्न्वतेपृथक् । धीरादेवेषुसुम्म्नया ॥ ६७ ॥ युनक्तसीराव्वियुगातनुद्ध्वङ्कृतेयोनौव्वपतेहबीजम् ॥ गिराचश्श्रुष्टिःसभराऽअसन्नोनेदीयऽइत्सृण्य ÷ पक्वमे-

यात् ॥ ६८ ॥ शुनꣳसुफालाविकृषन्तुभूमिꣳशुनङ्कीनाशाऽअभियं-
न्तुवाहैः । शुनासीराहविषातोशमानासुपिप्पलाऽओषधीः कर्त्तना-
स्मे ॥६९॥ घृतेनसीतामधुनासमंज्यतांविश्वैर्देवैरनुमतामरुद्भिः।
ऊर्जस्वतीपयसापिन्वमानास्मान्त्सीतेपयसाभ्याववृत्स्व ॥ ७० ॥
लाङ्गलम्पवीरवत्सुशेवꣳसोमपित्सरु ॥ तदुद्वपतिगामविम्प्रफर्व्यं-
ञ्चपीवरीम्प्रस्थावद्रथवाहणम् ॥ ७१ ॥ कामङ्कामदुघेधुक्ष्वमित्रा-
यवरुणायच। इन्द्रायाश्विभ्याम्पूष्णेप्रजाभ्यऽओषधीभ्यः ॥७२॥
विमुच्यध्वमघ्न्यादेवयानाऽअगन्मतमसस्पारमस्य । ज्योतिरा-
पाम ॥ ७३ ॥ सजूरब्दोऽअयवोभिःसजूरुषाऽअरुणीभिः । सजोष-

सावशिश्वनाद८ सोभिर्ःसजूःसूरऽएतंशेनसजूर्व्वैश्वानरऽइडया घृतेन-
स्वाहा ॥ ७४ ॥ याऽओषधीःपूर्व्वाजातादेवेभ्यस्त्रियुगम्पुरा । मनैनु-
बभ्रूणामह८शतन्धामानिसप्तच ॥ ७५ ॥ शतंव्वोऽअम्बधामानिस-
हस्रमुतवोरुहः । अधाशतक्रत्वोयूयमिमम्मेऽअगदङ्कृत ॥ ७६ ॥
ओषधीःप्रतिमोदद्ध्वम्पुष्पवतीःप्रसूवरीः । अश्वाऽइवसजित्त्वरी-
र्व्वीरुधःपारयिष्ण्वः ॥ ७७ ॥ ओषधीरितिमातरस्तद्वोदेवीरुप-
ब्रुवे । सनेयमश्श्वङ्गांव्वासऽआत्मानन्तवपूरुष ॥ ७८ ॥ अश्श्वत्थे

१ —'अश्वात्स्थे तकारठं०सञ्ज्ञायाम्'।४।९९।अश्वशब्दादुत्तरःसकारःतकारमापद्यते संज्ञायां स्थे प्रत्यये इति । अश्वः—अशनव्यापारोऽग्निरस्मिंस्तिष्ठतीत्यश्वत्थो वृक्षः ।

वोनिषदंनम्पर्णेवोव्वसतिष्कृता । गोभाजऽइत्किलासथयत्सनवथपूरु-
षम् ॥ ७९ ॥ यत्रौषधीःसमग्मतराजानःसमिताविव । विप्रःसऽ-
उच्यतेभिषग्रक्षोहामीवचातनः ॥ ८० ॥ अश्वावतीᳪसोमावतीमू-
र्जयन्तीमुदोजसम् । आवित्सिसर्वाऽओषधीरस्माऽअरिष्टतातये
॥८१॥ उच्छुष्माऽओषधीनाङ्गावोगोष्ठादिवेरते । धनᳪसनिष्यन्तीना-
मात्मानन्तवपूरुष ॥८२॥ इष्कृतिर्नामवोमाताथोयूयᳪस्थनिष्कृतीः ।
सीराःपतत्रिणीस्थनयदामयतिनिष्कृथ॥८३॥ अतिविश्वाः परिष्ठा-
स्तेनऽइवव्रजमक्रमुः । ओषधीःप्राचुच्यवुर्यत्किञ्चतन्वोरपः ॥८४॥
यदिमाव्वाजयन्नहमोषधीर्हस्तऽआदधे । आत्मायक्ष्मस्यनश्यतिपुरा-

जीवगृभोयथा ॥८५॥ यस्यौषधीःप्रसर्प्पथाङ्गमङ्गम्परुष्परुः । ततोय
क्ष्मंविबाधदुग्रोमध्यमशीरिव ॥ ८६ ॥ साकंयक्ष्मप्रपतचाषे-
णकिकिदीविना। साकंव्वातस्यध्राज्यासाकन्नश्यनिहाकया ॥८७॥
अन्न्यावोऽअन्न्यामवत्वन्न्यान्न्यस्याऽउपावत । ताःसर्व्वाः संव्वि-
दानाऽइदम्मेप्रावताव्वचः ॥ ८८ ॥ याःफलिनीर्य्याऽअफलाऽअ-
पुष्पायाश्चपुष्पिणीः । बृहस्पतिप्रसूतास्तानोमुञ्चन्त्वꣳहसः
॥ ८९ ॥ मुञ्चन्तुमाशपथ्यादथोव्वरुण्यादुत । अथोयमस्यपड्वीशात्स-
र्व्वस्माद्देवकिल्बिषात् ॥ ९० ॥ अवपतन्तीरवदन्दिवऽओषधयस्प-
रि । यञ्जीवमश्नवामहैनसरिष्यातिपूरुषः ॥ ९१ ॥ याऽओषधीःसो-

मंराज्ञीर्बह्वीःशतविचक्षणाः। तासामसित्त्वमुत्तमारङ्कामायशꣳहृदे ॥ ९२ ॥ याऽओषधीःसोमराज्ञीर्व्विष्ठिताःपृथिवीमनु । बृहस्पति-प्रसूताऽअस्यैसन्दत्तव्वीर्य्यम् ॥ ९३ ॥ याश्चेदमुपशृण्वन्तियाश्च-दूरम्परागताः । सर्व्वाः सङ्गत्यव्वीरुधोस्यैसन्दत्तव्वीर्य्यम् ॥ ९४ ॥ मावोरिषत्खनिताबस्मैचाहङ्खनामिवः॥ द्विपाच्चतुष्पादस्माकꣳ सर्व्वमस्त्वनातुरम् ॥ ९५ ॥ ओषधयःसमवदन्तसोमेनसहराज्ञा । यस्मैकृणोतिब्ब्राह्मणस्तꣳराजन्पारयामसि ॥ ९६ ॥ नाशयित्रीब-लासस्यार्शसऽउपचितामसि । अथोशतस्ययक्ष्माणाम्पाकारोरसिना-शनी ॥९७॥ त्वाङ्गन्धर्व्वाऽअखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः । त्वा-

मोषधेसोमोराजाव्विद्वान्न्यक्ष्मादमुच्च्यत ॥ ९८ ॥ सहँस्वमेऽअरा-
तीःसहँस्वपृतनायतः । सहँस्वसर्व्वंपाप्मानꣳसहँमानास्योषधे
॥९९॥ दीर्ग्घायुस्तऽओषधेखनितायस्म्मैचत्त्वाखनाम्म्यहम् । अथो-
त्त्वन्दीर्ग्घायुर्ब्भूत्त्वाशतवल्शाव्विरोहतात् ॥ १०० ॥ त्वमुत्तमा-
स्योषधेतवव्वृक्षाऽउपस्तयः । उपस्तिरस्तुसोस्म्माकंयोऽअस्म्माँ२ऽ-
अभिदासति ॥ १०१ ॥ मामाहिꣳसीज्जनितायःपृथिव्व्यायोवादिवꣳ
सत्यधर्म्माव्व्यानट् । यश्श्चापश्श्चन्द्राःप्रथमोजजानकस्म्मैदेवायहवि-
षाविधेम ॥ १०२ ॥ अब्भ्यावर्त्तस्वपृथिवियज्ञेनपयसासह । व्वपा-
न्तेऽअग्निरिषितोऽअरोहत् ॥ १०३ ॥ अग्नेयत्तेशुक्क्रंयच्चन्द्रंयत्-

त्पूतंऽयच्चँषञ्ज्ञियम् । तद्देवेभ्योभरामसि ॥ १०४ ॥ इषमूर्ज्जमहमित-
ऽआदमृतस्ययोनिम्महिषस्यधाराम् । आमागोषुविशत्वातनूषुजहा-
मिसेदिमनिराममीवाम् ॥ १०५ ॥ अग्नेतवश्रवोवयोमहिभ्राजन्ते-
ऽअर्च्चयोविभावसो । बृहद्भानोशवसावाजमुक्थ्यन्दधासिदा-
शुषेकवे ॥ १०६ ॥ पावकवर्च्चाःशुक्रवर्च्चाऽअनूनवर्च्चाऽउदियर्षिभानु-
ना । पुत्रोमातराविचरन्नुपावसिपृणक्षिरोदसीऽउभे ॥ १०७॥ ऊर्ज्जो-
नपाज्जातवेदःसुशस्तिभिर्म्मन्दस्वधीतिभिर्हितः । त्वेऽइषःसन्दधु-
र्भूरिवर्पसश्चित्रोतयोवामजाताः ॥ १०८ ॥ इरज्यन्नग्नेप्रथय-
स्वजन्तुभिरस्मेरायोऽअमर्त्त्य । सदर्शतस्यवपुषोविराजसिपृण-

द्विसानसिङ्क्रतुम् ॥ १०९ ॥ इष्कर्त्तारमध्वरस्यप्रचेतसङ्क्षयन्तꣳरा-
धसोमहः । रातिंव्वामस्यसुभगाम्महीमिषन्दधासिसानसिꣳरयिम्
॥ ११० ॥ ऋतावानम्महिषंव्विश्वदर्शतमग्निꣳसुम्नायदधिरेपुरोज-
नाः । श्रुत्कर्णꣳसप्रथस्तमन्त्वागिरादैव्यम्मानुषायुगा ॥ १११ ॥
आप्प्यायस्वसमेतुतेव्विश्वतः सोमव्वृष्ण्यम् । भवाव्वाजस्यसङ्गथे
॥ ११२ ॥ सन्तेपयाꣳसिसमुयन्तुव्वाजाःसंव्वृष्ण्यान्यभिमातिषा-
हः । आप्प्यायमानोऽअमृतायसोमदिविश्श्रवाꣳस्युत्तमानिधिष्व
॥ ११३ ॥ आप्प्यायस्वमदिन्तमसोमव्विश्वेभिरꣳशुभिः । भवानः
सप्रथस्तमःसखाव्वृधे ॥ ११४ ॥ आतेव्वत्सोमनोयमत्परमाच्चित्स

घस्त्थात् । अग्नेत्त्वाङ्कामयागिरा ॥ ११५ ॥ तुब्भ्यन्ताऽअङ्गिरस्तम-
व्विश्श्वाः सुक्षितयःपृथक् । अग्नेकामायषेमिरे ॥ ११६ ॥ अग्निः
प्प्रियेषुधामसुकामोभूतस्यभव्व्यस्यसम्म्राडेकोव्विराजति ॥ ११७ ॥
इति संहितायां द्वादशोऽध्यायः ॥

❀ अथ त्रयोदशोऽध्यायः ❀

ॐ मयिगृह्णाम्स्यग्ग्रेऽअग्ग्निःरायस्प्पोषायसुप्प्रजास्त्वायसुवी-
र्य्याय । मामुदेवताःसचन्ताम् ॥ १ ॥ अपाम्पृष्ठमसियोनिरग्ग्नेःस-
मुद्रमभितःपिन्न्वमानम् । व्वर्द्धमानोमहाँऽआचपुष्करेदिवोमात्र-

याव्वरिम्मणाप्प्रथस्व ॥ २ ॥ ब्रह्मम्मंषज्ज्ञानम्प्प्रंथमम्पुरस्ताद्विद्धसीमत॒ः सुरुचोव्वेनऽआवः । सवुध्न्न्याऽउपमाऽअस्यविष्ठा॒ःसतश्चषोनिमसतश्चविव्वः ॥ ३ ॥ हिरण्यगर्ब्भ॒ःसमवर्त्तताग्ग्रेभूतस्यंजात॒ःपतिरेकऽआसीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मै देवायहविषाविधेम ॥ ४ ॥ द्रप्सश्चस्कन्दपृथिवीमनुद्द्यामिमञ्चषोनिमनुयश्श्चपूर्व्वः समानंषोनिमनुसञ्चरन्तन्द्रप्सञ्जुहोम्म्यनुसप्तहोत्राः ॥५॥ नमोस्तुसर्प्पेब्भ्योषेकेचपृथिवीमनु । षेऽअन्तरिक्षेषेदिवितेब्भ्यः सर्प्पेब्भ्योनमः ॥ ६ ॥ षाऽइषवोषातुधानानांषेवाव्वनस्पतीँ१रनु । षेवावटेषुशेरतेतेब्भ्यः सर्प्पेब्भ्योनमः ॥ ७ ॥ षेवामीरोचने-

दिवोषेवासूर्यंस्यरश्मिषु। येषामप्सुसदंस्कृतन्तेभ्यः सर्प्पेभ्योन-
मः ॥ ८ ॥ कृणुष्वपाजंप्रसितिन्नपृथ्वीयाहिराजेवामंवाँ२ऽइ-
भेन । तृष्वीमनुप्रसितिन्द्रूणानोस्तासिविध्यरक्षसस्तपिष्ठैः ॥ ९ ॥
तवभ्रमासऽआशुयापतन्त्यनुस्पृशधृषताशोशुचानः । तपूंष्यग्नेजु-
ह्वापतङ्गानसन्दितोविसृजविष्वगुल्काः ॥ १० ॥ प्रतिस्पशोविसृज-
तूर्णितमोभवापायुर्विशोऽअस्याऽअदब्धः । योनोदूरेऽअघशंसोयो-
ऽअन्त्यग्नेमाकिष्टेव्यथिरादधर्षीत् ॥ ११ ॥ उदग्नेतिष्ठप्रत्यातनु-
ष्वन्न्यमित्राँ२ऽओषतात्तिग्महेते । योनोऽअरातिंसमिधानचक्रे-
नीचातन्धक्ष्यतसन्नशुष्कम् ॥ १२ ॥ ऊर्ध्वोभवप्रतिविध्याध्यस्म-

दाविष्कृणुष्वदैव्यान्न्यग्ने । अर्वास्थिरातनुहिया तुजूनाञ्जामिमजा-
मिम्प्रमृणीहिशत्रून्। अग्नेष्ट्वातेजसासादयामि ॥ १३ ॥ अग्निर्म्मूर्द्धा-
दिवःककुत्पतिः पृथिव्याऽअयम् । अपाꣳरेताꣳसिजिन्वति ।
इन्द्रस्यत्वौजसासादयामि ॥ १४ ॥ भुवोयज्ञस्यरजसश्चनेतायत्रानि-
युद्भिःसचसेशिवाभिः । दिविमूर्द्धानन्दधिषेस्वर्षाञ्जिह्वामग्ने-
चकृषेहव्यवाहम् ॥ १५ ॥ ध्रुवासिधरुणास्तृताविश्वकर्म्मणा । मा-
त्वासमुद्रऽउद्वधीन्मासुपर्णोव्यथमानापृथिवीन्दृꣳह ॥ १६ ॥
प्रजापतिष्ट्वासादयत्वपाम्पृष्ठेसमुद्रस्येमन् । व्यचस्वतीप्रथस्वतीम्प्र-
थस्वपृथिव्यसि ॥ १७ ॥ भूरसिभूमिरस्यदितिरसिविश्वधायाविश्व-

श्वस्यभुवनस्यधर्त्री । पृथिवीँय्यच्छपृथिवीन्दृꣳहपृथिवीम्माहिꣳसीः
॥ १८ ॥ विश्वस्मैप्प्राणायापानायव्व्यानायोदानायप्प्रतिष्ठायैचरि-
त्राय । अग्निष्ट्वाभिपातुमह्यास्वस्त्याच्छर्द्दिषाशन्तमेनतयादेवतयाङ्गि-
रस्वद्ध्रुवासीद ॥ १९ ॥ काण्डात्काण्डात्प्ररोहन्तीपरुषःपरुषस्प्परि ।
एवानोदूर्व्वेप्प्रतनुसहस्रेणशतेनच ॥ २० ॥ याशतेनप्प्रतनोषिसहस्रे-
णविरोहसि । तस्यास्तेदेवीष्टकेव्विधेमहविषाव्वयम् ॥ २१ ॥ यास्तेऽ-
अग्नेसूर्य्येरुचोदिवमातन्न्वन्तिरश्मिभिः । ताभिर्नोऽअद्यसर्वा-
भीरुचेजनायनस्कृधि ॥ २२ ॥ यावोदेवाःसूर्य्येरुचोगोष्ष्वश्श्वेषुया-
रुचः । इन्द्राग्नीताभिःसर्व्वाभीरुचन्नोधत्तबृहस्प्पते ॥ २३ ॥ व्विरा-

ड्ज्योतिरधारयत्स्वराड्ज्योतिरधारयत् । प्रजापतिष्ट्वासादयतुपृ-
ष्ठेपृथिव्व्याज्ज्योतिष्मतीम् । व्विश्श्वस्म्मैप्प्राणायापानायव्व्यानाय-
व्विश्श्वञ्ज्योतिर्य्यच्छ । अग्निष्टेधिपतिस्तयादेवतयाङ्गिरस्वद्ध्रुवा-
सीद ॥ २४ ॥ मधुश्श्चमाधवश्श्चवासन्तिकावृतूऽअग्नेरन्तःश्लेषोसि
कल्प्पेतान्द्यावापृथिवीकल्प्पन्तामापऽओषधयःकल्प्पन्तामग्नयःपृथ-
ङ्ममज्यैष्ठ्यायसव्व्रताः । येऽअग्नयःसमनसोन्तराद्यावापृथिवीऽ-
इमे । व्वासन्तिकावृतूऽअभिकल्प्पमानाऽइन्द्रमिवदेवाऽअभिसंव्विश-
न्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ २५ ॥ अषाढासिसहमानास-
हस्वारातीःसहस्वपृतनायतः । सहस्रवीर्य्यासिसामाजिन्व ॥ २६ ॥

मधुव्वाताऽऋतायतेमधुंक्षरन्तिसिन्धंवः । माद्ध्वीर्न्नःसन्त्वोषधीः ॥ २७ ॥ मधुनक्तमुतोषसोमधुंमत्पार्थिवꣳरजं÷ । मधुद्यौरंस्तुनःपिता ॥ २८ ॥ मधुंमान्नोव्वनस्पतिर्म्मधुंमाँ२अस्तुसूर्य्यं÷ । माद्ध्वीर्गावोंभवन्तुनः ॥२९॥ अपाङ्गम्भंन्त्सीदमात्वासूर्योंभिताप्सीन्माग्निर्व्वैश्वानरः । अच्छिन्नपत्राःप्रजाऽअंनुवीक्षस्वानुंत्वादिव्याव्वृष्टि÷सचताम् ॥ ३० ॥ त्रीन्त्संमुद्रान्त्समंसृपत्स्वर्गानपास्पतिर्व्वृषभऽइष्टंकानाम् । पुरीषंव्वसानःसुकृतस्यंलोकेतत्रंगच्छयत्रपूर्व्वेपरेताः ॥ ३१ ॥ महीद्यौःपृथिवीचंनऽइमंय्यज्ञम्मिमिक्षताम् । पिपृतान्नोभरीमभिः ॥ ३२ ॥ व्विष्णोःकर्म्माणिपश्यतयतोंव्रतानि

पस्पशे । इन्द्रस्यषुज्ज्यꣳसखा ॥ ३३ ॥ ध्रुवासिधरुणेतोजज्ञेप्रथममे-
भ्योयोनिभ्योऽअधिजातवेदाः । सगायत्र्यात्रिष्टुभानुष्टुभाचदेवे-
भ्योहव्यंव्वहतुप्रजानन् ॥ ३४ ॥ इषेरायेरमस्वसहसेद्युम्नऽऊर्ज्जेऽ-
अपत्याय । सम्म्राडसिस्वराडसिसारस्वतौत्वोत्सौप्रावताम् ॥ ३५ ॥
अग्नेयुक्ष्वाहियेतवाश्श्वासोदेवसाधवः । अरंव्वहन्तिमन्न्यवे ॥ ३६ ॥
युक्ष्वाहिदेवहूतमाँ२ऽअश्वाँ२ऽअग्नेरथीरिव । निहोतापूर्व्यःसदः
॥ ३७ ॥ सम्म्यक्स्रवन्तिसरितोनधेनाऽअन्तर्हृदामनसापूयमानाः ।

१—'असस्थानेमुदि द्वितीयठं० शौनकस्य' (४।१२०) शौनकाचार्यमते असमान-स्थाने मुत्संज्ञके प्रत्यये स्पर्शोऽपञ्चमोद्वितीयमापद्यते । सम्यक् स्रवन्ति । सम्यक्स्रव-

घृतस्यधाराऽअभिचाकशीमिहिरण्ण्ययोव्वेतसोमद्ध्येऽअग्ग्नेः ॥ ३८ ॥
ऋचेत्त्वारुचेत्त्वाभासेत्त्वाज्ज्योतिषेत्त्वा । अभूदिदंव्विश्श्वस्यभुवनस्य
व्वाजिनमग्ग्नेर्व्वैश्श्वानरस्यच ॥ ३९ ॥ अग्ग्निर्ज्ज्योतिषाज्ज्योतिष्ष्मा-
न्रुक्क्मोव्वर्च्चसाव्वर्च्चस्वान् । सहस्रदाऽअसिसहस्रायत्त्वा ॥ ४० ॥
आदित्यङ्गर्ब्भम्पयसासमङ्ग्धिसहस्रस्यप्प्रतिमांव्विश्श्वरूपम् । परि-
वृङ्ग्धिहरसामाभिमंᳪस्त्थाः शतायुषङ्कृणुहिचीयमानः ॥ ४१ ॥ व्वा-
तस्यजूतिंव्वरुणस्यनाभिमश्श्वञ्जज्ञानᳬसरिरस्यमद्ध्ये । शिशुन्नदीनाᳪ

न्ति । एवमनुष्टुप्शारदी अनुष्टुफशारदी (१३।५७) इत्यादि । केचिदत्र तृतीय 'मव-
सानेचे'त्येतत्सूत्रं पठन्ति सोऽपपाठः ।

हरिमर्द्द्रिबुध्नमग्ग्नेमाहिंसीः परमेव्व्योमन् ॥ ४२ ॥ अजस्रमिन्दु-
मरुषम्भुरण्युमग्ग्निमीडेपूर्व्वचित्तिन्नमोभिः । सपर्व्वभिर्ऋतुशः कल्प-
मानोगाम्माहिंसीरदितिंव्विराजम् ॥ ४३ ॥ व्वरूत्रीन्त्वष्टुर्व्वरुण-
स्यनाभिमविञ्जज्ञानाꣳ रजसः परस्स्मात् । महीꣳ साहस्रीमसुरस्य
मायामग्ग्नेमाहिंसीः परमेव्व्योमन् ॥ ४४ ॥ योऽअग्निरग्नेरद्ध्य-
जायतशोकात्पृथिव्व्याऽउतवादिवस्प्परि । येनप्रजाव्विश्वकर्म्माज-
जानतमग्ग्नेहेडः परितेव्वृणक्तु ॥ ४५ ॥ चित्रन्देवानामुदगादनीकञ्च-
क्षुर्म्मित्रस्यव्वरुणस्याग्ग्नेः । आप्प्राद्द्यावापृथिवीऽअन्तरिक्षꣳ सू-
र्य्यऽआत्माजगतस्तस्थुषश्च ॥ ४६ ॥ इमम्माहिंसीर्द्द्विपादम्पशुꣳ

सहस्राक्षोमेधायचीयमानं । मयुम्पशुम्मेधमग्नेजुषस्वतेनचिन्न्वान-
स्तन्न्वोनिषीद । मयुन्तेशुग्गृच्छतुयन्द्विष्मस्तन्तेशुग्गृच्छतु ॥४७॥ इम-
म्माहिंऽसीरेकशफम्पशुङ्कनिक्रदंव्वाजिनंव्वाजिनेषु । गौरमारण्य-
मनुतेदिशामितेनचिन्न्वानस्तन्न्वोनिषीद । गौरन्तेशुग्गृच्छतुयन्द्विष्म-
स्तन्तेशुग्गृच्छतु ॥४८॥ इमऽसाहस्रऽशतधारमुत्संव्यच्यमानऽसरिर-
स्यमध्ये । घृतन्दुहानामदितिञ्जनायाग्नेमाहिंऽसीःपरमेव्योमन् ॥
गवयमारण्यमनुतेदिशामितेनचिन्न्वानस्तन्न्वोनिषीद । गवयन्तेशु-
ग्गृच्छतुयन्द्विष्मस्तन्तेशुग्गृच्छतु ॥ ४९ ॥ इममूर्णायुंव्वरुणस्यनाभि-
न्त्वचम्पशूनांद्विपदाञ्चतुष्पदाम् । त्वष्टुः प्रजानाम्प्रथमञ्जनित्रम-

ग्नेमा हिँꣳसीर्ꣳ परमे व्योमन्। उष्ट्रमारण्यमनु ते दिशामि तेन चिन्वा-
नस्तन्वो निषीद। उष्ट्रन्ते शुगृच्छतु यन्द्विष्मस्तन्ते शुगृच्छतु ॥ ५० ॥
अजो ह्यग्नेरजनिष्ट शोकात्सोऽअपश्यज्जनितारमग्रे। तेन देवा देवता-
मग्रमायँस्तेन रोहमायन्नुप मेध्यासःꣳ। शरभमारण्यमनु ते दिशामि
तेन चिन्वानस्तन्वो निषीद। शरभन्ते शुगृच्छतु यन्द्विष्मस्तन्ते शुगृ-

---

१—'स्वरात्स्वरे समानपदे जोयम्तु ऋकारे' (शु. प्रा. सू. १६४) वा शब्दो विकल्पार्थः, 'स्फोटनं च ककारवर्गौ वा स्पर्शात्' (१६३) इति पूर्वसूत्रात् इहानुवर्तते। स्वरात्परो जकारो वा यकारमापद्यते स्वरे परभूते समानपदे न तु ऋकारे परे। यथा 'अचोह्यग्नेरजनिष्ट' 'अजोह्यग्नेरजनिष्ट'।

च्छतु ॥ ५१ ॥ त्वंꣳ यविष्ठ दाशुषो नॄँः पाहि शृणुधी गिरः । रक्षा तोक-मुत त्मना ॥ ५२ ॥ अपां त्वेमन्त्सादयाम्यपां त्वोद्मन्त्सादया-म्यपां त्वा भस्मन्त्सादयाम्यपां त्वा ज्योतिषि सादयाम्यपां त्वायने सादयाम्यर्णवे त्वा सदने सादयामि समुद्रे त्वा सदने सादयामि सरिरे त्वा सदने सादयाम्यपां त्वा क्षये सादयाम्यपां त्वा सधिषि सादया-म्यपां त्वा सदने सादयाम्यपां त्वा सधस्थे सादयाम्यपां त्वा योनौ सादयाम्यपां त्वा पुरीषे सादयाम्यपां त्वा पाथसि सादयामि गायत्रेण त्वा छन्दसा सादयामि त्रैष्टुभेन त्वा छन्दसा सादयामि जागतेन त्वा छन्दसा सादयाम्यानुष्टुभेन त्वा छन्दसा सादयामि पाङ्क्तेन त्वा छन्द-

सासादयामि ॥ ५३ ॥ अयम्पुरोभुवस्तस्यँप्प्राणोभौवायनोव्वंसन्त॑ः
प्प्राणायनोगायत्त्रीव्वासन्तीगायत्त्र्यैगायत्त्रङ्गायत्त्रादुपाꣳशुरुपाꣳ-
शोस्त्रिवृत्त्रिवृतोरथन्तरंव्वसिष्ठऽऋषि॑ः प्प्रजापतिगृहीतयात्त्वयाप्प्रा-
णङ्गृह्णामिप्प्रजाब्भ्य॑ः ॥ ५४ ॥ अयन्दक्षिणाविश्वकर्म्मातस्यम-
नोव्वैश्वकर्म्मणङ्ग्रीष्म्मोमानसस्त्रिष्टुब्ग्रैष्म्मीत्रिष्टुभ॑ः स्वारꣳस्वारा-
दन्तर्य्यामोन्तर्य्यामात्पञ्चदश॑ःपञ्चदशाद्बृहद्भरद्वाजऽऋषि॑ः प्प्र-
जापतिगृहीतयात्त्वयामनोगृह्णामिप्प्रजाब्भ्य॑ः ॥ ५५ ॥ अयम्पश्चाद्वि-
श्वव्यचास्तस्यचक्षुर्व्वैश्वव्यचसंव्वर्षाश्चाक्षुष्योजगतीव्वार्षीज-

गंत्त्याऽऋक्क्ख्सं मम्मृक्क्ख्सं माच्छुक्क्रः शुक्क्रात्सप्तदशः सप्तदशाद्द्वैरू-
पञ्जमदग्ग्निर्ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाब्भ्यः
॥ ५६ ॥ इदमुत्तरात्स्वस्तस्य श्रोत्रᳬं सौवᳬं शरच्छ्रौत्र्यनुष्टुप्शारद्य-
नुष्टुभऽएडमैडान्मन्थीमन्थिनऽएकविᳬं शऽएकविᳬं शाद्द्वैराजं विश्व-
श्वामित्रऋषिः प्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाब्भ्यः
॥ ५७ ॥ इयमुपरि मतिस्तस्यै व्वाङ्माच्या हैमन्तो व्वाच्यः पङ्क्ति-
र्हैमन्ती पङ्क्त्यै निधनवन्निधनवतऽआग्ग्रयणऽआग्ग्रयणात्त्रिणवत्रय-
स्त्रिᳬंशौ त्रिणवत्रयस्त्रिᳬंशाब्भ्याᳬं शाक्वररैवते विश्वकर्म्मऽ-

ऋषिं ÷ प्रजापतिगृहीतयात्त्वयात्त्राचंङ्गृह्णामिप्प्रजाब्भ्योलोकन्ताऽ इन्द्रम् ॥ ५८ ॥ इति संहितायां त्रयोदशोऽध्यायः ॥

❀ अथ चतुर्दशोऽध्यायः ❀

ॐ ध्रुवक्षितिर्द्ध्रुवयोनिर्द्ध्रुवासिद्ध्रुवंयोनिमासीदसाधुया । उक्ख्यंस्यकेतुम्प्रथमञ्जुषाणाशिश्वनाद्ध्वर्यूसादयतामिहत्वा ॥ १ ॥ कुलायिनीघृतवतीपुरन्धिःस्योनेसीदसदनेपृथिव्याः । अभित्वारुद्-

१—लोकम्पृण० ताऽअस्य; इन्द्रं विश्वा० (अ० १२ म० ५४-५६) प्रतीकोक्ता मन्त्राः पठनीयाः ।

द्राऽवसंवोगृणन्त्विमाब्ब्रह्म्पीपिहिसौभंगायाश्विनाद्ध्ध्वर्ष्यसाद-
यतामिहत्वा ॥ २ ॥ स्वैर्द्दक्षैर्द्दक्षपितेहसीददेवानां ॐ सुम्नेबृहतेर-
णाय । पितेवैधिसूनवऽआसुशेवास्वावेशातन्न्वासंविशस्वाश्विना-
द्ध्ध्वर्ष्यसादयतामिहत्वा ॥३॥ पृथिव्याः पुरीषमस्यप्सोनामतान्त्वा-
व्विश्वेऽअभिगृणन्तुदेवाः । स्तोमपृष्ठाघृतवतीहसीदप्रजावदस्मे-
द्द्रविणायजस्वाश्विनाद्ध्ध्वर्ष्यसादयतामिहत्वा ॥४॥ आदित्यास्त्वा-
पृष्ठेसादयाम्यन्तरिक्षस्यधर्त्रीव्विष्टम्भनीन्दिशामधिपत्नीम्भुवना-
नाम् । ऊर्म्मिर्द्रप्सोऽअपामसिव्विश्वकर्म्मातऽऋषिरश्विनाद्ध्ध्व-
र्ष्यसादयतामिहत्वा ॥ ५ ॥ शुक्रश्चशुचिश्चग्रैष्म्मावृतूऽअग्ने-

रन्तᳪंश्श्लेषोसिकल्प्पैतान्द्यावापृथिवीकल्प्पन्तामापऽओषधयᳪंकल्प्प-
न्तामग्नयᳪंपृथङ्ममज्ज्यैष्ठ्यायसव्व्रताᳪं। येऽअग्नयᳪंसमनसोन्तरा-
द्यावापृथिवीऽइमे। ग्रैष्म्मावृतूऽअभिकल्प्पमानाऽइन्द्रमिवदेवाऽअभि-
संव्विशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ ६ ॥ सजूर्ऋतुभिः
सजूर्व्विधाभिः सजूर्द्देवैःसजूर्द्देवैर्व्वयोनाधैरग्नयेत्वावैश्वानराया-
श्विनाद्ध्वर्यूसादयतामिहत्वासजूर्ऋतुभिः सजूर्व्विधाभिःसजूर्व्व-
सुभिᳪंसजूर्द्देवैर्व्वयोनाधैरग्नयेत्वाव्वैश्वानरायाश्विनाद्ध्वर्यूसाद-
यतामिहत्वासजूर्ऋतुभिःसजूर्व्विधाभिःसजूरुद्द्रैःसजूर्द्देवैर्व्वयोना-
धैरग्नयेत्त्वाव्वैश्वानरायाश्विनाद्ध्वर्यूसादयतामिहत्त्वासजूर्ऋतु-

भिं÷ सजूर्व्विधाभिं÷ सजूरादित्यैः सजूर्द्देवैर्व्वयोनाधैरग्नयेत्त्वाव्वै-
श्श्वानरायाश्श्विनाद्ध्रुवठर्ष्वंसादयतामिहत्त्वा सजूर्ऋतुभिं÷ सजूर्व्विधा-
भिं÷ सजूर्व्विश्श्वैर्द्देवैः सजूर्द्देवैर्व्वयोनाधैरग्नयेत्त्वाव्वैश्श्वानरायाश्श्वि-
नाद्ध्रुवठर्ष्वंसादयतामिहत्त्वा ॥ ७ ॥ प्प्राणम्मेपाह्यपानम्मेपाहिव्व्या-
नम्मेपाहिचक्क्षुर्म्मऽउर्व्व्याव्विभाहिश्श्रोत्रम्मेश्श्लोकय । अपःपिन्न्वौष-
धीर्ज्जिन्न्वद्द्विपादवचतुष्पात्पाहिदिवोव्वृष्टिमेरय ॥ ८ ॥ मूर्द्धाव्व-
यं ÷ प्रजापतिश्छन्दं ÷ क्षत्त्रंव्वयोमयन्दञ्छन्दोव्विष्टम्भोव्वयोधिप-
तिश्छन्दोव्विश्श्वकर्म्माव्वयं÷परमेष्ठीछन्दोबस्तोव्वयोव्विवलञ्छन्दो
व्वृष्णिर्व्वयोव्विशालञ्छन्दः पुरुषोव्वयस्तन्द्रञ्छन्दोव्व्याघ्रोव्वयोना-

धृष्टूञ्छन्दः सिꣳहोव्वयश्छदिश्छन्दः पष्ठवाड्वयो बृहतीच्छन्दऽउक्षाव्वयः ककुप्छन्दऽऋषभोव्वयः सतोबृहतीच्छन्दः ॥ ९ ॥ अनड्वान्व्वयः पङ्क्तिश्छन्दो धेनुर्व्वयो जगतीच्छन्दस्त्र्यविर्व्वयस्त्रिष्टुप्छन्दो दित्यवाड्वयो व्विराट्छन्दः पञ्चाविर्व्वयो गायत्रीच्छन्दस्त्रिवत्सोव्वयऽउष्णिकछन्दस्तुर्यवाड्वयो नुष्टुप्छन्दो लोकन्ताऽइन्द्रम्[1] ॥१०॥ इन्द्राग्नीऽअव्यथमानामिष्टकान्दृꣳहतंयुवम् । पृष्ठेनद्यावापृथिवीऽअन्तरिक्षञ्चविबाधसे ॥ ११ ॥ व्विश्वकर्म्मात्वासादयत्वन्तरिक्षस्यपृष्ठेव्यचस्वतीम्प्रथस्वतीमन्तरिक्षंयच्छान्तरिक्षन्दृꣳहान्तरि-

१—अ० १२ मं. ५४–५६, इत्यत्रापि पठनीयाः ।

क्षम्मा हिꣳसीः । विश्श्वस्म्मै प्प्राणायापानायव्व्यानायोदानायप्प्रति-
ष्ठायैचरित्राय । व्वायुष्ट्वाभिपातुमह्यास्वस्त्याच्छर्द्दिषाशन्तमेनत-
यादेवतयाङ्गिरस्वद्ध्रुवासीद ॥ १२ ॥ [शतम् ७००] राज्ञ्यसिप्प्रा-
चीदिग्विराडसिदक्षिणादिक्सम्म्राडसिप्प्रतीचीदिक्स्वराडस्युदीची-
दिगधिपत्न्यसिबृहतीदिक् ॥ १३ ॥ व्विश्श्वकर्म्मात्वासादयत्वन्तरि-
क्षस्यपृष्ठेज्ज्योतिष्मतीम् । विश्श्वस्म्मै प्प्राणायापानायव्व्यानाय
व्विश्श्वञ्ज्योतिर्य्यच्छ । व्वायुष्टेधिपतिस्तयादेवतयाङ्गिरस्वद्ध्रुवा-
सीद ॥ १४ ॥ नभश्चनभस्यश्श्चवार्षिकावृतूऽअग्नेरन्तःश्लेषोसिक-
ल्प्पेतान्द्यावापृथिवीकल्प्पन्तामापऽओषधयःकल्प्पन्तामग्नयःपृथङ्म-

मज्ज्यैष्ठ्यायसव्व्रताः । येऽअग्नयः समनसोन्तराद्द्यावापृथिवीऽइ-
मे । व्वार्षिकावृतूऽअभिकल्प्पमानाऽइन्द्रमिवदेवाऽअभिसंव्विशन्तु-
तयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ १५ ॥ इषश्श्चोर्ज्जश्श्चशारदावृतूऽ-
अग्नेरन्तःश्लेषोसिकल्प्पेतान्द्यावापृथिवीऽकल्प्पन्तामापऽओषधयः-
कल्प्पन्तामग्नयःपृथङ्मज्ज्यैष्ठ्यायसव्व्रताः । येऽअग्नयःसमनसो-
न्तराद्द्यावापृथिवीऽइमे । शारदावृतूऽअभिकल्प्पमानाऽइन्द्रमिवदे-
वाऽअभिसंव्विशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥१६॥ आयुर्म्मे
पाहिप्प्राणम्मेपाह्यपानम्मेपाहिव्व्यानम्मेपाहिचक्षुर्म्मेपाहिश्श्रोत्रम्मेपा-
हिव्वाचम्मेपिन्न्वमनोमेजिन्न्वात्त्मानम्मेपाहिज्ज्योतिर्म्मेयच्छ ॥१७॥

माच्छन्दः प्रमाच्छन्दः प्रतिमाच्छन्दोऽअस्रीवयश्छन्दः पङ्क्तिश्छन्दऽ-
उष्णिक्छन्दो बृहतीच्छन्दोऽनुष्टुप्छन्दो विराट्छन्दो गायत्रीच्छन्दस्त्रि-
ष्टुप्छन्दो जगतीच्छन्दः ॥ १८ ॥ पृथिवीच्छन्दोऽन्तरिक्षञ्छन्दो द्यौ-
श्छन्दः समाश्छन्दो नक्षत्राणिच्छन्दो वाक्छन्दो मनश्छन्दः कृषिश्छ-
न्दो हिरण्यञ्छन्दो गौश्छन्दोऽजाच्छन्दोऽश्वश्छन्दः ॥ १९ ॥ अग्निर्देवता-
वातो देवता सूर्यो देवता चन्द्रमा देवता वसवो देवता रुद्रा देवतादि-
त्या देवता मरुतो देवता विश्वे देवा देवता बृहस्पतिर्देवतेन्द्रो देवता व-
रुणो देवता ॥२०॥ मूर्द्धासि राड् ध्रुवासि धरुणा धर्त्र्यसि धरणी । आयुषे-
त्वा वर्चसे त्वा कृष्यै त्वा क्षेमाय त्वा ॥२१॥ यन्त्री राड् यन्त्र्यसि यमनी-

ध्रुवासिधरित्त्री । इषेत्त्वोर्ज्जेत्त्वारय्यैत्त्वापोषायत्त्वालोकन्ताऽइन्द्रम् ॥२२॥
आशुस्त्रिवृद्भान्तः पञ्चदशोव्योमासप्तदशोधरुणऽएकविꣳशः प्रतू-
र्त्तिरष्टादशस्तपोनवदशोभीवर्त्तः सविꣳशोवर्च्चोद्वाविꣳशः सम्भर-
णस्त्रयोविꣳशोयोनिश्चतुर्व्विꣳशोगर्ब्भाः पञ्चविꣳशऽओजस्त्रिणवः
क्क्रतुरेकत्रिꣳशः प्रतिष्ठात्त्रयस्त्रिꣳशोब्रध्नस्यविष्टपञ्चतुस्त्रिꣳ-
शोनाकः षट्त्रिꣳशोव्विवर्त्तोष्टाचत्वारिꣳशोधर्त्त्रञ्चतुष्टोमः ॥ २३ ॥
अग्नेर्ब्भागोसिदीक्षायाऽआधिपत्त्यम्ब्रह्मस्पृतन्त्रिवृत्स्तोमऽइन्द्रस्यभा-
गोसिव्विष्णोराधिपत्यङ्क्षत्रꣳ स्पृतम्पञ्चदशस्तोमोनृचक्षसाम्भागो-

---

१—अ. १२ म. ५४-५६ अत्रापि प्रतीकोक्ताः पठनीयाः ।

सिधातुराधिपत्यञ्जनित्रꣳस्पृतꣳसप्तदशस्तोमो मित्रस्य भागोसिव्व-
रुणस्याधिपत्यन्दिवोव्वृष्टिर्व्वातस्पृतऽएकविꣳशस्तोमः ॥ २४ ॥
व्वसूनाम्भागोसिरुद्द्राणामाधिपत्यञ्चतुष्पात्स्पृतञ्चतुर्विꣳशस्तोमः
आदित्यानाम्भागोसिमरुतामाधिपत्यङ्गर्भास्पृताः पञ्चविꣳशस्तोमो-
दित्यैभागोसिपूष्णऽआधिपत्यमोजस्पृतन्त्रिणवस्तोमो देवस्यसवितु-
र्भागोसिबृहस्पतेराधिपत्यꣳसमीचीर्दिशस्पृताश्चतुष्टोमस्तोमः
॥ २५ ॥ यवानाम्भागोस्ययवानामाधिपत्यम्प्रजास्पृताश्चतुश्चत्वा-
रिꣳशस्तोमऽऋभूणाम्भागोसिव्विश्वेषान्देवानामाधिपत्यम्भूतꣳस्पृ-
तन्त्रयस्त्रिꣳशस्तोमः ॥ २६ ॥ सहश्चसहस्यश्चहैमन्तिकावृतूऽअ-

ग्नेरन्तःश्लेषोसिकल्पेतान्द्यावापृथिवीकल्पन्तामापऽओषधयःकल्पं-
न्तामग्नयःपृथङ्ममज्ज्यैष्ठ्यायसव्व्रताः। येऽअग्नयःसमनसोन्तरा-
द्यावापृथिवीऽइमे। हैमन्तिकावृतूऽअभिकल्पमानाऽइन्द्रमिवदेवाऽ-
अभिसंव्विशन्तुतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम्॥ २७॥ एकयास्तु-
वतप्रजाऽअधीयन्तप्रजापतिरधिपतिरासीत्तिसृभिरस्तुवतब्ब्रह्मा-
सृज्ज्यतब्ब्रह्मणस्पतिरधिपतिरासीत्पञ्चभिरस्तुवतभूतान्न्यसृज्ज्य-
न्तभूतानाम्पतिरधिपतिरासीत्सप्तभिरस्तुवतसप्तऽऋषयोसृज्ज्यन्त-
धाताधिपतिरासीत्॥ २८॥ नवभिरस्तुवतपितरोसृज्ज्यन्तादि-
तिरधिपत्न्यासीदेकादशभिरस्तुवतऽऋतवोसृज्ज्यन्तार्त्तवाऽअधि-

पतयऽआसँस्त्रयोदशभिरस्तुवतमासाऽअसृज्ज्यन्तसंव्वत्सरोधिपति-
रासीत्पञ्चदशभिरस्तुवतक्षत्त्रमसृज्ज्यतेन्द्रोधिपतिरासीत्सप्तदश-
भिरस्तुवतग्राम्म्याः पशवोसृज्ज्यन्तबृहस्पतिरधिपतिरासीत् ॥ २९ ॥
नवदशभिरस्तुवतशूद्द्रार्य्यावसृज्ज्येतामहोरात्रेऽअधिपत्नीऽआस्ता-
मेकविंशत्यास्तुवतैकशफाः पशवोसृज्ज्यन्तव्वरुणोधिपतिरासीत्त्र-
योविंशत्यास्तुवतक्षुद्द्राः पशवोसृज्ज्यन्तपूषाधिपतिरासीत्पञ्चविंश-
त्यास्तुवतारण्याः पशवोसृज्ज्यन्तव्वायुरधिपतिरासीत्सप्तविंशा-
त्यास्तुवतद्द्यावापृथिवीव्व्यैतांव्वसवोरुद्द्राऽआदित्याऽअनुव्व्यायँ-
स्तऽएवाधिपतयऽआसन् ॥ ३० ॥ नवविंशत्यास्तुवतव्वनस्पतयो

सृज्ज्यन्तसोमोधिपतिरासीदेकत्रिꣳशतास्तुवतप्प्रजाऽअसृज्ज्यन्तय-
वाश्चायवाश्चाधिपतयऽआसँस्त्रयस्त्रिꣳशतास्तुवतभूतान्न्यशाम्म्य-
न्प्रजापतिꣳपरमेष्ठ्यधिपतिरासील्लोकन्ताऽइन्द्रम् ॥ ३१ ॥ इति
चतुर्दशोऽध्यायः ।

❀ अथ पञ्चदशोऽध्यायः ❀

ॐ अग्नेजातान्प्रणुदानꣳसपत्त्नान्प्रत्यजातान्नुदजातवेदः ।
अधिनोब्ब्रूहिसुमनाऽअहेडँस्तवस्यामशर्म्मंस्त्रिवरूथऽउद्भौ ॥ १ ॥

१—श्लोकम्पृण० ताऽअस्य० इन्द्रं विश्वा० (अ० १२ मन्त्र ५४-५६) सति सम्भवे पठनीयाः ।

सहसाजातान्प्रणुदानꣳसपत्नान्प्रत्यजाताञ्जातवेदोनुदस्व । अधि-
नोब्रूहिसुमनस्यमानोव्वयꣳस्यामप्रणुदानꣳसपत्नान् ॥ २ ॥ षो-
डशीस्तोमऽओजोद्द्रविणञ्चतुश्चत्वारिꣳशस्तोमोव्वर्च्चोद्द्रविणम् ।
अग्नेः पुरीषमस्यप्सोनामतान्त्वाव्विश्वेऽअभिगृणन्तुदेवाः । स्तोम-
पृष्ठाघृतवतीहसीदप्रजावदस्मेद्द्रविणायजस्व ॥ ३ ॥ एवश्छन्दोव्व-
रिवश्छन्दः शम्भूश्छन्दः परिभूश्छन्दऽआच्छच्छन्दोमनश्छन्दोव्यच-
श्छन्दःसिन्धुश्छन्दः समुद्द्रश्छन्दः सरिरञ्छन्दः ककुप्छन्दस्त्रि-
ककुप्छन्दः काव्यञ्छन्दोऽअङ्कुपञ्छन्दोक्षरपङ्क्तिश्छन्दः पदपङ्क्तिश्छ-
न्दोव्विष्टारपङ्क्तिश्छन्दः क्षुरोभ्भ्रजश्छन्दः ॥ ४ ॥ आच्छच्छन्दः प्र-

च्छच्छन्दः संयच्छन्दो वियच्छन्दो बृहच्छन्दो रथन्तरञ्छन्दो निकाय-
श्छन्दो विवधश्छन्दो गिरश्छन्दो भ्रजश्छन्दः सँस्तुप्छन्दोऽनुष्टुप्छ-
न्दऽएवश्छन्दो वरिवश्छन्दो वयश्छन्दो वयस्कृच्छन्दो विष्पर्द्धाश्छन्दो
विशालञ्छन्दश्छदिश्छन्दो दूरोहणञ्छन्दस्तन्द्रञ्छन्दोऽअङ्काङ्कश्छन्दः
॥ ५ ॥ रश्मिना सत्याय सत्यञ्जिन्व प्रेतिना धर्म्मणा धर्म्मञ्जिन्वान्वि-
त्या दिवा दिवञ्जिन्व सन्धिनान्तरिक्षेणान्तरिक्षञ्जिन्व प्रतिधिना पृथि-
व्या पृथिवीञ्जिन्व विष्टम्भेन वृष्ट्या वृष्टिञ्जिन्व प्रवयाह्नाहर्जिन्वा-
नुया रात्र्या रात्रीञ्जिन्वोशिजा वसुभ्यो वसूञ्जिन्व प्रकेतेनादित्ये-
भ्यऽआदित्याञ्जिन्व ॥ ६ ॥ तन्तुना रायस्पोषेण रायस्पोषञ्जिज-

न्न्वस्व सुपर्णंश्अलायंश्शृतञ्जिन्न्वैडेनौषधीभिरोषधीर्जिन्न्वोत्तमेनं-
तनूभिस्तनूर्जिन्न्वव्वयोधसाधीतेनाधीतञ्जिन्न्वाभिजितातेजसाते-
जोजिन्न्व ॥ ७ ॥ प्रतिपदसिप्प्रतिपदेत्वानुपदस्यनुपदेत्वासम्पदसि
सम्पदेत्वातेजोसितेजसेत्वा ॥ ८ ॥ त्रिवृदसित्रिवृतेत्वाप्प्रवृदसिप्प्र-
वृतेत्वाव्विवृदसिव्विवृतेत्वासवृदसिसवृतेत्वाक्क्रमोस्याक्क्रमायत्वा-
सङ्क्रमोसिसङ्क्रमायत्वोत्क्क्रमोस्युत्क्क्रमायत्वोत्क्क्रान्तिरस्युत्क्क्रा-
न्त्यैत्वाधिपतिनोर्ज्जोर्ज्जञ्जिन्न्व ॥ ९ ॥ राज्ञ्यसिप्प्राचीदिग्ग्वसवस्ते
देवाऽअधिपतयोग्ग्निर्हेतीनाम्प्प्रतिधर्त्तात्त्रिवृत्त्वास्तोमः पृथिव्व्याᳪ-
श्रयत्त्वाज्ज्यमुक्क्थमव्व्यथायैस्तब्भ्नातुरथन्तरᳪसामप्प्रतिष्ठित्याऽ-

अन्तरिक्षऽऋषयस्त्वाप्रथमजादेवेषुदिवोमात्रयाव्वरिम्णाप्प्रथन्तु
व्विधर्त्ताचायमधिपतिश्चतेत्त्वासर्वैसंव्विदानानाकस्यपृष्ठेस्वर्गेलोके-
यजमानञ्चसादयन्तु ॥ १० ॥ व्विराडसिदक्षिणादिग्रुद्रास्तेदेवाऽ-
अधिपतयऽइन्द्रोहेतीनाम्प्रतिधर्त्तापञ्चदशस्त्वास्तोमः पृथिव्याँ-
श्रयतुप्प्रऽउगमुक्थमव्व्यथायैस्तभ्नातुबृहत्सामप्प्रतिष्ठित्याऽअन्त-
रिक्षऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्रयाव्वरिम्णाप्प्रथन्तुव्विधर्त्ता
चायमधिपतिश्चतेत्त्वासर्वैसंव्विदानानाकस्यपृष्ठेस्वर्गेलोकेयजमा-
नञ्चसादयन्तु ॥ ११ ॥ सम्म्राडसिप्प्रतीचीदिगादित्यास्तेदेवाऽअ-
धिपतयोव्वरुणोहेतीनाम्प्रतिधर्त्तासप्तदशस्त्वास्तोमः पृथिव्याँ-

श्रंयतुमरुत्त्वतीयमुक्कथमव्व्यंथायैस्तब्भ्नातुव्वैरूपꣳसामप्प्रतिष्ठि॑त्या॑ऽअन्तरि॑क्षऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्त्रंयाव्वरिम्णाप्प्रंथन्तुव्विधर्त्ताचायमधिपतिश्चतेत्वासव्वेंसंव्विदानानाकस्यपृष्ठेस्वर्ग्गेंलोकेयजमानञ्चसादयन्तु ॥१२॥ स्वराडस्युदीचीदिङ्मरुतस्तेदेवाऽअधिपतयꣳसोमोहेतीनाम्प्रतिधर्त्तैकव्विꣳशस्त्वास्तोमः पृथिव्याꣳश्रंयतुनिष्क्कैवल्यमुक्कथमव्व्यंथायैस्तब्भ्नातुव्वैराजꣳसामप्प्रतिष्ठित्याऽअन्तरिक्षऽऋषयस्त्वाप्प्रथमजादेवेषुदिवोमात्त्रंयाव्वरिम्णाप्प्रंथन्तुव्विधर्त्ताचायमधिपतिश्चतेत्त्वासव्वेंसंव्विदानानाकस्यपृष्ठेस्वर्ग्गेंलोकेयजमानञ्चसादयन्तु ॥ १३ ॥ अधिपत्न्यसिबृहतीदि-

ग्विश्श्वे ते देवा ऽअधिपतयो बृहस्प्पतिर्हेतीनाम्प्रतिधर्त्ता त्रिणवत्त्रय-
स्त्रिᳬशौ त्वा स्तोमौ पृथिव्व्याᳬश्रयतां व्वैश्श्वदेवाग्निमारुते ऽउक्थे ऽअ-
व्यथायै स्तभ्नीताᳬशाक्वररैवते सामनी प्रतिष्ठित्या ऽअन्तरिक्ष ऽऋष-
यस्त्वा प्प्रथमजा देवेषु दिवो मात्त्रया व्वरिम्णा प्प्रथन्तु व्विधर्त्ता चायमधि-
पतिश्च ते त्वा सर्व्वे संव्विदाना नाकस्य पृष्ठे स्वर्ग्गे लोके यजमानञ्च साद-
यन्तु ॥ १४ ॥ अयम्पुरो हरिकेशः सूर्य्यरश्मिस्तस्य रथगृत्सश्च रथौ-
जाश्च सेनानीग्ग्रामण्यौ । पुञ्जिकस्थला च क्रतुस्थला चाप्सरसौ
दङ्क्ष्णवः पशवो हेतिः पौरुषेयो व्वधः प्प्रहेतिस्तेभ्यो नमो ऽअस्तु ते नो-
वन्तु ते नो मृडयन्तु ते यन्द्विष्मो यश्च नो द्वेष्टि तमेषाञ्जम्भे दध्मः ॥ १५ ॥

अयन्दक्षिणाव्विश्वकर्म्मातस्यरथस्वनश्चरथेचित्रश्चसेनानीग्राम-
ण्ण्यौ । मेनकाचसहजन्याचाप्प्सरसौयातुधानाहेतीरक्षाꣳसिप्प्रहे-
तिस्तेभ्भ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्द्वे-
ष्टितमेषाञ्जम्भेदध्मः ॥१६॥ अयम्पश्चाद्विश्वव्व्यचास्तस्यरथप्प्रोत-
श्चासमरथश्चसेनानीग्रामण्ण्यौ । प्रम्लोचन्तीचानुम्लोचन्तीचा-
प्प्सरसौव्व्याघ्राहेतिःसर्प्पाःप्प्रहेतिस्तेभ्भ्योनमोऽअस्तुतेनोवन्तुतेनो-
मृडयन्तुतेयन्द्विष्मोयश्चनोद्द्वेष्टितमेषाञ्जम्भेदध्मः ॥ १७ ॥ अ-
यमुत्तरात्संयद्द्वसुस्तस्यतार्क्ष्यश्चारिष्टनेमिश्चसेनानीग्रामण्ण्यौ ।
व्विश्वाचीचघृताचीचाप्प्सरसावापोहेतिर्व्वातःप्प्रहेतिस्तेभ्भ्योनमोऽ-

अस्तुतेनोँवन्तुतेनोँमृडयन्तुतेयन्दि्‌द्वष्मोयश्चचंनोद्‌द्वेष्ट्टितमेँषाञ्जम्भे
दध्मः ॥ १८ ॥ अयमुपरय्य्व्वाग्ग्वसुस्तस्यंसेनजिच्चंसुषेणंश्चचसेनानी-
ग्ग्रामण्ण्यौ । उर्व्वशीचपूर्व्वचित्तिश्चाप्सरसावबस्फूर्ज्जन्हेतिर्व्वि-
द्युत्प्रहेँतिस्तेभ्योनमोऽअस्तुतेनोँवन्तुतेनोँमृडयन्तुतेयन्दि्‌द्वष्मोय-
श्चचंनोद्‌द्वेष्ट्टितमेँषाञ्जम्भेदध्मः ॥ १६ ॥ अग्गिनम्मूर्द्धादिवःकक-
त्पतिःपृथिव्व्याऽअयम् । अपाᳪरेताᳪसिजिन्न्वति ॥ २० ॥ अयम-
ग्गिनःसहस्त्रिणोव्वाजस्यशतिनस्प्पतिः । मूर्द्धाकवीरयीणाम् ॥२१॥
त्वामंग्गनेपुष्कराद्दध्यथर्व्वानिरमन्न्थत । मूर्द्ध्नोव्विश्श्वस्यव्वा-
घतः ॥ २२ ॥ भुवोयज्ञस्यरजसश्चनेतायत्त्रानियुद्धिःसचंसेशि-

वाभिः । दिविमूर्द्धानन्दधिषेस्वर्षाञ्जिह्वामग्गनेचकृषेहव्व्यवाहम्
॥ २३ ॥ अबोद्ध्यग्गिनः समिधाजनानाम्प्रतिधेनुमिवायतीमुषासम् ।
यह्वाऽइवप्प्रवयामुज्जिहानाः प्रभानवः सिस्रतेनाकमच्छ ॥ २४ ॥
अवोचामकवयेमेद्ध्यायव्वचोव्वन्दारुव्वृषभायव्वृष्णे । गविष्ठिरोन-
मसास्तोममग्नौदिवीवरुक्ममुरुव्ययञ्चमश्रेत् ॥ २५ ॥ अयमिहप्प्रथ-
मोधायिधातृभिर्होतायजिष्ठोऽअद्ध्वरेष्वीड्यः । यमप्नवानोभृग-
वोव्विरुरुचुर्व्वनेषुचित्रव्विभ्वंव्विशेविशे ॥ २६ ॥ जनस्यगोपाऽअज-
निष्टजागृविरग्निः सुदक्षः सुवितायनव्यसे । घृतप्प्रतीकोबृहतादि-
विस्पृशाद्द्युमद्विभातिभरतेब्भ्यः शुचिः ॥ २७ ॥ त्वामग्गनेऽअङ्गि-

रसोगूहाहितमन्न्वविन्दञ्छिश्रयाणंव्वनेवने । सजायसेमत्थ्यमानꣳ
सहोमहत्त्वामाहुꣳसहसस्पुत्रमङ्गिरꣳ ॥ २८ ॥ सखायꣳसंव्व÷सम्य-
ञ्चमिषꣳस्तोमञ्चाग्नये । व्वर्षिष्ठायक्षितीनामूर्ज्जोनप्त्रेसहस्वते
॥ २९ ॥ सꣳसमिद्युवसेव्वृषन्नग्नेव्विश्श्वान्न्यर्य्यआ । इडस्पदेस-
मिद्ध्यसेसनोव्वसून्न्याभर ॥ ३० ॥ त्वाञ्चित्रश्श्रवस्तमहवन्तेव्विक्षुज-
न्तव÷ । शोचिष्ककेशम्पुरुप्प्रियाग्नेहव्व्यायव्वोढवे ॥ ३१ ॥ एनावोऽ-
अग्निन्नमसोर्ज्जोनपातमाहुवे। प्रियञ्चेतिष्ठमरतिꣳस्वद्ध्वरंव्विश्श्वस्य
दूतममृतम् ॥३२॥ व्विश्श्वस्यदूतममृतंव्विश्श्वस्यदूतममृतम्। सयोजतेऽ-
अरुषाव्विश्श्वभोजसासदुद्द्रवत्स्वाहुतꣳ ॥३३॥ सदुद्द्रवत्स्वाहुतꣳसदु-

द्द्रवत्स्वाहुतꣳ । सुब्ब्रह्मायज्ञः सुशमीव्वसूनान्देवꣳराधोजनानाम्
॥ ३४ ॥ अग्ग्नेव्वाजस्यगोमतऽईशानꣳसहसोयहो । अस्मेधेहिजातवे-
दोमहिश्श्रवः ॥ ३५ ॥ सऽइंधानोव्वसुष्क्कविरग्निरीडेन्न्योगिरा ।
रेवदस्म्मब्भ्यम्पुर्व्वणीकदीदिहि ॥ ३६ ॥ क्षपोराजन्नुतत्त्मनाग्ग्नेव्व-
स्तोरुतोषसः । सतिग्ग्मजम्भरक्षसोदहप्प्रति ॥ ३७ ॥ भद्द्रोनोऽअ-
ग्निराहुतोभद्द्रारातिःसुभगभद्द्रोऽअद्ध्वरः । भद्द्राऽउतप्प्रशस्तयꣳ
॥ ३८ ॥ भद्द्राऽउतप्प्रशस्तयोभद्द्रम्मनः कृणुष्व्वव्वृत्रतूर्य्ये । येना-
समत्सुसासहः ॥ ३९ ॥ येनासमत्सुसासहोवस्थिरातनुहिभूरिश-
र्द्धताम् । व्वनेमातेऽअभिष्टिभिꣳ ॥ ४० ॥ अग्ग्निन्तम्मन्न्येयोव्वसुर-

स्तꣳयꣳयन्तिधेनव÷ । अस्तमर्व्वन्तऽआशवोस्तन्नित्यासोव्वाजिनऽ-
इषꣳस्तोतृभ्यऽआभर ॥४१॥ सोअग्निर्य्योव्वसुर्गृणेसंयमायन्तिधे-
नव÷ । समर्व्वन्तोरघुद्द्रुवꣳसꣳसुजातास÷सूरयऽइषꣳस्तोतृभ्यऽ-
आभर ॥ ४२ ॥ उभेसुश्चन्द्रसर्प्पिषोदर्व्वी श्रीणीषऽआसनि । उतो-
नऽउत्पुपूर्य्याऽउक्क्थेषुशवसस्पतऽइषꣳस्तोतृभ्यऽआभर ॥ ४३ ॥
अग्नेतमद्द्याश्श्वन्नस्तोमैꣳक्क्रतुन्नभद्द्रꣳहृदिस्पृशम् । ऋद्ध्यामात-
ऽओहैꣳ ॥ ४४ ॥ अधाह्यग्नेक्क्रतोर्ब्भद्द्रस्यदक्षस्यसाधो÷ । रथी-
ऽऋतस्यबृहतोबभूथ ॥ ४५ ॥ एभिर्न्नोऽअर्क्कैर्ब्भवानोऽअर्व्वाङ्क्स्व-
र्ण्णज्ज्योति÷ । अग्नेव्विश्वेभिꣳसुमनाऽअनीकैः ॥ ४६ ॥ अग्निꣳ

होतारम्मन्न्येदास्वन्तंव्वसुं॑ᳬसूनुᳬसहसोजातवेदसंव्विप्प्रन्नजातवेद-
सम् । यऽऊर्द्ध्वयास्वद्ध्वरोदेवोदेवाच्च्याकृपा । घृतस्यविब्भ्राष्ट्टि-
मनुवष्ट्टिशोचिषाजुह्वानस्यसर्प्पिषः ॥ ४७ ॥ अग्ग्नेत्वन्नोऽअन्तमऽ-
उतत्त्राताशिवोभवाव्वरूत्थ्यः । व्वसुरग्ग्निर्व्वसुश्श्रवाऽअच्छानक्षि-
द्युमत्तमᳬरयिन्दाः । तन्त्वाशोचिष्ट्ठदीदिवᳬसुम्म्नायनूनमीमहेसखि-
ब्भ्यः ॥ ४८ ॥ येनऽऋषयस्तपसासत्रमायन्निन्धानाऽअग्निᳬस्वराभ-
रन्तः । तस्मिन्नहन्निदधेनाकेऽअग्निंयमाहुर्म्मनवस्तीर्णबर्हिषम् ॥४९॥
तम्पत्नीभिरनुगच्छेमदेवाᳬपुत्त्रैर्ब्भ्रातृभिरुतवाहिरण्ण्यैः । नाकङ्गृ-
भ्णानाᳬसुकृतस्यलोकेतृतीयेपृष्ठेऽअधिरोचनेदिवः ॥ ५० ॥ आवाचो-

मद्ध्यंमरुहद्भुरण्ण्युरयमग्निःस्त्पतिश्चेकितानः । पृष्ठेपृथिव्व्या-
निहितोदविद्युतदधस्पदङ्कृणुतांठ्येपृतन्न्यवं ÷ ॥ ५१ ॥ अयमग्नि-
र्व्वीरतमोव्वयोधाःसंहस्त्रियोद्द्योततामप्प्रयुच्छन् । विभ्राजमानः
सरिरस्यमद्ध्यऽउपप्प्रयाहिदिव्व्यानिधामं ॥ ५२ ॥ सम्प्रच्यवद्ध्व-
मुपसम्प्रयाताग्नेपथोदैवयानान्कृणुद्ध्वम् । पुनं ÷ कृण्ण्वानापितरा-
युवानान्वाताꣳसीत्त्वयितन्तुमेतम् ॥ ५३ ॥ उद्बुंद्ध्यस्वाग्नेप्प्रति-
जागृहित्वमिष्टापूर्त्तेसꣳसृंजेथामयञ्च । अस्मिन्त्सधस्त्थेऽअद्ध्युत्तं-
रस्मिन्विश्श्वेदेवायजंमानश्चसीदत ॥ ५४ ॥ येनव्वहंसिसहस्त्रंये-
नाग्नेसर्व्ववेदसम् । तेनेमंयज्ञन्नोनयस्वर्द्देवेषुगन्तवे ॥ ५५ ॥ अयन्ते

योनिऽर्ऋत्वियो यतो जातोऽअरोचथाः। तञ्जानन्नग्नऽआरोहाथा नो वर्द्धया रयिम् ॥ ५६ ॥ तपश्च तपस्यश्च शैशिरावृतूऽअग्नेरन्तःश्लेषोऽसि कल्पेतान्द्यावापृथिवी कल्पन्तामापऽओषधयः कल्पन्तामग्नयः पृथङ्मम ज्यैष्ठ्याय सव्रताः। येऽअग्नयः समनसोऽन्तरा द्यावापृथिवीऽइमे। शैशिरावृतूऽअभिकल्पमानाऽइन्द्रमिव देवाऽअभिसंविशन्तु तया देवतयाङ्गिरस्वद्ध्रुवे सीदतम् ॥ ५७ ॥ परमेष्ठी त्वा सादयतु दिवस्पृष्ठे ज्योतिष्मतीम्। विश्वस्मै प्राणायापानाय व्यानाय विश्वञ्ज्योतिर्यच्छ। सूर्यस्तेऽधिपतिस्तया देवतयाङ्गिरस्वद्ध्रुवा सीद ॥ ५८ ॥ लोकम्पृण च्छिद्रम्पृणाथो सीद ध्रुवा त्वम्। इन्द्राग्नी

त्वाबृहस्पतिरस्मिन्न्योनावसीषदन् ॥ ५९ ॥ ताऽअस्यसूददोहसः
सोमँ᳚श्रीणन्तिपृश्नयः । जन्मन्देवानांव्विशस्त्रिष्वारोचनेदिवः
॥ ६० ॥ इन्द्रंव्विश्वाऽअवीवृधन्त्समुद्रव्व्यचसङ्गिरः । रथीतमᳬरथीनांव्वाजानाँ᳚सत्पतिम्पतिम् ॥ ६१ ॥ प्रोथदश्वोनयवसेविष्ष्यन्न्यदामहः संव्वरणाद्व्यस्थात् । आदस्यव्वातोऽअनुवातिशोचिरधस्ममतेव्व्रजनङ्कृष्णमस्ति ॥ ६२ ॥ आयोष्ट्वासदनेसादयाम्म्यवतश्छायायाँ᳚समुद्रस्यहृदये । रश्मीवतीम्भास्वतीमायाद्द्याम्भास्यापृथिवीमोर्व्वन्तरिक्षम् ॥ ६३ ॥ परमेष्ठीत्वासादयतुदिवस्पृष्ठेव्व्यचस्वतीम्प्रथस्वतीन्दिवंयच्छदिवन्दृᳬहदिवम्माहिᳬसीः । व्विश्व-

स्म्मैप्प्राणायापानायँव्व्यानायोदानायँप्प्रतिष्ठायैचरित्राय । सूर्य्यस्त्वाभिपातुमह्यास्वस्त्याच्छर्दिषाशन्तमेनतयादेवतयाङ्गिरस्वद्ध्रुवेसीदतम् ॥ ६४ ॥ सहस्रस्यप्प्रमासिसहस्रस्यप्प्रतिमासिसहस्रस्योन्मासिसाहस्रोसिसहस्रायत्त्वा ॥ ६५ ॥ इति पञ्चदशोऽध्यायः ।

❀ अथ षोडशोऽध्यायः ❀

ॐ नमस्तेरुद्द्रमन्न्यवऽउतोतऽइषवेनमः । बाहुब्भ्यामुततेनमः ॥ १ ॥ यातेरुद्द्रशिवातनूरघोरापापकाशिनी । तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ २ ॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्य-

स्तवे। शिवाङ्गिरित्रनाङ्कुरुमाहिंᳫंसीᳫंपुरुषञ्जगत् ॥ ३ ॥ शिवेनव्व-चंसात्त्वागिरिशाच्छाव्वदामसि । यथानᳫंसव्र्वमिज्जगदयक्ष्मᳫंसुम-नाऽअसत् ॥ ४ ॥ अद्ध्यवोचदधिवक्ताप्प्रथमोदैव्योभिषक् । अहीँश्च

१—'कक्कारान्ते टक्कारान्ते ङणे तर्जनिकां नमेत्। पञ्चाङ्गुल्यस्पकारे च तक्कारे कुण्डलाकृतिः। (या० शि० श्लो० ६२) 'अध्यवोच० षक्' (शु० य० सं० १६।५) इत्यादिस्थले। टकारे—'सᳫंस्रवभ्भाट्' (२।१८) इत्यादौ। ङणयोस्तूदाहरणे पदपाठवतो ज्ञेये। तथाहि–ङकारे–'दध्यङ्' (११।३०) इत्यादौ। णकारे–'व्वृषण्वस इति' वृषण् (११।११) इत्यादौ। पकारे—'गायत्री त्रिष्टुप्' (२३।३३) इति प्रतीकोदाहरणम्। तकारे–'सह० पात्' (३।१) इत्यादिस्थले।

२—'अहीन् च' अत्र 'चछयोः शम्' इत्यनेन चकारछकारयोः प्रत्ययोः (परयोः)

सर्व्वाँश्चजम्भयन्त्सर्व्वाँश्चयातुधान्न्योधराचीः परासुव ॥ ५ ॥ असौ-
यस्ताम्म्रोऽअरुणऽउतबभ्रुः सुमङ्गलः । येचैनᳬरुद्द्राऽअभितोदि-
क्षुश्रिताः सहस्रशोवैषाᳬहेडऽईमहे ॥ ६ ॥ असौयोवसर्प्पतिनीलग्ग्रो-
वोव्विलोहितः । उतैनङ्गोपाऽअदृश्श्रन्नदृश्श्रन्नुदहार्य्यः सदृष्टोमृड-
यातिनः ॥ ७ ॥ नमोस्तुनीलग्ग्रीवायसहस्राक्षायमीढुषे । अथोयेऽअ-
स्यसत्त्वानोहन्तेब्भ्योकरन्नमः ॥ ८ ॥ प्रमुञ्चधन्न्वनस्त्वमुभयोरा-
र्त्त्न्योर्ज्ज्याम् । याश्चतेहस्तऽइषवः परातान्भगवोव्वप ॥ ९ ॥ वि-

---

नकारमापद्यते उपधाचानुस्वारेण व्यवधीयते । छकारोदाहरणे तु मूलं मृग्यम् । किन्तु रूपोदाहरणं विद्यते विद्वान् छकारः, द्विद्वाँश्छकारः ।

उज्ज्यन्धनु॑÷कप॒र्द्दिनो॒व्विश॑ल्ल्यो॒बाण॑वाँ २ उ॒त । अनेशन्नस्य॒याऽइषवऽ-
आ॒भुर॑स्यनिषङ्ग॒धिः ॥ १० ॥ याते॑हे॒तिर्म्मी॑दुष्टमहस्तेबभूव॒ते॒धनु॑÷ ।
तयास्म्मा॒न्विश्श्वत॒स्त्वम॑यक्ष्म॒म॒यापरि॑भुज ॥ ११ ॥ परि॑ते॒धन्न्व॑नो-
हे॒तिरस्म्मान्व्वृ॑णक्तु॒व्विश्श्व॑तं÷ । अथो॒यऽइ॑षु॒धिस्तवा॒रेऽअस्म्मन्नि-
धे॑हि॒तम् ॥ १२ ॥ अ॒व॒तत्य॒धनु॒ष्ट्व॑सहस्राक्ष॒शते॑षुधे । नि॒शीर्य॑शल्ल्या-
नाम्मुखाशि॒वोन॑÷सुमनाभव ॥ १३ ॥ नम॑स्तऽआयु॑धाया॒नाततायधृ॒-
ष्णवे॑ । उ॒भाभ्या॑मु॒ततेनमो॑बाहु॒भ्या॒न्तव॒धन्न्व॑ने ॥ १४ ॥ मानो॑महा-
न्त॑मु॒तमानो॑ऽअर्भ॒कम्मान॒ऽउक्ष॑न्तमु॒तमान॑ऽउक्षि॒तम् । मानो॑व्वधीः
पि॒तरम्मो॒तमा॒तरम्मान॑÷प्प्रि॒यास्त॒न्न्वो॑रुद्द्ररीरिषः ॥ १५ ॥ मान॑-

स्तोके। तन॑येमान॒ऽआयु॑षिमानो॒गोषु॒मानो॒ऽअश्वे॑षुरीरिषः। मानो॑-
व्वीरान्रुद्रभामिनोव्वधीर्ह॒विष्म॑न्त॒ꣳसद॒मित्त्वा॑हवामहे ॥ १६ ॥
[शतम् ८००] नमो॒हिर॑ण्यबाहवेसेना॒न्न्येदि॒शाञ्च॒पत॑येनमो॒नमो॑-
वृक्षेभ्यो॒हरि॑केशेभ्यःपशू॒नाम्पत॑येनमो॒नमः॑ शष्पिञ्ज॑राय॒त्त्विषी॑म-
तेपथी॒नाम्पत॑येनमो॒नमो॒हरि॑केशायोपवी॒तिने॑पुष्टा॒नाम्पत॑येनमः॑ ॥१७॥
नमो॑बभ्लु॒शाय॑व्व्या॒धिनेन्ना॒नाम्पत॑येनमो॒नमो॑भ॒वस्य॑हे॒त्यैजग॑ताम्पत॑-
येनमो॒नमो॑रु॒द्राया॑तता॒यिनेक्षेत्रा॒णाम्पत॑येनमो॒नमः॑ सू॒तायाह॑न्त्यैव्व-
ना॒नाम्पत॑येनमः॑ ॥ १८ ॥ नमो॒रोहि॑ताय॒स्थप॑तयेवृ॒क्षाणाम्पत॑येन-
मो॒नमो॑भुव॒न्तये॑व्वारिवस्कृ॒तायौष॑धीना॒म्पत॑येनमो॒नमो॑म॒न्त्रिणे॑व्वाणि-

जायकक्षाणाम्पतयेनमोनमऽउच्चैर्घोषायाक्क्रन्दयतेपत्तीनाम्पतये-
नमः ॥ १९ ॥ नमः कृत्स्नायतयाधावतेसत्त्वनाम्पतयेनमोनमः सह-
मानायनिव्याधिनऽआव्याधिनीनाम्पतयेनमोनमोनिषङ्गिणेककुभा-
यस्तेनानाम्पतयेनमोनमोनिचेरवेपरिचरायारण्यानाम्पतयेनमः ॥२०॥
नमोव्वञ्चतेपरिव्वञ्चतेस्तायूनाम्पतयेनमोनमोनिषङ्गिणऽइषुधिमतेत-
स्कराणाम्पतयेनमोनमः सृकायिभ्योजिघांᳪ सद्भ्योमुष्णताम्पत-
येनमोनमोसिमद्भ्योनक्तञ्चरद्भ्योव्विकृन्तानाम्पतयेनमः ॥ २१ ॥
नमऽउष्णीषिणेगिरिचरायकुलुञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्न्वा
यिभ्यश्चवोनमोनमऽआतन्न्वानेभ्यः प्रतिदधानेभ्यश्चवोनमोन-

मंऽआयच्छद्भ्योस्यंद्भ्यश्चवोनमोनमं ॥ २२ ॥ नमोविसृजद्भ्यो-
विद्ध्यंद्भ्यश्चवोनमोनमं स्वपद्भ्योजाग्रंद्भ्यश्चवोनमोनमंश-
यानेभ्यऽआसीनेभ्यश्चवोनमोनमस्तिष्ठंद्भ्योधावंद्भ्यश्चवोनमं
॥ २३ ॥ नमं सभाभ्यं सभापतिभ्यश्चवोनमोनमोश्वेभ्योश्वं-
पतिभ्यश्चवोनमोनमंऽआव्याधिनीभ्योविविद्ध्यंन्तीभ्यश्चवोन-
मोनमऽउगंणाभ्यस्तृंहतीभ्यश्चवोनमं ॥ २४ ॥ नमोगणेभ्यो
गणपंतिभ्यश्चवोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमोनमोगृ-
त्सेभ्योगृत्संपतिभ्यश्चवोनमोनमोविरूपेभ्योविश्वरूपेभ्यश्च-
वोनमं ॥ २५ ॥ नमंसेनाभ्यंसेनानिभ्यंश्चवोनमोनमोरथिभ्यो-

ऽअरथेब्भ्यश्चवोनमोनमः÷क्षत्तृब्भ्यः÷ सङ्ग्रहीतृब्भ्यश्चवोनमोनमोम-
हद्भ्योऽअर्भकेब्भ्यश्चवोनमः÷ ॥ २६ ॥ नमस्तक्षब्भ्योरथकारेब्भ्य-
श्चवोनमोनमँ कुलालेब्भ्यँ कर्म्मारेब्भ्यश्चवोनमोनमोनिषादेब्भ्यः÷ पु-
ञ्जिष्ठेब्भ्यश्चवोनमोनमः÷ श्वनिब्भ्योमृगयुब्भ्यश्चवोनमः÷ ॥ २७ ॥
नमँ श्वब्भ्यँ श्वपतिब्भ्यश्चवोनमोनमोभवायचरुद्द्रायचनमः÷ शर्व्वा-
यचपशुपतयेचनमोनीलग्ग्रीवायचशितिकण्ठायच ॥ २८ ॥ नमः÷ क-
पर्द्दिनेचव्युप्तकेशायचनमः÷ सहस्राक्षायचशतधन्न्वनेचनमोगिरिश-
यायचशिपिविष्टायचनमोमीढुष्टमायचेषुमतेच ॥ २९ ॥ नमोह्र-
स्वायचवामनायचनमोबृहतेचवर्षीयसेचनमोवृद्धायचसवृधेचन-

मोग्न्यायचप्रथमायंच ॥ ३० ॥ नमंऽआशवैचाजिरायंचनमंःशी-
घ्न्यायचशीभ्यायचनमऽऊर्म्म्यायचावस्वन्न्यायचनमोनादेयायंच-
द्वीप्यायच ॥ ३१ ॥ नमोंज्येष्ठायंचकनिष्ठायंचनमंःपूर्व्वजायं-
चापरजायंचनमोमद्ध्यमायंचापगल्भायंचनमो जघन्न्यायचबुध्न्या-
यच ॥ ३२ ॥ नमंःसोभ्यायचप्रतिसर्य्यायचनमोयाम्म्यायचक्षे-
म्म्यायचनमंःश्लोक्यायचावसान्न्यायचनमंऽउर्व्वर्य्यायचखल्ल्यायच
॥ ३३ ॥ नमोवन्न्यायचकक्ष्यायचनमंःश्रवायंचप्रतिश्रवायंचनमंऽ-
आशुषेणायचाशुरंथायचनमंःशूरायचावभेदिनेंच ॥ ३४ ॥ नमोबि-
ल्मिनेंचकवचिनेंचनमोंवर्म्मिणेंचवरूथिनेंचनमंःश्रुतायंचश्रुतसे-

नायचनमोदुन्दुब्भ्यायचाहनन्न्यायच ॥ ३५ ॥ नमोधृष्ष्णवेचप्रमृशा-
यचनमोनिषङ्गिणेचेषुधिमतेचनमस्तीक्ष्णेषवेचायुधिनेचनमः स्वायु-
धायचसुधन्न्वनेच ॥३६॥ नमः स्रुत्यायचपत्थ्यायचनमः काट्यायचनी-
प्प्यायचनमः कुल्यायचसरस्यायचनमोनादेयायचव्वैशन्तायच ॥३७॥
नमः कूप्प्यायचावट्यायचनमोव्वीध्ध्रयायचातप्प्यायचनमोमेग्घ्याय-
चव्विद्युत्यायचनमोव्वर्ष्यायचावर्ष्यायच ॥ ३८ ॥ नमोव्वात्याय-
चरेष्म्यायचनमोव्वास्तव्व्यायचव्वास्तुपायचनमः सोमायचरुद्द्रा-

१—'भवे छन्दसि' ४।४।११० । इति सूत्रेण यत्प्रत्यये ।

यंचनमंस्ताम्म्रायंचारुणायंच ॥ ३९ ॥ नमंः शङ्गवेच पशुपतयेचनमंऽ-
उग्ग्रायंचभीमायंचनमोंऽग्ग्रेवधायंचदूरेवधायंचनमोंहन्त्रेचहनींयसेच-
नमोंव्वृक्षेब्भ्योहरिकेशेब्भ्योनमंस्तारायं ॥४०॥ नमंः शम्भवायंचमयोभ-
वायंचनमंः शङ्करायंचमयस्करायंचनमंः शिवायंचशिवतंरायच ॥४१॥
नमंः पार्य्यायचावार्य्यायचनमंः प्प्रतरंणायचोत्तरंणायचनमस्तीर्त्थ्यां-
यचकूल्ल्यायचनमंः शष्प्यायचफेन्न्यायच ॥४२॥ नमंः सिकत्यायचप्र-
वाह्यायचनमंः किᳬशिलायंचक्षयणायंचनमंः कपर्द्दिनेचपुलस्तयेचन-
मंऽइरिण्यायचप्प्रपत्थ्यायच ॥४३॥ नमोंव्व्रज्ज्यायचगोष्ट्ठ्यायचनम-
स्तल्प्यायचगेह्यायचनमोहृदय्यायचनिवेष्प्यायचनमंः काट्ट्यायच-

गह्व्ररेष्ठायच ॥४४॥ नमःशुष्क्क्यायचहरित्यायचनमः पा७सव्व्या-
यचरजस्यायचनमोलोप्प्यायचोलप्प्यायचनमऽऊर्व्व्यायचसूर्व्यायच
॥ ४५ ॥ नमः पर्ण्णायचपर्ण्णशदायचनमऽउद्गुरमाणायचाभिघ्नतेचन-
मऽआखिदतेचप्प्रखिदतेचनमऽइषुकृद्भ्योधनुष्कृद्भ्यश्च्चवोनमोनमो-
वःकिरिकेभ्योदेवाना७हृदयेभ्योनमोविचिन्न्वत्केभ्योनमोविक्षि-
णत्केभ्योनमऽआनिर्हतेभ्यः ॥४६॥ द्रापेऽअन्धसस्प्पतेदरिद्रनीललो-
हित । आसाम्प्रजानामेषाम्पशूनाम्माभेर्म्मारोङ्मोचनःकिञ्चनाममत्
॥४७॥ इमारुद्द्रायतवसेकपर्द्दिनेक्क्षयद्वीरायप्प्रभरामहेमतीः । यथा-
शमसद्द्विपदेचतुष्प्पदेविश्श्वम्पुष्टङ्ग्रामेऽअस्म्मिन्ननातुरम् ॥ ४८ ॥

यातेरुद्रशिवातनूःशिवाविश्वाहाभेषजी । शिवारुतस्यभेषजीत-
यानोमृडजीवसे ॥ ४९ ॥ परि[1]नोरुद्रस्यहेतिर्वृणक्तुपरित्वेषस्यदुर्म-
तिरघायोः । अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोकायतनयायमृ-
ड ॥ ५० ॥ मीढुष्टमशिवतमशिवोनः सुमनाभव । परमेवृक्षऽआ-
युधन्निधायकृत्तिंवसानऽआचरपिनाकम्बिभ्रदागहि ॥ ५१ ॥ वि-
किरिद्रविलोहितनमस्तेऽअस्तुभगवः । यास्तेसहस्रᳬहेतयोऽन्यम-

१—इत्यत्र शाकटायनमते 'परिणऽइतिशाकटायनः' (३।८८) इत्यनेन परिण इति निपात्यते । सोऽपि व्यवस्थितः काण्वादेर्भवति न माध्यन्दिनीनाम् । वाजसनेयिनां तु णत्वरहितः पाठः ।

स्म्मन्निवंपन्तुताः ॥ ५२ ॥ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः । तासामीशानोभगवःपराचीनामुखाकृधि ॥ ५३ ॥ असङ्ख्यातासहस्राणिषेरुद्द्राऽअधिभूम्म्याम् । तेषाᳬसहस्रयोजनेवधन्न्वानितन्न्मसि ॥५४॥ अस्म्मिन्न्महत्यर्णवेन्तरिक्षेभवाऽअधि । तेषाᳬसहस्रयोजनेवधन्न्वानितन्न्मसि ॥ ५५ ॥ नीलग्ग्रीवाःशितिकण्ठादिवᳬरुद्द्राऽउपश्श्रिताः । तेषाᳬसहस्रयोजनेवधन्न्वानितन्न्मसि ॥ ५६ ॥ नीलग्ग्रीवाःशितिकण्ठाःशर्व्वाऽअधःक्षमाचराः । तेषाᳬसहस्रयोजनेवधन्न्वानितन्न्मसि ॥ ५७ ॥ येव्वृक्षेषुशष्पिञ्जरानीलग्ग्रीवाव्विलोहिताः । तेषाᳬसहस्रयोजनेवधन्न्वानितन्न्मसि ॥ ५८ ॥ येभूतानाम-

र्धिपतयोर्विशिखासः कपर्द्दिनः । तेषाꣳसहस्रयोजनेवधन्न्वानि-
तन्न्मसि ॥ ५९ ॥ येपथाम्पथिरक्षयऽऐलबृदाऽआयुर्व्युधः । तेषाꣳ
सहस्रयोजनेवधन्न्वानितन्न्मसि ॥ ६० ॥ येतीर्थानिप्प्रचरन्तिसृका-
हस्तानिषङ्गिणः । तेषाꣳसहस्रयोजनेवधन्न्वानितन्न्मसि ॥ ६१ ॥ ये-
न्नेषुविविद्ध्यन्तिपात्रेषुपिबतोजनान् । तेषाꣳसहस्रयोजनेवधन्न्वानि-
तन्न्मसि ॥६२॥ यऽएतावन्तश्चभूयाꣳसश्चदिशोरुद्द्राविंतस्थिरे ।
तेषाꣳसहस्रयोजनेवधन्न्वानितन्न्मसि ॥ ६३ ॥ नमोस्तुरुद्द्रेभ्यो
येदिवियेषांव्वर्षमिषवः । तेभ्योदशप्प्राचीर्दशदक्षिणादशप्प्रतीचीर्द-
शोदीचीर्दशोर्द्ध्वाः । तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेय-

न्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६४ ॥ नमोस्तुरुद्रेभ्यो येन्तरिक्षेयेषांव्वातऽइषवः । तेभ्योदशप्राचीर्द्दशदक्षिणादशप्रतीचीर्द्दशोदीचीर्द्दशोर्ध्वाः । तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुते-यन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६५ ॥ नमोस्तुरुद्रेभ्योयेपृथिव्व्यांयेषामन्नमिषवः । तेभ्योदशप्राचीर्द्दशदक्षिणादशप्रतीचीर्द्दशोदीचीर्द्दशोर्ध्वाः । तेभ्योनमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्मोयश्चनोद्वेष्टितमेषाञ्जम्भेदध्मः ॥ ६६ ॥ इति संहितायां षोडशोऽध्यायः ।

❀ अथ सप्तदशोऽध्यायः ❀

ॐ अश्मन्नूर्ज्जम्पर्व्वते शिश्रियाणामद्भ्यऽओषधीभ्यो वनस्पतिभ्यो अधिसम्भृतम्पयः । तान्नऽइषमूर्ज्जन्धत्तमरुतः सᳫं रराणाऽअश्मँस्ते क्षुन्मयि तऽऊर्ग्यं द्विष्मस्तन्ते शुगृच्छतु ॥ १ ॥ इमा मेऽअग्नऽइष्टका धेनवः सन्त्वेका च दश च दश च शतञ्च शतञ्च सहस्रञ्च सहस्रञ्चायुतञ्चायुतञ्च नियुतञ्च नियुतञ्च प्रयुतञ्चार्ब्बुदञ्च न्यर्ब्बुदञ्च समुद्रश्च मध्यञ्चान्तश्च परार्द्धश्चैता मेऽअग्नऽइष्टका धेनवः सन्त्वमुत्रामुष्मिँल्लोके ॥ २ ॥ ऋतवस्स्थऽऋतावृधऽऋतुष्ठास्स्थऽऋतावृधः ।

घृतश्च्चुतोमधुश्च्चुतोव्विराजोनामंकामदुघाऽअक्षीयमाणाः ॥ ३ ॥
समुद्द्रस्यत्त्वावंकयाग्ग्नेपरिव्व्ययामसि । पावकोऽअस्म्मब्भ्यᳬशिवो-
भव ॥ ४ ॥ हिमस्यंत्त्वाजरायुणाग्ग्नेपरिव्व्ययामसि । पावकोऽअस्म्म-
ब्भ्यᳬशिवोभव ॥ ५ ॥ उपज्ज्मन्नुपवेतसेवतरनदीष्ष्वा । अग्ग्नेपित्त-
मपामसिमण्डूकिताभिरागहिसेमन्नोयज्ञम्पावकवर्णᳬशिवङ्कृधि
॥ ६ ॥ अपामिदन्न्ययनᳬसमुद्द्रस्यनिवेशनम् । अन्न्याँस्तेऽअस्म्मत्त-
पन्तुहेतयः पावकोऽअस्म्मब्भ्यᳬशिवोभव ॥ ७ ॥ अग्ग्नेपावकरोचि-
षामन्द्रयादेवजिह्व्वया । आदेवान्न्वक्षियक्षिच ॥ ८ ॥ सनः पावक-
दीदिवोग्ग्नेदेवाँ२ऽइहावह । उपयज्ञᳬहविश्चनः ॥ ९ ॥ पावकयाय-

शिचतयंन्त्याकृपाद्वामंत्रुरुचऽउषसोनभानुना । तूर्व्वेन्नयामन्नेतंशस्य-
नूरणऽआयोघृणेनतंतृषाणोऽअजरं ÷ ॥ १० ॥ नमंस्तेहरंसेशोचिषेन-
मंस्तेऽअस्त्वर्च्चिषे । अन्न्याँस्तेऽअस्स्मत्तंपन्तुहेतयं ÷ पावकोऽअस्स्म-
ब्भ्यं६शिवोभंव ॥ ११ ॥ नृषदेव्वेडप्सुषदेव्वेड्डबर्हिषदेव्वेड्डवनसदे-
व्वेट्स्वर्व्विदेव्वेट् ॥ १२ ॥ येदेवादेवानांय्यज्ञियायज्ञियाना६संव्वत्स-
रीणमुपभागमासंते । अहुतादोहविषोयज्ञेऽअस्स्मिन्त्स्वयम्पिबन्तुम-
धुनोघृतस्य ॥१३॥ येदेवादेवेष्ष्वधिदेवत्त्वमायन्न्येब्रह्मणः पुरऽएतारोऽ-
अस्य । येब्भ्योनऽऋतेपवंतेधामकिञ्चननतेदिवोनपृथिव्व्याऽअधिस्नु-
षु ॥ १४ ॥ प्राणदाऽअंपानदाव्व्यानदाव्वर्च्चोदाव्वरिवोदाः । अन्न्याँ-

स्तेऽअस्मभ्यन्तपन्तुहेतयः पावकोऽअस्मभ्यꣳशिवोभव ॥ १५ ॥ अ-
ग्निस्तिग्मेनशोचिषायासद्विश्वन्न्यत्रिणम् । अग्निर्न्नोवनतेरयिम्
॥ १६ ॥ यऽइमाविश्वाभुवनानिजुह्वदृषिर्होतान्न्यसीदत्पितानः ।
सऽआशिषाद्रविणमिच्छमानःप्रथमच्छदवराँ२ऽआविवेश ॥ १७ ॥
किꣳस्विदासीदधिष्ठानमारम्भणङ्कतमत्स्वित्कथासीत् । यतोभूमिं-
ञ्जनयन्विश्वकर्म्माविद्यामौर्णोन्महिनाविश्वचक्षाः ॥ १८ ॥
विश्वतश्चक्षुरुतविश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् ।
सम्बाहुभ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः ॥ १९ ॥
किꣳस्विद्वनङ्कऽउसवृक्षऽआसयतोद्यावापृथिवीनिष्टतक्षुः । मनी-

षिणोमनसापृच्छतेदुतद्यदध्यतिष्ठद्भुवनानिधारयन् ॥ २० ॥ या-
तेधामानिपरमाणियावमायामध्यमाविश्वकर्म्मन्नुतेमा । शि-
क्षासखिभ्योहविषिस्वधावःस्वयंयजस्वतन्वंवृधानः ॥ २१ ॥
विश्वकर्म्मन्हविषावावृधानःस्वयंयजस्वपृथिवीमुतद्याम् ।
मुह्यन्त्वन्येऽअभितःसपत्नाऽइहास्माकम्मघवासूरिरस्तु ॥ २२ ॥
वाचस्पतिंविश्वकर्म्माणमूतयेमनोजुवंवाजेऽअद्याहुवेम । स-
नोविश्वानिहवनानिजोषद्विश्वशम्भूरवसेसाधुकर्म्मा ॥ २३ ॥ वि-
श्वकर्म्मन्हविषावर्द्धनेनत्रातारमिन्द्रमकृणोरवध्यम् । तस्मैविशः
समनमन्तपूर्वीरयमुग्रोविहव्योयथासत् ॥ २४ ॥ चक्षुषःपिता-

मनसाहिधीरोघृतमेनेऽअजनन्नम्नमाने । यदेदन्ताऽअदद्दहन्तपूर्व्वऽ-
आदिद्द्यावापृथिवीऽअप्रथेताम् ॥ २५ ॥ विश्वकर्म्माविमनाऽआ-
द्विहायाधाताविधातापरमोतसन्दृक् । तेषामिष्टानिसमिषामदन्तियत्र-
त्रासप्तऽऋषीन्परऽएकमाहुः ॥ २६ ॥ योनः पिताजनितायोविधा-
ताधामानिवेदभुवनानिविश्वा । योदेवानान्नामधाऽएकऽएवतꣳ
सम्प्रश्नम्भुवनायन्त्यन्या ॥ २७ ॥ तऽआयजन्तद्द्रविणꣳसमस्माऽ-
ऋषयःपूर्व्वेजरितारोनभूना । असूर्त्तेसूर्त्तेरजसिनिषत्तेयेभूतानिसम-
कृण्वन्निमानि ॥२८॥ परोदिवापरऽएनापृथिव्यापरोदेवेभिरसुरैर्य-
दस्ति । कꣳस्विद्गर्भम्प्रथमन्दध्रऽआपोयत्रदेवाःसमपश्यन्तपूर्व्वे ।

॥ २९ ॥ तमिद्गर्ब्भम्प्रथमन्दध्रऽआपो यत्र देवाः समगच्छन्त विश्वे । अजस्य नाभावद्ध्येकमर्पितं यस्मिन्विश्वानि भुवनानि तस्थुः ॥ ३० ॥ न तं विदाथ यऽइमा जजानान्यद्युष्माकमन्तरम्बभूव । नीहारेण प्रावृता जल्प्या चासुतृपऽउक्थशासश्चरन्ति ॥ ३१ ॥ विश्वकर्म्मा ह्यजनिष्ट देवऽआदिद्गन्धर्व्वोऽअभवद्द्वितीयः । तृतीयः पिता जनितौषधीनामपाङ्गर्ब्भं व्यदधात्पुरुत्रा ॥ ३२ ॥ आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् । सङ्क्रन्दनो-

१—आशुः शिशानो २--अदितिः षोडशाक्षरेण ९।३४। देवो वः सविता १।१) इत्यादिस्थलेषु शाकटायनमते—'प्रत्ययसर्वेषाम्मुदिशाकटायनः' (३।९) इति सूत्रेण

निमिषऽएकवीरः शतꣳसेनाऽअजयत्साकमिन्द्रः ॥ ३३ ॥ सङ्क्रन्दनेनानिमिषेण । जिष्णुनायुत्कारेणदुश्च्यवनेनधृष्णुना । तदिन्द्रेण जयततत्सहध्वंयुधोनरऽइषुहस्तेनवृष्णा ॥ ३४ ॥ सऽइषुहस्तैः सनिषङ्गिभिर्वशीसꣳस्रष्टासयुधऽइन्द्रोगणेन । सꣳसृष्टजित्सोमपा बाहुशर्द्ध्युग्रधन्वाप्रतिहिताभिरस्ता ॥ ३५ ॥ बृहस्पतेपरिदीया-

---

शषसामुत्संज्ञकेषु परभूतेषु विसर्जनीयः परसवर्णमापद्यते' इत्यनेन विकल्पमेव स्पष्टयति । 'अविकारꣳ० शाकल्यः शषसेषु' (३।१०) शषसेषु परभूतेषु विसर्जनीयस्य विकारन्न मन्यते । अर्थात्—विसर्जनीयो नान्य इत्यर्थः । तथापि अत्र यथासंप्रदायं पाठव्यवस्था । अत्रैकैकप्रयोगलेखनयुक्तम् ।

रथेनरक्षोहामित्राँ२ऽअपबाधमानꣳ । प्रभञ्जन्त्सेनाꣳप्रमृणोयुधाज-
यन्नस्माकमेद्ध्यवितारथानाम् ॥ ३६ ॥ बलविज्ञायस्स्थविरꣳप्रवी-
रꣳसहस्वान्वाजीसहमानऽउग्रः । अभिवीरोऽअभिसत्त्वासहोजाजै-
त्रमिन्द्ररथमातिष्ठगोवित् ॥ ३७ ॥ गोत्रभिदङ्गोविदंवज्रबाहुञ्जय-
न्तमज्ज्मप्रमृणन्तमोजसा । इमꣳसजाताऽअनुवीरयद्ध्वमिन्द्रꣳस-
खायोऽअनुसꣳरभद्ध्वम् ॥ ३८ ॥ अभिगोत्राणिसहसागाहमानोदयो-
व्वीरःशतमन्न्युरिन्द्रः । दुश्च्च्यवनःपृतनाषाडयुद्ध्योस्माकꣳसे-
नाऽअवतुप्रयुत्सु ॥ ३९ ॥ इन्द्रऽआसान्नेताबृहस्पतिर्दक्षिणायज्ञःपु-
रऽएतुसोमः । देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्व-

ग्रम् ॥ ४० ॥ इन्द्रस्य वृष्णो वरुणस्य राज्ञऽआदित्यानाम्मरुताᳪ-
शर्द्धऽउग्ग्रम् । महामनसाम्भुवनच्च्यवानाङ्घोषो देवानाञ्जयतामुद-
स्त्थात् ॥ ४१ ॥ उद्धर्षय मघवन्नायुधान्युत्सत्त्वनाम्मामकानाम्म-
नाᳪसि । उद्वृत्रहन्वाजिनांव्वाजिनान्युद्रथानाञ्जयतां यन्तु घो-
षाः ॥ ४२ ॥ अस्माकमिन्द्रः समृतेषु द्ध्वजेष्वस्माकंया ऽइषवस्ता-
जयन्तु । अस्माकंव्वीराऽउत्तरे भवन्त्वस्माँ२ऽउ देवाऽअवताहवेषु
॥ ४३ ॥ अमीषाञ्चित्तम्प्रतिलोभयन्ती गृहाणाङ्गान्न्यप्प्वे परेहि । अभि-
प्प्रेहि निर्द्दह हृत्सु शोकैरन्धेनामित्त्रास्तमसा सचन्ताम् ॥ ४४ ॥ अवसृ-
ष्टा परापत शरव्ये ब्रह्मसᳪशिते । गच्छामित्त्रान्प्रपद्यस्व मामी-

षाङ्क्ष्वनोऽचिंछेषः ॥ ४५ ॥ प्रेताजयंतानरऽइन्द्रोवश्शर्म्मंयच्छतु । उग्राव÷ सन्तुबाहवोनाधृष्याषथासथ ॥ ४६ ॥ असौयासेनामरु-तःपरेषामभ्यैतिनऽओजसास्पर्द्धमाना । ताङ्गूहततमसापव्रतेनष-थामीऽअन्न्योऽअन्न्यन्नजानन् ॥ ४७ ॥ यत्रबाणाश्संपतन्तिकुमारा-विशिखाऽइव । तन्नऽइन्द्रोबृहस्पतिरदितिःशर्म्मंयच्छतुविश्वाहा-शर्म्मंयच्छतु ॥४८॥ मर्म्माणितेवर्म्मणाच्छादयामिसोमस्त्वाराजामृते-

१—'शकारे च' (४।९६) इत्यनेन शकारे च प्रत्यये परे तकारवर्गश्चकारवर्गमा-पद्यते । एवम्—तच्छकेयम् (१।५) स्वभावाच्छुक्रः (२३।५) आदित्याञ्छ्मश्रुभिः (२५।१) इत्यादौ ।

नानुंवस्ताम् । उरोर्व्वरीयोव्वरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु
॥४९॥ उदेनमुत्तरान्नयाग्ग्नेघृतेनाहुत। रायस्प्पोषेणसꣳसृजप्प्रजयाच-
बहुङ्कृधि ॥५०॥ [शतम् ९००] इन्द्रेमम्प्रतरान्नयसजातानामसद्द्व-
शी । समेनंव्वर्च्चसासृजदेवानाम्भागदाऽअसत् ॥ ५१ ॥ यस्य-
कुर्म्मोगृहेहविस्तमग्ग्नेव्वर्द्धयात्वम् । तस्म्मै देवाऽअधिब्ब्रुवन्नयञ्च-
ब्ब्रह्मणस्प्पतिः ॥ ५२ ॥ उदुत्वाव्विश्श्वे देवाऽअग्ग्नेभरन्तुचित्ति-
भिः । सनोभवशिवस्त्वꣳसुप्प्रतीकोव्विभावसुः ॥ ५३ ॥ पञ्चदिशो-
दैवीर्य्यज्ञमवन्तुदेवीरपामतिन्दुर्म्मतिम्बाधमानाः । रायस्प्पोषेयज्ञ-
पतिमाभजन्तीरायस्प्पोषेऽअधियज्ञोऽअस्त्थात् ॥ ५४ ॥ समिद्धेऽअ-

ग्रावर्धिमामहानऽउक्थपॅत्रऽईड्ड्यौगृभीतः। तप्तङ्घर्म्मम्परिगृह्यायज-
न्तोर्ज्जाषद्यज्ञमयजन्तदेवाः ॥ ५५ ॥ दैव्यायधर्त्रेजोष्ट्रेदेवश्रीः-
श्री[1] मनाः शतपयाः । परिगृह्यदेवायज्ञमायन्देवादेवेब्भ्योऽअद्ध्वर्य्य-
न्तोऽअस्थुः ॥ ५६ ॥ वीतᳫहविः । शमितᳫशमितायजद्ध्यैतुरी-
योयज्ञोयत्रहव्यमेति । ततोंव्वाकाऽआशिषोंनोजुषन्ताम् ॥ ५७ ॥
सूर्य्यरश्मिर्हरिकेशः पुरस्तात्सविताज्ज्योतिरुदयाँ२ऽअजस्रम् । तस्य-

१ इत्यत्र 'श्रीमनाऽइत्येके' (३।९२) एकेषामाचार्य्याणां मतेन अयं च नकारः प्रकृत्या भवति। अयं भावः—चरणानां पाठव्यवस्था काण्वशाखायां णत्वं, माध्यन्दिन-शाखायां नत्वं, इति।

पूषाप्प्रसवेषातिव्विद्वान्त्सम्पश्यन्व्विश्श्वाभुवनानिगोपाः ॥ ५८ ॥
व्विमानऽएषदिवोमद्ध्यऽआस्तऽआपप्प्रिवान्रोदसीऽअन्तरिक्षम् ।
सव्विश्श्वाचीरभिचष्ट्टेघृताचीरन्तरापूर्व्वमपरञ्चकेतुम् ॥ ५९ ॥ उक्षा-
समुद्रोऽअरुणः सुपर्ण्णः पूर्व्वस्ययोनिम्पितुराविवेश । मद्ध्येदिवो-
निहितः पृश्निरश्श्मा व्विचक्क्रमेरजसस्प्पात्यन्तौ ॥ ६० ॥ इन्द्रं-
व्विश्श्वाऽअवीवृधन्त्समुद्रव्व्यचसङ्गिरः । रथीतमः रथीनांव्वाजा-
नाᳬसत्पतिम्पतिम् ॥ ६१ ॥ देवहूर्यज्ञऽआचव्वक्षत्सुम्नहूर्यज्ञऽ-
आचव्वक्षत् । यक्षदग्निर्देवोदेवाँ२ऽआचव्वक्षत् ॥ ६२ ॥ व्वाजस्यमा-
प्प्रसवऽउद्ग्राभेणोदग्ग्रभीत् । अधासपत्नानिन्द्रोमेनिग्ग्राभेणाध-

राँ२अकः ॥ ६३ ॥ उदुग्राभञ्चनिग्ग्राभञ्चब्ब्रह्मदेवाऽअवीवृधन् ।
अधासपत्नानिन्द्राग्नीमेंव्विषूचीनान्व्यस्यताम् ॥ ६४ ॥ क्रम-
द्ध्वमग्निनानाकमुक्ख्यᳬहस्तेषुबिब्भ्रतः । दिवस्पृष्ठᳬस्वर्ग्गत्वामि-
श्श्रादेवेभिराद्ध्वम् ॥ ६५ ॥ प्राचीमनुप्रदिशम्प्रेहिव्विद्वानग्नेरग्नेपुरोऽ-
अग्निर्ब्भवेह । व्विश्वाऽआशादीद्द्यानोव्विभाह्यूर्ज्जन्नोधेहिद्विपदे-
चतुष्प्पदे ॥ ६६ ॥ पृथिव्याऽअहमुदन्तरिक्षमारुहमन्तरिक्षाद्दिवमा-
रुहम् । दिवोनाकस्यपृष्ठात्स्वर्ज्ज्योतिरगामहम् ॥ ६७ ॥ स्वर्य्यन्तो-
नापेक्षन्तऽआद्द्याᳬरोहन्तिरोदसी । यज्ञंयेव्विश्वतोधारᳬसुवि-
द्वाᳬसोव्वितेनिरे ॥ ६८ ॥ अग्नेप्प्रेहिप्प्रथमोदेवयताञ्चक्षुर्देवानामुतम-

र्त्यानाम् । इयंक्षमाणा भृगुभिःसजोषाःस्वर्ष्यन्तुयजमानाःस्वस्ति ॥ ६९ ॥
नक्तोषासासमनसा विरूपे धापयेतेशिशुमेकꣳसमीची । द्यावाक्षा-
मारुक्क्मोऽअन्तर्व्विभातिदेवाऽअग्निन्धारयन्द्रविणोदाः ॥ ७० ॥ अ-
ग्नेसहस्राक्षशतमूर्द्धञ्छतन्तेप्राणाः सहस्रंव्यानाः । त्वꣳसाहस्रस्य-
रायऽईशिषेतस्मैते विधेमव्वाजायस्वाहा ॥ ७१ ॥ सुपर्णोसिगरु-
त्मान्पृष्ठेपृथिव्याःसीद । भासान्तरिक्षमापृणज्ज्योतिषादिवमुत्त-
भानतेजसादिशऽउद्दꣳह ॥ ७२ ॥ आजुह्वानःसुप्रतीकःपुरस्ताद-
ग्नेस्वंयोनिमासीदसाधुया । अस्मिन्त्सधस्थेऽअद्ध्युत्तरस्मिन्वि-

१—'उदस्तभाने लोपम्'(४।९८) उद् उपसर्गात्परस्तभाने प्रत्यये सकारो लोपमापद्यते ।

इश्वेदेवायजमानश्चसीदत ॥ ७३ ॥ ताᳬंसवितुर्व्वरेण्यस्यचित्रामाहं-
व्वृणेसुमतींव्विश्वजन्न्याम् । यामस्यकण्वोऽअदुहत्प्रपीनाᳬंसहस्र-
धाराम्पयसामहीङ्गाम् ॥ ७४ ॥ व्विधेमतेपरमेजन्म्मन्नग्नेव्विधेमस्तो-
मैरवरेसधस्थे । यस्म्माद्योनेरुदारिथायजेतम्प्रत्त्वेहवीᳬंषिजुहुरेस-
मिद्धे ॥ ७५ ॥ प्रेद्धोऽअग्नेदीदिहिपुरोनोजस्रयासूर्म्यायविष्ठ । त्वाᳬं
शश्वन्तऽउपयन्तिव्वाजाः ॥ ७६ ॥ अग्नेतमद्याश्वन्नस्तोमैः क्रतुन्नभद्रᳬं हृदिस्पृशम् । ऋद्ध्यामातऽओहैः ॥ ७७ ॥ चित्तिञ्जुहो-
मिमनसाघृतेनयथादेवाऽइहागमन्न्वीतिहोत्राऽऋतावृधः । पत्ये-
व्विश्वस्यभूमनोजुहोमिव्विश्वकर्म्मणेव्विश्वाहादाभ्यᳬं हविः ॥७८॥

सप्ततेऽअग्नेसमिधः सप्तजिह्वाःसप्तऽऋषयःसप्तधामप्प्रियाणि ।
सप्तहोत्राःसप्तधात्वायजन्तिसप्तयोनीरापृणस्वघृतेनस्वाहा ॥७९॥
शुक्रज्ज्योतिश्चचित्रज्ज्योतिश्चसत्यज्ज्योतिश्चज्ज्योतिष्मांश्च ।
शुक्रश्चऽऋतपाश्चात्यंहाः ॥८०॥ ईदृङ्चान्यादृङ्चसदृङ्च-
प्प्रतिसदृङ्च । मितश्चसम्मितश्चसभराः ॥८१॥ ऋतश्चसत्य-
श्चध्रुवश्चधरुणश्च । धर्त्ताचविधर्त्ताचविधारयः ॥ ८२ ॥ ऋत-
जिच्चसत्यजिच्चसेनजिच्चसुषेणश्च । अन्तिमित्रश्चदूरेऽअमित्रश्च-
गणः ॥ ८३ ॥ ईदृक्षासऽएतादृक्षासऽऊषुणः सदृक्षासःप्रतिसदृ-
क्षासऽएतन । मितासश्चसम्मितासोनोऽअद्यसभरसोमरुतोयज्ञेऽअ-

सिस्मन् ॥ ८४ ॥ स्वतवाँश्चप्रघासीचसान्तपनश्चगृहमेधीच । क्रीडी-
डीचशाकीचोज्जेषी ॥ ८५ ॥ इन्द्रन्दैवीर्विशोमरुतोनुवर्त्मानोभ-
वन्यथेन्द्रन्दैवीर्विशोमरुतोनुवर्त्मानोभवन् । एवमिमंयजमानन्दै-
वीश्चविशोमानुषीश्चानुवर्त्मानोभवन्तु ॥ ८६ ॥ इमꣳस्तनमू-
र्जस्वन्तन्धयापाम्प्रपीनमग्नेसरिरस्यमद्ध्ये । उत्संजुषस्वमधुम-
न्तमर्वन्त्समुद्रियꣳसदनमाविशस्व ॥ ८७ ॥ घृतम्मिमिक्षेघृतम-
स्ययोनिर्घृतेश्रितोघृतम्वस्यधाम । अनुष्वधमावहमादयस्वस्वा-
हाकृतंवृषभवक्षिहव्यम् ॥ ८८ ॥ समुद्रादूर्मिर्मधुमाँ २ उदा-
रदुपाꣳशुनासमम्मृतत्वमानट् । घृतस्यनामगुह्यंयदस्तिजिह्वादे-

वानाममृतस्यनाभिं÷ ॥ ८९ ॥ व्वयन्नामप्प्रब्ब्रवामाघृतस्यास्म्मिन्न्य-
ज्ञेधारयामानमोभिः । उपब्ब्रह्माशृणवच्छस्यमानञ्चतुं÷शृङ्गोवमी-
द्गौरऽएतत् ॥ ९० ॥ चत्वारिशृङ्गात्त्रयोऽअस्यपादाद्वेशीर्षेसप्तह-
स्तासोऽअस्य । त्रिधाबद्धोव्वृषभोरोरवीतिमहोदेवोमर्त्याँ२ऽआवि-
वेश ॥ ९१ ॥ त्रिधाहितम्पणिभिर्गुह्यमानङ्गविदेवासोघृतमन्न्वविन्-
न्दन् । इन्द्रऽएकꣳसूर्य्यऽएकञ्जजानव्वेनादेकꣳस्वधयानिष्टतक्षुः
॥ ९२ ॥ एताऽअर्षन्तिहृद्यात्समुद्राच्छतव्व्रजारिपुणानावचक्षे ।
घृतस्यधाराऽअभिचाकशीमिहिरण्ण्ययोव्वेतसोमद्ध्यऽआसाम् ॥९३॥
सम्म्यक्स्स्रवन्तिसरितोनधेनाऽअन्तर्हृदामनसापूयमानाः । ए-

तेऽअर्षन्त्यूर्म्मयोघृतस्यंमृगाऽइं वक्षिपणोरीषमाणाः ॥ ९४ ॥
सिन्धोरिवप्राद्ध्वनेशूघनासोव्वातप्रमियःपतयन्तियह्वाः । घृत-
स्यधाराऽअरुषोनव्वाजीकाष्ठाभिन्दन्नूर्म्मिभिःपिन्वंमानः ॥ ९५ ॥
अभिप्रवंन्तसमंनेवयोषाःकल्ल्याण्ण्यःस्स्मयमानासोऽअग्निम् । घृत-
स्यधाराःसमिधोनसन्तताजुषाणोहर्यतिजातवेदाः ॥ ९६ ॥ कन्न्या-
ऽइवव्वहतुमेतवाऽउऽअञ्ज्यञ्जानाऽअभिचाकशीमि । यत्रसोमः सू-
यतेयत्त्रयज्ञोघृतस्यधाराऽअभितत्पवन्ते ॥ ९७ ॥ अभ्यर्षतसुष्टुतिङ्ग-
व्यमाजिमस्स्मासुभद्द्राद्द्रविणानिधत्त । इमंयज्ञन्नयतदेवतानोघृ-
तस्यधारामधुमत्पवन्ते ॥ ९८ ॥ धामन्तेव्विश्श्वम्भुवनमधिश्रितम-

न्तः॒सं॑मुद्रे हृद्य॒न्तरायुषि । अपामनीके समिथेय आभृतस्तमश्या-
ममधुमन्तन्त ऊर्म्मिम् ॥ ९९ ॥ इति संहितायां सप्तदशोऽध्यायः ॥

❀ अथ अष्टादशोऽध्यायः ❀

ॐ वाजश्च मे प्रसवश्च मे प्रयतिश्च मे प्रसितिश्च मे धीतिश्च मे क्र-
तुश्च मे स्वरश्च मे श्लोकश्च मे श्रवश्च मे श्रुतिश्च मे ज्योतिश्च मे स्व-
श्च मे यज्ञेन कल्पन्ताम् ॥ १ ॥ प्राणश्च मे पानश्च मे व्यानश्च मे सुश्च मे-

१—'चछयोः शम्' (प्रा० ३।७) चकारछकारयोः परयोः विसर्जनीयः शकारमापद्यते। चकारोदाहरणं यथा 'वाजश्च मे' छकारोदाहरणे—'अस्त्रीत्रयश्छन्दः' (१४।१८) इति।

चित्तञ्चमऽआधीतञ्चमेवाक्चमेमनश्चमेचक्षुश्चमेश्श्रोत्रञ्चमेदक्षश्च-
मेबलञ्चमेयज्ञेनकल्पन्ताम् ॥ २ ॥ ओजश्चमेसहश्चमऽआत्मचमे-
मेतनूश्चमेशर्म्मचमेव्वर्म्मचमेङ्गानिचमेस्थीनिचमेपरूᳬषिचमेशरीरा-
णिचमऽआयुश्चमेजराचमेयज्ञेनकल्पन्ताम् ॥ ३ ॥ ज्यैष्ठ्यञ्चमऽआ-
धिपत्त्यञ्चमेमन्न्युश्चमेभामश्चमेमश्चमेम्भश्चमेजेमाचमेमहिमाचमे-
व्वरिमाचमेप्प्रथिमाचमेव्वर्षिमाचमेद्द्राघिमाचमेव्वृद्धञ्चमेव्वृद्धिश्च-
मेयज्ञेनकल्पन्ताम् ॥ ४ ॥ सत्त्यञ्चमेश्रद्धाचमेजगच्चमेधनञ्चमे-
व्विश्वञ्चमेमहश्चमेक्क्रीडाचमेमोदश्चमेजातञ्चमेजनिष्यमाणञ्च
मेसूक्तञ्चमेसुकृतञ्चमेयज्ञेनकल्पन्ताम् ॥ ५ ॥ ऋतञ्चमेमृतञ्च-

मेयक्ष्मञ्चमेनामयञ्चमेजीवातुश्चमेदीर्घायुत्वञ्चमेनमित्रञ्चमेभं-
यञ्चमेसुखञ्चमेशयनञ्चमेसूषाश्चमेसुदिनञ्चमेयज्ञेनकल्पन्ताम् ॥ ६ ॥
यन्ताचमेधर्ताचमेक्षेमश्चमेधृतिश्चमेविश्वञ्चमेमहश्चमेसंविच्चमे-
ज्ञात्रञ्चमेसूश्चमेप्रसूश्चमेसीरञ्चमेलयश्चमेयज्ञेनकल्पन्ताम् ॥ ७ ॥
शञ्चमेमयश्चमेप्रियञ्चमेनुकामश्चमेकामश्चमेसौमनसश्चमेभगश्च-
मेद्रविणञ्चमेभद्रञ्चमेश्रेयश्चमेवसीयश्चमेयशश्चमेयज्ञेनकल्प-
न्ताम् ॥ ८ ॥ ऊर्क्चमेसूनृताचमेपयश्चमेरसश्चमेघृतञ्चमेमधुचमे-
सग्धिश्चमेसपीतिश्चमेकृषिश्चमेवृष्टिश्चमेजैत्रञ्चमऽऔद्भिद्यञ्च-

१—अदनं ग्धिः अदेः क्तिनि घस्लादेशे 'घसिभसोर्हलि च' इत्युपधालोपे 'झलो-

मेयज्ञेनकल्पन्ताम् ॥ ९ ॥ रयिश्चमेरायश्चमेपुष्टञ्चमेपुष्टिश्चमेविभु-
र्चमेप्रभुचमेपूर्णञ्चमेपूर्णतरञ्चमेकुयवञ्चमेक्षितञ्चमेन्नञ्चमेक्षुच्चमेयज्ञे-
नकल्पन्ताम् ॥ १० ॥ वित्तञ्चमेवेद्यञ्चमेभूतञ्चमेभविष्यच्चमेसु-
गञ्चमेसुपथ्यञ्चमऽऋद्धञ्चमऽऋद्धिश्चमेक्लृप्तञ्चमेक्लृप्तिश्चमेम-
तिश्चमेसुमतिश्चमेयज्ञेनकल्पन्ताम् ॥ ११ ॥ व्रीहयश्चमेयवा-
श्चमेमाषाश्चमेतिलाश्चमेमुद्गाश्चमेखल्वाश्चमेप्रियङ्गवश्च-
मेणवश्चमेश्यामाकाश्चमेनीवाराश्चमेगोधूमाश्चमेमसूराश्चमे-

झलि' इति सलोपः। 'झषस्तथोर्धोऽधः' इति धत्वम्। धस्य जस्त्वम्। न च जश्त्वेक-
र्तव्येऽल्लोपस्य स्थानिवत्त्वम्। न पदान्त० इति सूत्रेण निषेधात्।

यज्ञेनकल्पन्ताम् ॥ १२ ॥ अश्माचमेमृत्तिकाचमेगिरयश्चमेपर्वता-
श्चमेसिकताश्चमेवनस्पतयश्चमेहिरण्यञ्चमेयश्चमेश्यामञ्चमेलो-
हञ्चमेसीसञ्चमेत्रपुचमेयज्ञेनकल्पन्ताम् ॥ १३ ॥ अग्निश्चमऽआ-
पश्चमेवीरुधश्चमऽओषधयश्चमेकृष्टपच्याश्चमेकृष्टपच्याश्चमे-
ग्राम्याश्चमेपशवऽआरण्याश्चमेवित्तञ्चमेवित्तिश्चमेभूतञ्चमेभू-
तिश्चमेयज्ञेनकल्पन्ताम् ॥ १४ ॥ वसुचमेवसतिश्चमेकर्मचमेश-
क्तिश्चमेर्थश्चमऽएमश्चमऽइत्याचमेगतिश्चमेयज्ञेनकल्पन्ताम्
॥१५॥ अग्निश्चमऽइन्द्रश्चमेसोमश्चमऽइन्द्रश्चमेसविताचमऽइन्द्रश्च-
मेसरस्वतीचमऽइन्द्रश्चमेपूषाचमऽइन्द्रश्चमेबृहस्पतिश्चमऽइन्द्रश्च-

मेयज्ञेनंकल्पन्ताम् ॥ १६ ॥ मित्रश्चंमऽइन्द्रंश्चमेवरुणश्चमऽइन्द्रंश्च-
मेधाताचंमऽइन्द्रंश्चमेत्वष्टाचमऽइन्द्रंश्चमेमरुतंश्चमऽइन्द्रंश्चमेविश्व-
श्वेचमेदेवाऽइन्द्रंश्चमेयज्ञेनंकल्पन्ताम् ॥ १७ ॥ पृथिवीचंमऽइन्द्रं-
श्चमेन्तरिक्षञ्चमऽइन्द्रंश्चमेद्यौश्चंमइन्द्रंश्चमेसमाश्चमइन्द्रंश्चमेन-
क्षत्राणिचमऽइन्द्रंश्चमेदिशंश्चमऽइन्द्रंश्चमेयज्ञेनकल्पन्ताम् ॥ १८ ॥
अꣳशुश्चंमेरश्मिश्चमेदाभ्यश्चमेधिपतिश्चमउपाꣳशुश्चंमेन्त-
र्यामश्चंमऽऐन्द्रवायवश्चंमेमैत्रावरुणश्चंमऽआश्विनश्चंमेप्रति-
प्रस्थानंश्चमेशुक्रश्चंमेमन्थीचंमेयज्ञेनंकल्पन्ताम् ॥ १९ ॥ आ-
ग्रयणश्चंमेवैश्वदेवश्चंमेध्रुवश्चंमेवैश्वानरश्चंमऽऐन्द्राग्न-

श्च्चमेमहावैश्श्वदेवश्च्चमेमरुत्वतीयाश्चमेनिष्क्कैवल्ल्यश्चमेसावि-
त्त्रश्चंमेसारस्वतश्श्चंमेपात्क्नीवतश्श्चंमेहारियोजनश्चंमेयज्ञेनंकल्प्पन्ता-
म् ॥ २० ॥ स्त्रुचंश्च्चमेचमसाश्च्चंमेव्वायव्व्यानिचमेद्द्रोणकलशश्चं-
मेग्ग्रावाणश्चमेघिषर्वणेचमेपूतभृच्चंमऽआधवनीयश्च्चमेव्वेदिंश्चमे-
बर्हिश्च्चंमेऽवभृथश्च्चंमेस्वगाकारश्च्चंमेयज्ञेनंकल्प्पन्ताम् ॥ २१ ॥
अग्निश्च्चंमेघर्म्मश्च्चंमेर्क्कश्चंमेसूर्य्यश्च्चंमेप्प्राणश्चंमेश्श्वमेधश्चंमे-
पृथिवीचमेदितिश्च्चमेदितिंश्च्चमेद्यौश्च्चंमेङ्गुलंयःशक्क्वरयोदिशं-
श्च्चमेयज्ञेनंकल्प्पन्ताम् ॥ २२ ॥ व्व्रतश्चंमऽऋतवंश्च्चमेतपंश्चमेसंव्व-
त्सरश्च्चंमेहोरात्त्रेऽऊर्व्वष्ठीवेबृहद्रथन्तरेचंमेयज्ञेनंकल्प्पन्ताम् ॥२३॥

एकाचमेतिस्रश्चमेतिस्रश्चमेपञ्चचमेपञ्चचमेसप्तचमेसप्तचमेन-
वचमेनवचमऽएकादशचमऽएकादशचमेत्रयोदशचमेत्रयोदशचमेपञ्च-
दशचमेपञ्चदशचमेसप्तदशचमेसप्तदशचमेनवदशचमेनवदशचमऽ-
एकविꣳशतिश्चमऽएकविꣳशतिश्चमेत्रयोविꣳशतिश्चमेत्रयोविꣳश-
तिश्चमेपञ्चविꣳशतिश्चमेपञ्चविꣳशतिश्चमेसप्तविꣳशतिश्चमे-
सप्तविꣳशतिश्चमेनवविꣳशतिश्चमेनवविꣳशतिश्चमऽएकत्रिꣳ-
शच्चमऽएकत्रिꣳशच्चमेत्रयस्त्रिꣳशच्चमेयज्ञेनकल्पन्ताम् ॥ २४ ॥
चतस्रश्चमेऽष्टौचमेऽष्टौचमेद्वादशचमेद्वादशचमेषोडशचमेषोडशचमे-
विꣳशतिश्चमेविꣳशतिश्चमेचतुर्विꣳशतिश्चमेचतुर्विꣳशतिश्च-

मेष्टाविᳬशतिश्चमेष्टाविᳬशतिश्चमेद्वात्रिᳬशच्चमेद्वात्रिᳬशच्चमे-
षट्त्रिᳬशच्चमेषट्त्रिᳬशच्चमेचत्वारिᳬशच्चमेचत्वारिᳬशच्चमेचतु-
श्चत्वारिᳬशच्चमेचतुश्चत्वारिᳬशच्चमेष्टाचत्वारिᳬशच्चमेयज्ञे-
नकल्पन्ताम् ॥ २५ ॥ त्र्यविश्चमेत्र्यवीचमेदित्यवाट्चमेदित्यौ-
हीचमेपञ्चाविश्चमेपञ्चावीचमेत्रिवत्सश्चमेत्रिवत्साचमेतुर्यवाट्च-
मेतुर्यौहीचमेयज्ञेनकल्पन्ताम् ॥ २६ ॥ पष्ठवाट्चमेपष्ठौहीचमऽ-
उक्षाचमेवशाचमऽऋषभश्चमेवेहश्चमेनड्वाँश्चमेधेनुश्चमेयज्ञेनक-
ल्पन्ताम् ॥ २७ ॥ वाजायस्वाहाप्रसवायस्वाहापिजायस्वाहाक्र-
तवेस्वाहावसवेस्वाहाहर्पतयेस्वाहान्हेमुग्धायस्वाहामुग्धायवै-

नꣳशिनायस्वाहाव्विनꣳशिनऽआन्त्यायनायस्वाहान्त्यायभौवनाय
स्वाहाभुवनस्यपतयेस्वाहाधिपतयेस्वाहाप्प्रजापतयेस्वाहा । इयन्ते
राण्मित्रायंयन्तासियमनऽऊर्ज्जेत्वाव्वृष्ट्यैत्वाप्प्रजानान्त्वाधिपत्याय
॥ २८ ॥ आयुर्यज्ञेनकल्पताम्प्राणोयज्ञेनकल्पताञ्चक्षुर्यज्ञेनकल्प-
ताꣳश्रोत्रंयज्ञेनकल्पतांव्वाग्यज्ञेनकल्पताम्मनोयज्ञेनकल्पतामा-
त्मायज्ञेनकल्पताम्ब्रह्मायज्ञेनकल्पताञ्ज्योतिर्यज्ञेनकल्पन्ताꣳ
स्वर्यज्ञेनकल्पताम्पृष्ठंयज्ञेनकल्पतांयज्ञोयज्ञेनकल्पताम् । स्तोम-
श्चयजुश्चऋक्चसामचबृहच्चरथन्तरञ्च । स्वर्द्देवाऽअगन्मामृताऽ
अभूमप्प्रजापतेःप्प्रजाऽअभूमव्वेट्स्वाहा ॥ २९ ॥ व्वाजस्यनुप्प्रसवे

मातरम्महीमदितिन्नामव्वचसाकरामहे । यस्यामिदंव्विश्श्वम्भुवन-
माविवेशतस्यान्नोदेवः सविताधर्मसाविषत् ॥ ३० ॥ व्विश्श्वेऽअद्यमरु-
तोव्विश्श्वऽऊतीव्विश्श्वेभवन्त्वग्नयःसमिद्धाः । व्विश्श्वेनोदेवाऽअव-
सागमन्तुव्विश्श्वमस्तुद्रविणंव्वाजोऽअस्म्मे ॥ ३१ ॥ व्वाजोनःसप्तप्र-
दिशश्चतस्स्रोवापरावतः । व्वाजोनोव्विश्श्वैर्द्देवैर्द्धनसाताविहावतु
॥ ३२ ॥ व्वाजोनोऽअद्यप्रसुवातिदानंव्वाजोदेवाँऽऋतुभिः कल्पप-
याति । व्वाजोहिमासर्व्ववीरञ्जजानव्विश्श्वाऽआशाव्वाजपतिर्ज्जये-
यम् ॥ ३३ ॥ व्वाजः पुरस्तादुतमद्ध्यतोनोव्वाजोदेवान्हविषाव्व-
र्द्धयाति । व्वाजोहिमासर्व्ववीरञ्चकारसर्व्वाऽआशाव्वाजपतिर्भवे-

यम् ॥ ३४ ॥ सम्मासृजामिपयसापृथिव्याᳫंसम्मासृजाम्यद्भिरो-
षधीभिः । सोहंवाजᳫंसनेयमग्ने ॥ ३५ ॥ पयःपृथिव्याम्पयऽओ-
षधीषुपयोदिव्यन्तरिक्षेपयोधाः । पयस्वतीःप्रदिशःसन्तुमह्यम्
॥ ३६ ॥ देवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्याम्पूष्णोहस्ताभ्या-
म् । सरस्वत्यैवाचोयन्तुर्यन्त्रेणाग्नेःसाम्राज्येनाभिषिञ्चामि
॥ ३७ ॥ ऋताषाडृतधामाग्निर्गन्धर्वस्तस्यौषधयोप्सरसोमुदोना-
म । सनऽइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहावाट्ताभ्यःस्वाहा ॥३८॥
सᳫंहितोविश्वसामासूर्य्योगन्धर्वस्तस्यमरीचयोप्सरसऽआयुवो-
नाम । सनऽइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहावाट्ताभ्यःस्वाहा॥३९॥

सुषुम्णःसूर्य्यरश्मिश्चन्द्रमागन्धर्वस्तस्यनक्षत्राण्यप्सरसोभेकुर-
योनाम। सनऽइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहावाट्ताभ्यःस्वाहा॥४०॥
इषिरोविश्वव्यचावातोगन्धर्वस्तस्यापोऽअप्सरसऊर्ज्जोनाम ।
सनऽइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहावाट्ताभ्यःस्वाहा ॥ ४१ ॥ भु-
ज्युःसुपर्णोयज्ञोगन्धर्वस्तस्यदक्षिणाऽअप्सरसस्तावानाम। सनऽ-
इदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहावाट्ताभ्यःस्वाहा ॥ ४२ ॥ प्रजा-
पतिर्विश्वकर्म्मामनोगन्धर्वस्तस्यऽऋक्सामान्यप्सरसऽएष्टयो-
नाम। सनऽइदम्ब्रह्मक्षत्रम्पातुतस्मैस्वाहावाट्ताभ्यःस्वाहा ॥४३॥
सनोभुवनस्यपतेप्रजापतेयस्यतऽउपरिगृहायस्यवेह । अस्मैब्रह्मणे-

णोस्मैत्तत्त्रायमहिशर्म्मंयच्छस्वाहा ॥ ४४ ॥ समुद्रोसिनभंस्वानाद्र्र्दानुंशम्भूर्म्मयोभूरभिमाव्वाहिस्वाहामारुतोसिमरुताङ्गणःशम्भूर्म्मयोभूरभिमाव्वाहिस्वाहावस्यूरसिदुवंस्वाञ्छम्भूर्म्मयोभूरभिमाव्वाहिस्वाहा ॥ ४५ ॥ यास्तेऽअग्ग्नेसूर्य्येरुचोदिवमातन्न्वन्तिरश्मिभिः । ताभिर्न्नोऽअद्यसर्व्वाभिरुचेजनायनस्कृधि ॥ ४६ ॥ यावोदेवाःसूर्य्येरुचोगोष्वश्वेषुयारुचः । इन्द्राग्नीताभिःसर्वाभीरुचन्नोधत्तबृहस्पते ॥ ४७ ॥ रुचन्नोधेहिब्राह्मणेषुरुचःराजसुनस्कृधि । रुचंविश्येषुशूद्रेषुमयिधेहिरुचारुचम् ॥४८॥ तत्त्वायामिब्रह्मणाव्वन्दमानस्तदाशास्तेयजमानोहविर्भिः । अहेडमानोव्वरुणेहबोध्युरुशंसमानऽ-

आयुर्ᳪंप्रमोषीᳪं ॥ ४९ ॥ स्वर्ण्णघर्म्मः स्वाहा स्वर्ण्णार्क्कः स्वाहा स्वर्ण्ण-
शुक्रः स्वाहा स्वर्ण्णज्ज्योतिᳪं स्वाहा स्वर्ण्णसूर्य्यᳪं स्वाहा ॥ ५० ॥ अ-
ग्निन्नयुनज्मि शवसा घृतेन दिव्यᳪं सुपर्ण्णं व्वयसा बृहन्तम् । तेनं व्व-
यङ्गमेम ब्रध्नस्य व्विष्टपᳪं स्वो रुहाणा अधिनाकमुत्तमम् ॥ ५१ ॥ [श-
तम् १०००] इमौ ते पक्षावजरौ पतत्त्रिणौ याब्भ्याᳪं रक्षाᳪंस्यपहᳪंस्य-
ग्ने ॥ ताब्भ्याम्पतेम सुकृतामु लोकं यत्र ऽऋषयो जग्मुः प्रथमजाः पु-
राणाः ॥ ५२ ॥ इन्दुर्द्दक्षः श्येनऽऋतावा हिरण्ण्यपक्षः शकुनो भुर-
ण्युः । महान्त्सधस्थे ध्रुवऽआनिषत्तो नमस्तेऽअस्तु मा मा हिᳪंसीः
॥ ५३ ॥ दिवो मूर्द्धासि पृथिव्व्या नाभिरूर्ग्गपामोषधीनाम् । व्विश्वा-

युꣳशर्म्मसप्प्रथानमस्प्पथे ॥५४॥ विश्वस्यमूर्द्धन्नधितिष्ठसिश्श्रि-
तःसमुद्द्रेतेहृदयमप्प्स्वायुरपोदत्तोदधिम्भिन्त । दिवस्प्पर्ज्जन्न्याद-
न्तरिक्षात्पृथिव्व्यास्ततोनोव्वृष्ट्ट्याव ॥ ५५ ॥ इष्टोयज्ञोभृगुराशीर्द्दा-
व्वसुभिः । तस्यनऽइष्टस्यप्प्रीतस्यद्द्रविणेहागमेः ॥ ५६ ॥ इष्टोऽअग्नि-
राहुतःपिपर्त्तुनऽइष्टꣳहविः । स्वगेदन्देवेब्भ्योनमः ॥५७॥ यदाकूता-
त्समसुस्रोद्धृदोवामनसोवासम्भृतञ्चक्षुषोवा । तदनुप्प्रेतसुकृतामुलो-
कंयत्रऽऋषयोजग्मुःप्प्रथमजाःपुराणाः ॥ ५८ ॥ एतꣳसधस्थपरितेद-
दामियमावहाच्छेवधिञ्जातवेदाः । अन्न्वागन्तायज्ञपतिव्वोऽअत्रतꣳ-
स्म्मजानीतपरमेव्व्योमन् ॥५९॥ एतञ्जानाथपरमेव्व्योमन्देवाःसध-

स्त्थाव्विदरूपमस्य । यदागच्छात्पथिभिर्द्देवयानैरिष्टापूर्त्तेकृणवाथाविरस्म्मै ॥६०॥ उद्बुद्ध्यस्वाग्ग्नेप्प्रतिजागृहित्वमिष्टापूर्त्तेसꣳसृजेथामयञ्च । अस्मिन्न्तसधस्थेऽअद्ध्युत्तरस्मिन्न्विश्श्वेदेवायजमानश्च्चसीदत ॥ ६१ ॥ येनवहसिसहस्रंयेनाग्ग्नेसर्व्ववेदसम् । तेनेमंयज्ञन्नोनयस्वर्द्देवेषुगन्तवे ॥ ६२ ॥ प्रस्तरेणपरिधिनास्स्रुचाव्वेद्याचबर्हिषा । ऋचेमंयज्ञन्नोनयस्वर्द्देवेषुगन्तवे ॥ ६३ ॥ यद्दत्तंयत्परादानंयत्पूर्त्तंयाश्चदक्षिणाः । तदग्ग्निर्व्वैश्श्वकर्म्मणःस्वर्द्देवेषुनोदधत् ॥६४॥ यत्रधाराऽअनपेतामधोर्घृतस्यचयाः । तदग्ग्निर्व्वैश्श्वकर्म्मणःस्वर्द्देवेषुनोदधत् ॥ ६५ ॥ अग्निरस्मिजन्म्मनाजातवेदाघृतम्मेचक्षुरमृतम्मऽ-

आसन्। अर्क्कस्त्रिधातूरजसोव्विमानोजस्रोघर्म्मोहविरस्म्मिनाम ॥६६॥
ऋचोनामास्म्मियजूᳬषिनामास्म्मिसामानिनामास्म्मि । येऽअग्नयः
पाञ्चजन्याऽअस्याम्पृथिव्यामधि । तेषामसित्वमुत्तमः प्रनोजीवा-
तवेसुव ॥ ६७ ॥ व्वार्त्रहत्यायशवसेपृतनाषाह्याय च । इन्द्रत्वावर्त्त-
यामसि ॥ ६८ ॥ सहदानुम्पुरुहूतक्षियन्तमहस्तमिन्द्रसम्पिणक्कुणा-
रुम् । अभिवृत्रंव्वर्द्धमानम्पियारुमपादमिन्द्रतवसाजघन्थ ॥ ६९ ॥
व्विनऽइन्द्रमृधोजहिनीचायच्छपृतन्न्यतः । योऽअस्म्माँ२ऽअभिदास-

---

१. इत्यत्र 'सहेः पृतनायाः' (३।७५) इत्यनेन पृतनाशब्दात्परस्य सहेः सस्य षत्वं निपात्यते ।

त्यधंरङ्गमयातमः॑ ॥ ७० ॥ मृगोनभीमःकुचरोगिरिष्ठाःपरावतआ-
जंगन्थापरस्याः । सृकꣳसꣳशायपविमिन्द्रतिग्मंव्विशत्रून्ताढि-
व्विमृधोनुदस्व ॥ ७१ ॥ व्वैश्वानरोनऽऊतयऽआप्रयातुपरावतः॑ ।
अग्निर्न्नः॑सुष्टुतीरुप ॥ ७२ ॥ पृष्टोदिविपृष्टोऽअग्निःपृथिव्यांपृष्टो
व्विश्वाऽओषधीराविवेश । व्वैश्वानरःसहसापृष्टोऽअग्निःसनोदिवा-
सरिषस्पातुनक्तम् ॥ ७३ ॥ अश्यामतङ्कामंमग्नेतवोतीऽअश्याम-
रयिꣳरयिवःसुवीरम् । अश्यामव्वाजमभिवाजयन्तोश्यामद्युम्न-
मजराजरन्ते ॥ ७४ ॥ व्वयन्तेऽअद्यररिमाहिकामंमुत्तानहस्तानम-
सोपसद्य । यजिष्ठेनमनसायक्षिदेवानस्रेधतामन्मनाव्विप्रोऽअ-

ग्ने ॥७५॥ धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः । सचेतसो विश्वे देवा यज्ञम्प्रावन्तु नः शुभे ॥७६॥ त्वं यविष्ठ दाशुषो नॄँः पाहि शृणुधी गिरः । रक्षा तोकमुत त्मना ॥ ७७ ॥ इति संहितायां अष्टादशोऽध्यायः ॥

ॐ अथैकोनविंशतितमोऽध्यायः ॐ

ॐ स्वाद्वीन्त्वा स्वादुना तीव्रान्तीव्रेणामृताममृतेन । मधुमतीम्मधुमता सृजामि सꣳ सोमेन । सोमोस्यश्विभ्याम्पच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ॥१॥ परीतो षिञ्चता सुतꣳ सोमो य उत्तमꣳ हविः । दधन्वा यो नर्यो अप्स्वन्तरा सुषाव सोममद्रिभिः ॥२॥ वा-

योऽपूतऽपवित्रेणप्रत्यङ्कसोमोऽअतिद्रुतः। इन्द्रस्यसुज्ज्यःसखा। व्वा-
योऽपूतऽपवित्रेणप्राङ्कसोमोऽअतिद्रुतः। इन्द्रस्यसुज्ज्यःसखा ॥३॥
पुनातितेपरिस्रुतᳪसोमᳪसूर्य्यस्यदुहिता। व्वारेणशश्वतातना ॥४॥
ब्रह्मक्षत्रम्पवतेतेजऽइन्द्रियᳪसुरयासोमःसुतऽआसुतोमदाय। शु-
क्रेणदेवदेवताःपिपृग्धिरसेनान्नंय्यजमानायधेहि ॥ ५ ॥ कुविदङ्ग-
यवमन्तोयवञ्चिद्यथादान्त्यनुपूर्वंव्वियूय। इहेहैषाङ्कृणुहिभोजना-
नियेवर्हिषोनमउक्तिंय्यजन्ति। उपयामगृहीतोस्यश्विभ्यान्त्वा
सरस्वत्यैत्वेन्द्रायत्वासुत्राम्णऽएषतेयोनिस्तेजसेत्वाव्वीर्य्यायत्वा-
वलायत्वा ॥ ६ ॥ नानाहिवान्देवहितᳪसदस्कृतम्मासᳪसृक्षाथाम्प-

रमेव्योमन् । सुरात्वमसिशुष्मिणीसोमऽएषमामाहिᳬसीः स्वांय्यो-
निमाविशन्ती ॥ ७ ॥ उपयामगृहीतोस्याश्विनन्तेजः सारस्वतंव्वी-
र्य्यमैन्द्रम्बलम् । एषतेयोनिर्म्मोदायत्वानन्दायत्वामहसेत्वा ॥ ८ ॥
तेजोसितेजोमयिधेहिव्वीर्य्यमसिव्वीर्य्यम्मयिधेहिबलमसिबलम्मयि-
धेह्योजोस्योजोमयिधेहिमन्युरसिमन्युम्मयिधेहिसहोसिसहोमयि-
धेहि ॥ ९ ॥ याव्याघ्रंव्विषूचिकोभौव्वृकञ्चरक्षति । श्येनम्पतत्रि-
णᳬसिᳬहᳬसेमम्पात्वᳬहसः ॥ १० ॥ यदापिपेषमातरम्पुत्रः प्रमुदि-
तोधयन् ॥ एतत्तदग्नेऽअनृणोभवाम्यहतौपितरौमया । सम्पृचस्थ-
सम्माभद्रेणपृङ्क्तव्विपृचस्थव्विमापाप्मनापृङ्क्त ॥ ११ ॥ देवाय्यज्ञ-

मंतन्न्वतभेषजम्भिषजाश्विना । व्वाचासरस्वतीभिषगिन्द्रायेन्द्रि-
याणिदधतः ॥१२॥ दीक्षायैरूपꣳशष्पाणिप्प्रायणीयस्यतोक्मानि ।
क्रयस्यरूपꣳसोमस्यलाजाःसोमाꣳशवोमधु ॥ १३ ॥ आतिथ्य-
रूपम्मासरम्महावीरस्यनग्नहुः । रूपमुपसदामेतत्तिस्रोरात्रीःसुरा-
सुता ॥ १४ ॥ सोमस्यरूपङ्क्रीतस्यपरिस्रुत्परिषिच्यते ॥ अश्वि-
भ्यान्दुग्धम्भेषजमिन्द्रायैन्द्रꣳसरस्वत्या ॥१५॥ आसन्दीरूपꣳराजा-
सन्द्यैव्वेद्यैकुम्भीसुराधानी ॥ अन्तरऽउत्तरवेद्यारूपङ्कारोतरो-
भिषक् ॥ १६ ॥ व्वेद्यावेदिःसमाप्प्यतेबर्हिषाबर्हिरिन्द्रियम् । यूपे-
नयूपऽआप्प्यतेप्प्रणीतोऽअग्निरग्निना ॥१७॥ हविर्द्धानंयदश्विना-

श्रीदूध्रंब्बत्सरस्वती । इन्द्रायैन्द्रꣳसदस्कृतम्पत्नीशालङ्गार्हपत्यः
॥ १८ ॥ प्रैषेभिः प्रैषानाप्नोत्याप्रीभिराप्रीर्य्यज्ञस्य । प्रयाजेभिरनु-
याजान्वषट्कारेभिराहुतीः ॥ १९ ॥ पशुभिः पशूनाप्नोतिपुरोडा-
शैर्हवीꣳष्या । छन्दोभिःसामिधेनीर्य्याज्याभिर्वषट्कारान् ॥२०॥
धानाःकरम्भःसक्तवःपरीवापःपयोदधि । सोमस्यरूपꣳहविषऽ-
आमिक्षाव्वाजिनम्मधु ॥ २१ ॥ धानानाꣳरूपङ्कुवलम्परीवापस्यगो-
धूमाः ॥ सक्तूनाꣳरूपम्बदरमुपवाकाःकरम्भस्य ॥२२॥ पयसो-
रूपंय्यद्यवादध्नोरूपङ्कर्कन्धूनि । सोमस्यरूपंव्वाजिनꣳसौम्यस्य-
रूपमामिक्षा ॥ २३ ॥ आश्रावयेतिस्तोत्रियाःप्रत्याश्रावोऽअनु-

रूपꣳ । यजेतिधाय्यारूपम्प्रगाथायेयजामहाः ॥ २४ ॥ अर्द्धऽऋचै-
रुक्थानाꣳरूपम्पदैराप्नोतिनिविदः । प्रणवैःशस्त्राणाꣳरूपम्प-
यसासोमऽआप्यते ॥ २५ ॥ अश्विभ्याम्प्रातःसवनमिन्द्रेणैन्द्र-
म्माध्यन्दिनम् । वैश्वदेवꣳसरस्वत्यातृतीयमाप्तꣳसवनम् ॥२६॥
वायव्यैर्वायव्यान्याप्नोतिसतेनद्रोणकलशम् । कुम्भीभ्यामम्भृ-
णौसुतेस्थालीभिस्थालीराप्नोति ॥ २७ ॥ यजुर्भिराप्यन्तेग्रहाग्रहैः-
स्तोमाश्चविष्टुतीः । छन्दोभिरुक्थाशस्त्राणिसाम्नावभृथऽआ-
प्यते ॥२८॥ इडाभिर्भक्षानाप्नोतिसूक्तवाकेनाशिषः । शंयुना-
पत्नीसंयाजान्त्समिष्टयजुषासꣳस्थाम् ॥ २९ ॥ व्रतेनदीक्षामाप्नो-

तिदीक्षयाप्नोतिदक्षिणाम् । दक्षिणाश्श्रद्धामाप्नोतिश्रद्धयासत्यमाप्यते
॥ ३० ॥ एतावद्रूपंय्यज्ञस्ययद्देवैर्ब्रह्मणाकृतम् । तदेतत्सर्वमा-
प्नोतियज्ञेसौत्रामणीसुते ॥३१॥ सुरावन्तम्बर्हिषदꣳसुवीरंय्यज्ञꣳहि-
न्वन्तिमहिषानमोभिः ॥ दधानाःसोमन्दिविदेवतासुमदेमेन्द्रंय्यजमा-
नाःस्वर्काः ॥३२॥ यस्तेरसःसम्भृतऽओषधीषुसोमस्यशुष्मःसुरयासु
तस्य । तेनजिन्वयजमानम्मदेनसरस्वतीमश्विनाविन्द्रमग्निम् ॥३३॥
यमश्विनानमुचेरासुरादधिसरस्वत्यसुनोदिन्द्रियाय । इमन्तꣳशु-
क्रम्मधुमन्तमिन्दुꣳसोमꣳराजानमिहभक्षयामि ॥ ३४ ॥ यदत्ररि-
प्तꣳरसिनः सुतस्ययदिन्द्रोऽअपिबच्छचीभिः । अहन्तदस्यमनसा-

शिवेनसोमᳬराजानमिहभक्षयामि ॥३५॥ पितृब्भ्यः स्वधायिब्भ्यः स्वधानमः पितामहेब्भ्यः स्वधायिब्भ्यः स्वधानमᳬप्रपितामहेब्भ्यᳬस्वधायिब्भ्यः स्वधानमः । अक्षन्न्पितरोमीमदन्तपितरोतीतृपन्तपितरᳬपितरᳬशुन्धद्ध्वम् ॥ ३६ ॥ पुनन्तुमापितरः सोम्म्यासः पुनन्तुमापितामहाᳬपुनन्तुप्प्रपितामहाᳬपवित्रेणशतायुषा । पुनन्तुमापितामहाᳬपुनन्तुप्प्रपितामहाᳬ । पवित्रेणशतायुषाव्विश्श्वमायुर्व्यश्श्नवै ॥ ३७ ॥ अग्नऽआयूᳬषिपवसऽआसुवोर्ज्जमिषञ्चनᳬ । आरेबाधस्वदुच्छुनाम् ॥३८॥ पुनन्तुमादेवजनाᳬपुनन्तुमनसाधियः । पुनन्तुव्विश्श्वाभूतानिजातवेदᳬपुनीहिमा ॥ ३९ ॥ पवित्रेणपुनीहि-

साशुक्क्रेणदेवदीद्द्यत् । अग्नेक्क्रत्वाक्क्रतूँ१ऽरनु ॥ ४० ॥ यत्तेपवि
त्त्रमर्चिष्ष्यग्ग्नेव्विततमन्तरा ॥ ब्रह्म्मतेनपुनातुमा ॥ ४१ ॥ पव-
मानः सोऽअद्द्यनः पवित्त्रेणव्विचर्षणिः । यः पोतासपुनातुमा ॥४२॥
उभाब्भ्यान्देवसवितः पवित्त्रेणसवेनच । माम्पुनीहिव्विश्श्वतः ॥४३॥
व्वैश्श्वदेवीपुनतीदेव्व्यागाद्यस्यामिमाबह्व्यस्तन्न्वोव्वीतपृष्ठाः ।
तयामदन्तः सधमादेषुव्वयᳬंस्यामपतयोरयीणाम् ॥ ४४ ॥ येस-
मानाः समनसः पितरोयमराज्ज्ये । तेषाँल्लोकः स्वधानमोयज्ञोदेवेषु-
कल्पताम् ॥ ४५ ॥ येसमानाः समनसोजीवाजीवेषुमामकाः ।
तेषाᳬंश्श्रीर्म्मयिकल्प्पतामस्म्मिँल्लोकेशतᳬंसमाः ॥ ४६ ॥ द्वेसृतीऽ-

अश्शृणवम्पितृणामहन्देवानामुतमर्त्यानाम् । ताभ्यामिदंव्विश्श्वमेज-
त्समेतियदन्तरापितरम्मातरञ्च ॥४७॥ इदᳬहविःप्रजननम्मेऽअस्तु-
दशवीरᳬसर्व्वगणᳬस्वस्तये । आत्मसनिप्रजासनिपशुसनिलोकस-
न्न्यभयसनि । अग्निःप्रजाम्बहुलाम्मेकरोत्वन्नम्पयोरेतोऽअस्म्मासुधत्त-
॥४८॥ उदीरतामवरऽउत्परासऽउन्मध्यमाःपितरःसोम्म्यासः । असुं-
य्यऽईयुरवृकाऽऋतज्ञास्तेनोवन्तुपितरोहवेषु ॥४९॥ अङ्गिरसोनःपित-
रोनवग्ग्वाऽअथर्व्वाणोभृगवःसोम्म्यासः । तेषांव्वयᳬसुमतौयज्ञि-
यानामपिभद्रेसौमनसेस्याम ॥ ५० ॥ येनःपूर्वेपितरःसोम्म्यासो-
नूहिरेसोमपीथंव्वसिष्ठाः । तेभिर्यमःसᳬरराणोहवीᳬष्युशन्नुश-

इ॒भिः॑प्रतिका॒मम॑त्तु ॥ ५१ ॥ त्वꣳसो॑म॒प्प्रचि॑कितोमनी॒षात्वꣳर-
जि॑ष्ठ॒मनु॑नेषि॒पन्था॑म् । तव॒प्प्रणी॑तीपि॒तरो॑नऽइन्दोदे॒वेषु॒रत्न॑मभजन्त॒-
धीरा॑ꣳ ॥ ५२ ॥ त्वया॒हिनः॑पि॒तरः॑सोम॒पूर्व्वे॑कर्म्मा॑णिच॒क्क्रुः॑पव-
मान॒धीरा॑ꣳ । व॒न्न्वन्नवा॑तꣳपरि॒धीँ१ऽरपो॑र्णुवी॒रेभि॒रश्व्वै॑र्म॒घवा॑भ-
वानꣳ ॥ ५३ ॥ त्वꣳसो॑मपि॒तृभिः॑संव्विदा॒नोनु॒द्यावा॑पृथि॒वीऽआत॑-
न्थ। तस्म्मै॑तऽइन्दोह॒विषा॑व्विधेमव्व॒यꣳस्या॑म॒पत॑योरयी॒णाम् ॥५४॥
बर्हि॑षदꣳपितरऽऊ॒त्युर्व्वा॒गि॒मावो॑ह॒व्व्याच॑क्रमाजु॒षद्ध्वम् । तऽआग॒ता-
वं॑सा॒शन्त॑मे॒नाथा॑न॒ꣳशंय्योर॑र॒पोद॑धात ॥ ५५ ॥ 'आहम्पि॒तन्त्सु॑वि॒द-
त्राँ॑२ऽअवित्सि॒नपा॑तञ्चव्वि॒क्क्रम॑णञ्च॒व्विष्णोः॑ꣳ । व॒र्हि॒षदो॒येस्व॒धया॑-

सुतस्य भजन्त पित्वस्त ऽ इहागमिष्ठाः ॥ ५६ ॥ उपहूताः पितरः सो-म्म्यासो वर्हिष्ष्ये[1] षु निधिषु प्रियेषु । त ऽ आगमन्तु त ऽ इह श्रुवन्त्वधि-ब्ब्रुवन्तु ते वन्त्वस्म्मान् ॥ ५७ ॥ आयन्तु नः पितरः सोम्म्यासोग्नि-ष्ष्वात्ताः पथिभिर्देवयानैः । अस्म्मिन्यज्ञे स्वधया मदन्तोधिब्ब्रुवन्तु ते वन्त्वस्म्मान् ॥५८॥ अग्निष्ष्वात्ताः पितर ऽ एह गच्छत सदः सदः स-

१. वर्हिः शब्दात् दत्तमित्यर्थे 'वर्हिषि दत्तम्' ४।४।११९। इत्यनेन यत्प्रत्यये ।

२. 'एदोद्भ्यां पूर्वमकारः (४।६१) एकारौकाराभ्यां पर ऋकारः पूर्वरूप-मापद्यते । तेऽप्सरसाम् २४।३७। व्वेदोऽसि (२।२१) स्तुपोऽसि (२।२) इत्या-दिषु ज्ञेयम् ।

दत्तसुप्प्रणीतयः । अत्ताहवीᳪषिप्प्रयतानिबर्हिष्ष्यथारयिᳪसर्व्ववी-
रन्दधातन ॥ ५९ ॥ येऽअग्निष्ष्वात्तायेऽअनग्निष्ष्वात्तामद्ध्येदि-
वःस्वधयामादयन्ते । तेब्भ्यः स्वराडसुनीतिमेतांय्यथावशन्तन्व-
ङ्कल्प्पयाति ॥ ६० ॥ अग्निष्ष्वात्तानृतुमतोहवामहेनाराशᳪसे-
सोमपीथंय्यऽआशुः । तेनोव्विप्प्रासᳪसुहवाभवन्तुव्वयᳪस्याम-
पतयोरयीणाम् ॥ ६१ ॥ आच्च्याजानुदक्षिणतोनिषद्येमंय्यज्ञमभि-
गृणीतव्विश्श्वे । माहिᳪसिष्टपितरᳪकेनचिन्नोयद्वऽआगः पुरुष-
ताकराम ॥ ६२ ॥ आसीनासोऽअरुणीनामुपस्थेरयिन्धत्तदाशुषे-
मर्त्याय । पुत्रेब्भ्यः पितरस्तस्यव्वस्वᳪप्प्रयच्छतऽइहोर्जन्दधात

॥ ६३ ॥ सम॑ग्नेकव्यवाहनत्वंचिन्मन्न्यंसेरयिम् । तन्नोगीर्भिः
श्श्रवाय्यन्देवत्त्रापनयायुजम् ॥ ६४ ॥ सोऽअग्निःकव्यवाहनः
पितॄन्यक्षदृतावृधः । प्रेदुहव्यानिव्वोचतिदेवेभ्यश्श्चपितृभ्य-
ऽआ ॥ ६५ ॥ त्वमग्नऽईडितःकव्यवाहनावाड्ढव्यानिसुरभीणि-
कृत्वी । प्रादाःपितृभ्यःस्वधयातेऽअक्षन्नद्धित्वन्देवप्रयताहवींषि
॥ ६६ ॥ येचेहपितरोयेचनेहयाँश्चविद्मयाँ२ऽउचनप्रविद्म । त्वं-
वेत्थयतितेजातवेदःस्वधाभिर्य्यज्ञꣳसुकृतञ्जुषस्व ॥ ६७ ॥ इदम्पितृ-
भ्योनमोऽअस्त्वद्ययेपूर्वासोयऽउपरासऽईयुः । येपार्थिवेरजस्यानि-
षत्तायेवानूनꣳसुवृजनासुविक्षु ॥ ६८ ॥ अधायथानःपितरःपरासः-

प्रत्नासोऽअग्नऽऋतमाशुषाणाः । शुचीदयन्दीधितिमुक्क्थशासः-
क्षामाभिन्दन्तोऽअरुणीरपव्व्रन् ॥ ६९ ॥ उशन्तस्त्वानिधीमह्युशन्तः समिधीमहि ॥ उशन्नुशतऽआवहपितॄन्हविषेऽअत्तवे ॥ ७० ॥
अपाम्फेनेननमुचेः शिरऽइन्द्रोदवर्त्तयः ॥ विश्वायदजयस्पृधः
॥ ७१ ॥ सोमोराजामृतः सुतऽऋजीषेणाजहान्मृत्युम् । ऋ-
तेनसत्त्यमिन्द्रियम्विपानः शुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृत-

---

१. 'दर्दुरौदरदेशौ तु प्रफुल्लेते पुनर्यथा । एवं वर्णाः प्रयोक्तव्याः 'अपाम्फेने' निदर्शनम्' (या० शि० श्लो० ६५) दर्दुरस्य-मण्डूकेति प्रसिद्धजन्तोः उदरदेशौ प्रफुल्लेते वायुभरणेन स्थूलौ भवतः ।

म्मधु ॥ ७२ ॥ अद्भ्यः क्षीरंव्व्यपिबत्क्रुङ्ङाङ्गिरसो धिया । ऋतेन-
सत्यमिन्द्रियंव्विपानᳬं शुक्रमन्धस ऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु
॥७३॥ सोममद्भ्यो व्व्यपिबच्छन्दसा हᳬंसः शुचिषत् । ऋतेनसत्य-
मिन्द्रियंव्विपानᳬं शुक्रमन्धस ऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥७४॥
[शतम् ११००] अन्नात्परिस्रुतो रसम्ब्रह्मणा व्व्यपिबत्क्षत्रम्पयःᳬं सोम-
म्प्रजापतिः । ऋतेनसत्यमिन्द्रियंव्विपानᳬं शुक्रमन्धस ऽइन्द्रस्येन्द्रि-
यमिदम्पयोमृतम्मधु ॥ ७५ ॥ रेतोमूत्रंव्विजहाति योनिम्प्रविशदिन्द्रि-
यम् । गर्ब्भो जरायुणावृत ऽउल्बञ्जहाति जन्मना । ऋतेनसत्यमि-
न्द्रियंव्विपानᳬं शुक्रमन्धस ऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥७६॥

दृष्ट्वारूपेव्याकरोत्सत्यानृतेप्रजापतिः ॥ अश्रद्धामनृतेदधाच्छ्-
द्धाꣳसत्येप्रजापतिः । ऋतेनसत्यमिन्द्रियंविपानꣳशुक्रमन्धसऽ-
इन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ७७ ॥ वेदेनरूपेव्यपिबत्सुतासु-
तौप्रजापतिः । ऋतेनसत्यमिन्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्ये-
न्द्रियमिदम्पयोमृतम्मधु ॥ ७८ ॥ दृष्ट्वापरिस्रुतोरसꣳशुक्रेणशु-
क्रंव्यपिबत्पयःसोमम्प्रजापतिः । ऋतेनसत्यमिन्द्रियंविपान-
ꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥७९॥ सीसेनतन्त्र-
म्मनसामनीषिणऽऊर्णासूत्रेणकवयोवयन्ति । अश्विनायज्ञꣳस-
वितासरस्वतीन्द्रस्यरूपंवरुणोभिषज्यन् ॥ ८० ॥ तदस्यरूपममृत-

दृꣳशचीभिस्तिस्रोदधुर्देवताꣳसꣳरराणाः । लोमानिशष्पैर्बहुधान-
तोक्मभिस्त्वगस्यमाꣳसमभवन्नलाजाः ॥ ८१ ॥ तदश्विनाभि-
षजारुद्रवर्त्तनीसरस्वतीव्वयतिपेशोऽअन्तरम् । अस्थिमज्जानम्मा-
सरैꣳकारोतरेणदधतोगवान्त्वचि ॥८२॥ सरस्वतीमनसापेशलंव्वसु-
नासत्याभ्यांव्वयतिदर्शतंव्वपुः । रसम्परिस्रुतानरोहितन्नग्नहुर्द्धी-
रस्तसरन्नवेम ॥ ८३ ॥ पयसाशुक्रममृतञ्जनित्रꣳसुरयामूत्राज्जन-
यन्तरेतः । अपामतिन्दुर्म्मतिम्बाधमानाऽऊवद्ध्यंव्वातꣳसब्वुन्त-
दारात् ॥ ८४ ॥ इन्द्रः सुत्रामाहृदयेनसत्यम्पुरोडाशेनसविताज-
जान । यकृत्क्लोमानंव्वरुणोभिषज्ज्यन्मतस्नेव्वायव्यैर्न्नमिनातिपि-

त्तम् ॥ ८५ ॥ आन्त्राणिस्थालीर्म्मधुपिन्न्वमानागुदाःपात्राणिसुदु-
घानधेनुः । श्येनस्यपत्रन्नप्प्लीहाशचीभिरासन्दीनाभिरुदरन्नमाता
॥ ८६ ॥ कुम्भोव्वनिष्ठुर्ज्जनिताशचीभिर्य्यस्मिन्नग्ग्रेयोन्न्याङ्गर्भोऽ-
अन्तः । प्प्लाशिर्व्यक्क्तःशतधारऽउत्सोदुहेनकुम्भीस्वधाम्पितृभ्यः
॥ ८७ ॥ मुखᳬसदस्यशिरऽइत्सतेनजिह्वापवित्रमश्विनासन्त्सर-
स्वती । चप्पन्नपायुर्ब्भिषगस्यव्वालोव्वस्तिर्न्नशेपोहरसातरस्वी ॥८८॥
अश्विभ्याञ्चक्षुरमृतङ्ग्रहाभ्याञ्छागेनतेजोहविषाशृतेन । पक्ष्माणि-
गोधूमैःकुवलैरुतानिपेशोनशुक्क्रमसितंव्वसाते ॥ ८९ ॥ अविर्न्न-
मेषोनसिव्वीर्य्यायप्प्राणस्यपन्थाऽअमृतोग्ग्रहाभ्याम् । सरस्वत्युप-

वाकैर्व्व्यानन्नस्यानिबर्हिर्ब्बदरैर्ज्जजान ॥ ९० ॥ इन्द्रस्यरूपमृषभो-
बलायकर्णाब्भ्याꣳश्रोत्रममृतङ्ग्रहाब्भ्याम् । यवानबर्हिर्भ्रुविकेस-
राणिकर्क्कन्धुयज्ञेमधुसारघम्मुखात् ॥ ९१ ॥ आत्मन्नुपस्थेनव्वृकस्य-
लोममुखेश्मश्रूणिनव्याघ्रलोम । केशानशीर्षन्न्यशसेश्रियैशिखा-
सिꣳहस्यलोमत्त्विषिरिन्द्रियाणि ॥ ९२ ॥ अङ्गान्न्यात्मन्भिषजात-
दश्विनात्मानमङ्गैꣳसमधात्सरस्वती । इन्द्रस्यरूपꣳशतमानमायु-
श्चन्द्रेणज्ज्योतिरमृतन्दधानाꣳ ॥ ९३ ॥ सरस्वतीयोन्न्याङ्गर्भमन्तर-
श्विब्भ्याम्पत्नीसुकृतम्बिभर्ति । अपाꣳरसेनव्वरुणोनसाम्नेन्द्रꣳ-
श्रियैजनयन्नप्सुराजा ॥ ९४ ॥ तेजःपशूनाꣳहविरिन्द्रियावत्प-

रिस्रुतापयंसासारघम्मधुं । अश्विभ्यान्दुग्धम्भिषजासरंस्वत्या-
सुतासुताभ्यांसमृतःसोमऽइन्दुः ॥ ९५ ॥ इति संहितायामेकोन-
विंशातितमोऽध्यायः ॥

ॐ अथ विंशोऽध्यायः ॐ

[1]ॐक्षत्रस्ययोनिरसिक्षत्रस्यनाभिरसि। मात्वाहिꣳसीन्मामाहिꣳ

---

१. एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चाऽर्धमात्रिकम् ॥ प्रणवं तु प्लुतं कुर्याद् व्याहृतीर्मात्रिका विदुः। (या. श्लो. १६-१७)

२. के पुरुषाः वर्णोच्चारणे असमर्थाः तान् आह—

न करालो न लम्बोष्ठो नाऽव्यक्तो नाऽनुनासिकः। गद्गदो बद्धजिह्वश्च न वर्णान् वक्तुमर्हति ॥ (या० श्लो० २६)

सीदं ॥ १ ॥ निषसाद धृतव्रतो वरुणः पस्त्यास्वा । साम्राज्याय सुक्रतुः । मृत्योः पाहि विद्योत्पाहि ॥ २ ॥ देवस्य त्वा सवितुः

---

३. शङ्कितं भीतमुद्धृष्टमव्यक्तमनुनासिकम् । काकस्वरं मूर्द्धिगतं तथा स्थानविवर्जितम् ॥ विस्वरं विरसं चैव विश्लिष्टं विषमाहतम् । व्याकुलं तालहीनं च पाठदोषाश्चतुर्दश ॥ (या० २८।२९)

४. हस्तसंनिवेशनप्रकारमाह—उत्तानं सोन्नतं किञ्चित् सुव्यक्ताङ्गुलिरञ्जितम् । स्वरविच्च करं कुर्यात्प्रादेशाद्देशगामिनम् ॥ उत्तानम्—उपरितलम् । सोन्नतम्—अङ्गुल्यग्रेषु औन्नत्यविशिष्टम् । (या० ५१)

५. स्वरिते त्र्यङ्गुलं विद्यान्निपाते तु षडङ्गुलम् । उत्थाने तु नवाङ्गुल्यमेतत्स्वारस्य लक्षणम् ॥

प्प्रसवेशिश्वनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् । अश्विनोर्ब्भैषज्ज्ये-
नतेजसेब्ब्रह्म्मवर्च्चसायाभिषिंञ्चामिसरस्वत्यैभैषज्ज्येनव्वीर्य्यायान्ना-
द्यायाभिषिंञ्चामीन्द्रस्येन्द्रियेणबलायश्रियैयशसेभिषिंञ्चामि ॥ ३ ॥
कोऽसिकतमोसिकस्म्मैत्वाकायत्वा । सुश्लोकसुमङ्गलसत्त्यराजन् ॥४॥
शिरोमेश्रीर्य्यशोमुखन्त्विषिः केशाश्चश्म्मश्रूणि । राजामेप्प्राणो-
ऽअमृतꣳसम्म्राट्चक्षुर्व्विराट्श्रोत्रम् ॥ ५ ॥ जिह्वामेभद्रंव्वाङ्महोम-
नोमन्न्युःस्वराड्भामः । मोदाःप्प्रमोदाऽअङ्गुलीरङ्गानिमित्रम्मेस-
हः ॥६॥ बाहूमेबलमिन्द्रियꣳहस्तौमेकर्म्मव्वीर्य्यम् । आत्त्माक्षत्र-
मुरोमम ॥ ७ ॥ पृष्ठीर्म्मेराष्ट्रमुदरमꣳसौग्ग्रीवाश्चश्श्रोणी । ऊरूऽ-

अरत्नीजानुनीव्विशोमेङ्गानिसर्व्वतः ॥ ८ ॥ नाभिर्म्मेचित्तंव्विज्ञानं-
म्पायुर्म्मेपचितिर्भसत् । आनन्दनन्दावाण्डौमेभगःसौभाग्ग्यम्प-
सः । जङ्घाभ्यांम्पद्भ्यान्धर्म्मोस्मिव्विशिराजाप्प्रतिष्ठितः ॥९॥
प्प्रतिक्षत्त्रेप्प्रतितिष्ठामिराष्ट्रेप्प्रत्यश्श्वेषुप्प्रतितिष्ठामिगोषु । प्रत्य-
ङ्गेषुप्प्रतितिष्ठाम्म्यात्त्मन्प्रतिप्प्राणेषुप्प्रतितिष्ठामिपुष्टेप्प्रतिद्द्या-
वापृथिव्व्योःप्प्रतितिष्ठामियज्ञे ॥ १० ॥ त्रयादेवाऽएकादशात्त्र-
यस्त्रिꣳशाःसुराधसः । बृहस्प्पतिपुरोहितादेवस्यसवितुःसवे ।
देवादेवैरवन्तुमा ॥ ११ ॥ प्रथमाद्द्वितीयैर्द्वितीयास्तृतीयै-
स्तृतीयाःसत्येनसत्त्यंय्यज्ञेनयज्ञोयजुर्भिर्य्यजूꣳषिसामभिःसामान्न्यृ-

ग्गिभर्ऋचं ÷ पुरोनुवाक्याभिःपुरोनुवाक्यायाज्याभिर्य्याज्याव्वष-
ट्कारैर्व्वषट्काराऽआहुतिभिराहुतयोमेकामान्त्समर्द्धयन्तुभूःस्वाहा
॥ १२ ॥ लोमानिप्प्रयतिर्म्ममत्वङ्म्मऽआनतिरागतिः । माᳪंस-
म्मऽउपनतिर्व्वस्वस्थिमज्जाम्मऽआनतिः ॥ १३ ॥ यद्देवादेवहेड-
नन्देवासश्चकृमाव्वयम् । अग्निर्म्मातस्म्मादेनसोव्विश्श्वान्मुञ्च-
त्वᳪंहसः ॥ १४ ॥ यदिदिवायदिनक्तमेनाᳪंसिचकृमाव्वयम् ।
व्वायुर्म्मातस्म्मादेनसोव्विश्श्वान्मुञ्चत्वᳪंहसः ॥ १५ ॥ यदिजाग्ग्र-
द्यदिस्वप्प्नऽएनाᳪंसिचकृमाव्वयम् । सूर्य्योमातस्म्मादेनसोव्वि-
श्श्वान्मुञ्चत्वᳪंहसः ॥ १६ ॥ यद्ग्रामेयदरण्ण्येयत्सभायांय्यदिन्द्रि-

ये । यच्छूद्रे यदर्य्येयदेनश्चकृमाव्वयंयदेकस्याधिधर्म्मणितस्यावयजनमसि ॥ १७ ॥ यदापोऽअग्घ्न्याऽइतिव्वरुणेतिशपामहेततोव्वरुणनोमुञ्च । अवभृथनिचुम्पुणनिचेरुरसिनिचुम्पुणः । अवदेवैर्देवकृतमेनोयक्ष्यवमर्त्यैर्म्मर्त्यकृतम्पुरुराव्णोदेवरिषस्पाहि ॥१८॥ समुद्रेतेहृदयमप्स्वन्तः सन्त्वाव्विशन्त्वोषधीरुतापः । सुमित्रियानऽआपऽओषधयःसन्तुदुर्म्मित्रियास्तस्मैसन्तुयोऽस्मान्द्वेष्टियञ्चव्वयन्द्विष्मः ॥ १९ ॥ द्रुपदादिवमुमुचानःस्विन्नःस्नातोमलादिव । पूतम्पवित्रेणेवाज्ज्यमापःशुन्धन्तुमैनसः ॥ २० ॥ उद्वयन्तमसस्परिस्वःपश्यन्तऽउत्तरम् । देवन्देवत्रासूर्य्यमगन्म्मज्ज्योतिरुत्तमम् ॥२१॥

अपोऽअद्यान्न्वचारिषꣳरसेनसमसृक्ष्महि । पयस्वानग्नऽआगम-
न्तम्मासꣳसृजव्वर्च्चसाप्रजयाचधनेनच ॥२२॥ एधोस्येधिषीमहिस-
मिदसितेजोसितेजोमयिधेहि । समाववर्त्तिपृथिवीसमुषाःसमुसूर्य्यं÷
समुव्विश्श्वमिदञ्जगत् । व्वैश्श्वानरज्ज्योतिर्ब्भूयासंव्विभून्कामा-
न्न्व्यश्नवैभूःस्वाहा ॥२३॥ अब्भ्यादधामिसमिधमग्नेव्व्रतपतेत्वयि ।
व्व्रतञ्चश्श्रद्धाञ्चोपैमीन्धेत्वादीक्षितोऽअहम् ॥२४॥ यत्रब्रह्मचक्ष-
त्रञ्चसम्म्यञ्चौचरतꣳसह । तंल्लोकम्पुण्ण्यम्प्रज्ञेषंय्यत्रदेवाःसहाग्निना
॥२५॥ यत्रेन्द्रश्चव्वायुश्चसम्म्यञ्चौचरतꣳसह । तंल्लोकम्पुण्ण्यम्प्रज्ञे-
षंय्यत्रसेदिर्न्नव्विद्यते ॥२६॥ अꣳशुनातेऽअꣳशुःपृच्च्यताम्परुषापरुः÷

गन्धस्तेसोमंमवतुमदायरसोऽअच्च्युतः ॥२७॥ सिञ्चन्तिपरिषिञ्च-
त्युत्सिञ्चन्तिपुनन्तिच । सुरायैबभ्र्वैमदेकिन्त्वोव्वदतिकिन्त्वः ॥२८॥
धानावन्तङ्करम्भिणमपूपवन्तमुक्क्थिनम् । इन्द्रप्प्रातर्ज्जुषस्वनः ॥२९॥
बृहदिन्द्रायगायतमरुतोव्वृत्रहन्तमम् । येनज्ज्योतिरजनयन्नृतावृधो-
देवन्देवायजागृवि ॥ ३० ॥ अद्ध्वर्य्योऽअद्रिभिः सुतः सोमम्पवि-
त्रऽआनय । पुनाहीन्द्रायपातवे ॥ ३१ ॥ योभूतानामधिपतिर्य्यस्मिँ-
ल्लोकाऽअधिश्रिताः । यऽईशेमहतोमहाँस्तेनगृह्णामित्वामहम्मयिगृ-
ह्णामित्वामहम् ॥ ३२ ॥ उपयामगृहीतोस्यश्विब्भ्यान्त्वासरस्वत्यै-
त्वेन्द्रायत्वासुत्राम्मणऽएषतेयोनिरश्विब्भ्यान्त्वासरस्वत्यैत्वेन्द्राय-

त्वासुत्राम्णे ॥ ३३ ॥ प्राणपामेऽअपानपाश्चक्षुष्पाःश्रोत्रपाश्चमे ।
व्वाचोमेव्विश्वभेषजोमनसोसिव्विलायकः ॥ ३४ ॥ अश्विनंकृत-
स्यतेसरस्वतिकृतस्येन्द्रेणसुत्राम्णाकृतस्य । उपहूतऽउपहूतस्यभक्ष-
यामि ॥ ३५ ॥ समिद्धऽइन्द्रऽउषसामनीकेपुरोरुचापूर्व्वकृद्वावृधा-
नः । त्रिभिर्द्देवैस्त्रिᳬशतावज्रबाहुर्ज्जघानव्वृत्रंव्विदुरोव्ववार ॥३६॥
नराशᳬसःप्रतिशूरोमिमानस्तनूनपात्प्रतियज्ञस्यधाम । गोभिर्व्वपा-
वान्मधुनासमञ्जन्हिरण्यैश्चन्द्रीयजतिप्रचेताः ॥ ३७ ॥ ईडितो-
देवैर्हरिवाँ२ऽअभिष्टिराजुह्वानोहविषाशर्द्धमानः । पुरन्दरोगोत्र-
भिद्वज्रबाहुरायातुयज्ञमुपनोजुषाणः ॥ ३८ ॥ जुषाणोबर्हिर्हरिवा-

न्नऽइन्द्रं॑ प्राचीन॑ᳪ सीदत्प्रदिशा॑पृथि॒व्याः । उ॒रुव्प्रथा॑ᳪ प्रथ॑मान॒ᳪ स्यो॒नमा॑दि॒त्यैर॒क्तं॑व्वसु॑भिᳪ स॒जोषा॑ᳪ ॥ ३९ ॥ इन्द्र॒न्दुर॑ कव॒ष्यो॒ धाव॑माना॒व्वृषा॑णं॒य्यन्तु॒जन॑यᳪ सु॒पत्नी॑ᳪ । द्वारो॑दे॒वीर॒भितो॒ऽव्विश्र॑यन्ता॒ᳪ सु॒वीरा॒व्वीरम्प्रथ॑माना॒महो॑भिᳪ ॥ ४० ॥ उ॒षासा॒नक्ता॑बृह॒ती बृ॒हन्त॒म्पय॑स्वतीसु॒दुघे॒शूर॒मिन्द्र॑म् । तन्तु॑न्त॒तम्पेश॑सासं॒व्वय॑न्ती॒दे॒वाना॑न्दे॒वं॒य्यज॑तᳪ सुरु॒क्मे ॥ ४१ ॥ दैव्या॒मिमा॑ना॒मनु॑षᳪ पुरु॒त्रा होता॑रा॒विन्द्र॑म्प्रथ॒मासु॒वाचा॑ । मू॒र्द्धन्न्य॒ज्ञस्य॒मधु॑ना॒दधा॑ना॒प्प्राचीन॒ञ्ज्योति॑र्ह॒विषा॑व्वृधात॒ᳪ ॥ ४२ ॥ ति॒स्रोदे॒वीर्ह॒विषा॒वर्द्ध॑माना॒ऽइन्द्र॑ञ्जुषा॒णा जन॑यो॒नपत्नी॑ᳪ । अच्छि॑न्न॒न्तन्तु॒म्पय॑सा॒सर॑स्वतीडा॑दे॒वीभार॑ती॒व्वि-

शश्वतूर्त्तिः ॥४३॥ त्वष्टादधच्छुष्ममिन्द्रायवृष्णेऽपाकोऽचिष्टुर्यशसे
पुरूणि। वृषायजन्वृषणम्भूरिरेतामूर्द्धन्यज्ञस्यसमनक्तुदेवान्॥४४॥
वनस्पतिरवसृष्टोनपाशैस्त्मन्यासमञ्जञ्छमितानदेवः । इन्द्रस्य-
हव्यैर्जठरम्पृणानःस्वदातियज्ञम्मधुनाघृतेन ॥ ४५ ॥ स्तोकानामिन्दु
म्प्रतिशूरऽइन्द्रोवृषायमाणोवृषभस्तुराषाट् । घृतप्रुषामनसामोद-
मानाःस्वाहादेवाऽअमृतामादयन्ताम् ॥४६॥ आयात्विन्द्रोवसऽउपन-
ऽइहस्तुतःसधमादस्तुशूरः । वावृधानस्तविषीर्यस्यपूर्वीर्द्यौर्न-
क्षत्रमभिभूतिपुष्यात् ॥ ४७ ॥ आनऽइन्द्रोदूरादानऽआसादभिष्टिकृ-
दवसेयासदुग्रः । ओजिष्ठेभिर्नृपतिर्वज्रबाहुःसङ्गेसमत्सुतुर्व-

णिं÷पृतन्न्यून् ॥ ४८ ॥ आनऽइन्द्रोहरिंभिर्य्यात्वच्छार्व्वाचीनोवसे-
राधसेच । तिष्ठांतिव्वज्ज्रीमघवांव्विरप्शीमंय्यज्ञमनुनोव्वाजसा-
तौ ॥ ४९ ॥ त्रातारमिन्द्रमवितारमिन्द्रᳬहवेहवेसुहवᳬशूरमिन्द्रम् ।
ह्वयामिशक्रम्पुरुहूतमिन्द्रᳬस्वस्तिनोमघवाधात्विन्द्रः ÷ ॥ ५० ॥
इन्द्र÷सुत्रामास्ववाँ२ऽअवोभिःसुमृडीकोभवतुव्विश्श्ववेदाः । बाध-
तान्द्वेषोऽअभंयङ्कृणोतुसुवीर्य्यस्यपतयःस्याम ॥ ५१ ॥ तस्यंव्वयᳬ
सुमतौयज्ञियस्यापिभद्द्रेसौमनसेस्याम । ससुत्रामास्ववाँऽइन्द्रोऽअ-
स्म्मेऽआराच्चिद्द्वेषं÷सनुतर्य्युयोतु ॥ ५२ ॥ आमन्द्रैरिन्द्रहरिभि-
र्य्याहिमयूररोमभिः । मात्वाकेचिन्नियमन्न्विन्नपाशिनोतिधन्वेवताँ

२ऽइहि ॥ ५३ ॥ एवेदिन्द्रंवृषणंवज्रबाहुंवसिष्ठासोऽअभ्यर्चन्त्य-
र्कैः । सनस्तुतोवीरवद्धातुगोमद्यूयम्पातस्वस्तिभिःसदानः ॥५४॥
समिद्धोऽअग्निरश्विनातप्तोघर्मोविराट्सुतः । दुहेधेनुःसरस्व-
तीसोमꣳशुक्रमिहेन्द्रियम् ॥ ५५ ॥ तनूपाभिषजासुतेश्विनोभासर-
स्वती । मध्वारजाꣳसीन्द्रियमिन्द्रायपथिभिर्वहान् ॥ ५६ ॥ इन्द्रा-
येन्दुꣳसरस्वतीनराशꣳसेननग्नहुम् । अधातामश्विनामधुभेषज-
म्भिषजासुते ॥ ५७ ॥ आजुह्वानासरस्वतीन्द्रायेन्द्रियाणिवीर्यम् ।
इडाभिरश्विनाविषꣳसमूर्जꣳसꣳरयिन्दधुः ॥ ५८ ॥ अश्विनानमु-
चेःसुतꣳसोमꣳशुक्रम्परिस्रुता । सरस्वतीतमाभरद्बर्हिषेन्द्रायपा-

तवे ॥ ५९ ॥ कवष्ष्युोनव्व्यचस्वतीरश्श्विब्भ्यान्नदुरोदिशः । इन्द्रो
नरोदसीऽउभेदुहेकामान्त्सरस्वती ॥ ६० ॥ उषासानक्तमश्श्विना
दिवेन्द्रᳪसायमिन्द्रियैः । सञ्जानानेसुपेशसासमञ्जातेसरस्वत्या
॥६१॥ पातन्नोऽअश्श्विनादिवापाहिनक्तᳪसरस्वति । दैव्व्याहोता-
राभिषजापातमिन्द्रᳪसचासुते ॥ ६२ ॥ तिस्रस्त्रेधासरस्वत्यश्श्विना
भारतीडा । तीव्व्रम्परिस्स्रुतासोममिन्द्रायसुषुवुर्म्मदम् ॥ ६३ ॥ अ-
श्श्विनाभेषजम्मधुभेषजन्नᳪसरस्वती । इन्द्रेत्वष्टायशᳪश्रियᳪरूपᳪ-
रूपमधुᳪसुते ॥ ६४ ॥ ऋतुथेन्द्रोव्वनस्प्पतिः शशमानः परिस्स्रुता ।
कीलालमश्श्विब्भ्याम्मधुदुहेधेनुःसरस्वती ॥ ६५ ॥ गोभिर्न्नसोमम-

श्विनामासंरेणपरिस्रुतां । समधातꣳसरंस्वत्यास्वाहेन्द्रेंसुतम्मधुं
॥ ६६ ॥ अश्विनांहविरिन्द्रियन्नमुंचेर्द्धियासरंस्वती । आशुक्रमांसु-
रादृद्रसुंमघमिन्द्रांयजभ्रिरे ॥ ६७ ॥ यमश्विनासरंस्वतीहविषेन्द्रस-
वर्द्धयन् । सबिभेदब्बलम्मघवन्नमुंचावासुरेसचां ॥ ६८ ॥ तमिन्द्र-
म्पशवꣳसचाश्विनोभासरंस्वती । दधानाऽअभ्यनूषतहविषायज्ञऽ
इन्द्रियैः ॥ ६९ ॥ यऽइन्द्रंऽइन्द्रियन्दधुःसंविताव्वरुंणोभगंः । ससु-
त्रामांहविष्पंतिर्य्यजमानायसश्चत ॥ ७० ॥ सवितावरुंणोदधद्य-
जमानायदाशुषें । आदंत्तनमुंचेर्व्वसुसुत्रामाबलंमिन्द्रियम् ॥ ७१ ॥
व्वरुंणꣳक्षत्रमिन्द्रियम्भगेनसविताश्रियम् । सुत्रामायशंसाबलन्दधां

नाषद्ममाशत ॥ ७२ ॥ अश्विनागोभिरिन्द्रियमश्वेभिर्व्वीर्य्यम्बलम् ।
हविषेन्द्रꣳसरस्वतीषजमानमवर्द्धयन् ॥ ७३ ॥ तानासत्यासुपेश-
साहिरण्ण्यवर्त्तनीनरा । सरस्वतीहविष्मतीन्द्रकर्म्मसुनोवत ॥७४॥
ताभिषजासुकर्म्मणासासुदुघासरस्वती । सव्वृत्रहाशतक्रतुरिन्द्राय
दधुरिन्द्रियम् ॥ ७५ ॥ षुवꣳसुराममश्विनानमुचावासुरेसचा ।
व्विपिपानाःसरस्वतीन्द्रङ्कर्म्मस्वावत ॥ ७६ ॥ पुत्रमिवपितरावश्वि-
नोभेन्द्रावथुःकाव्यैर्द्दꣳसनाभिः । षत्सुरामंव्यपिबःशचीभिःसर-
स्वतीत्वामघवन्नभिष्णक् ॥ ७७ ॥ षस्मिन्नश्वासऽऋषभासऽउक्ष-
णोव्वशामेषाऽअवसृष्टासऽआहुताः । कीलालपेसोमपृष्ठायव्वेधसे

हृदामतिञ्जनयचारुमग्नये ॥ ७८ ॥ अहाव्यग्नेहविरास्येतेस्रुचीव-
घृतञ्चम्म्वीवसोमः । व्वाजसनिꣳरयिमस्मेसुवीरम्प्रशस्तन्धेहियश-
सम्बृहन्तम् ॥७९॥ [शतम्–१२००] अश्विनातेजसाचक्षुः प्रा-
णेनसरस्वतीव्वीर्य्यम् । व्वाचेन्द्रोबलेनेन्द्रायदधुरिन्द्रियम् ॥ ८० ॥
गोमदूषुणासत्याश्वावद्यातमश्विना । व्वर्त्तीरुद्रानृपाय्यम् ॥८१॥
नयत्परोनान्तरऽआदधर्षद्वृषण्वसू । दुःशꣳसोमर्त्योरिपुः ॥ ८२ ॥
तानऽआवोढमश्विनारयिम्पिशङ्गसन्दृशम् । धिष्ण्यावरिवोविदम्
॥ ८३ ॥ पावकानःसरस्वतीव्वाजेभिर्व्वाजिनीवती । यज्ञंव्वष्टुधिया-
वसुः ॥ ८४ ॥ चोदयित्रीसूनृतानाञ्चेतन्तीसुमतीनाम् । यज्ञन्दधे

सरस्वती ॥ ८५ ॥ महोऽअर्णꣳसरस्वतीप्रचेतयतिकेतुना । धियो-
विश्वाविराजति ॥ ८६ ॥ इन्द्रायाहिचित्रभानोसुताऽइमेत्वाय-
वः । अण्वीभिस्तनापूतासः ॥ ८७ ॥ इन्द्रायाहिधियेषितोवि-
प्रजूतꣳसुतावतः । उपब्रह्माणिवाघतः ॥ ८८ ॥ इन्द्रायाहितूतु-
जानऽउपब्रह्माणिहरिवः । सुतेदधिष्ववनश्चनः ॥ ८९ ॥ अश्विना-
नापिबताम्मधुसरस्वत्यासजोषसा । इन्द्रःसुत्रामावृत्रहाजुषताꣳ
सोम्यम्मधु ॥ ९० ॥

इति संहितायां विंशतितमोऽध्यायः ।

❀ अथ एकविंशोऽध्यायः ❀

ओ३म् इमम्मे वरुण श्रुधी हवमद्या च मृडय । त्वामवस्युराचके ॥१॥

तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोद्ध्युरुशंस मा न आयुः प्रमोषीः ॥ २ ॥ त्वन्नोऽ-

---

१. 'शुचिना' स्नानाचमनादिभिः शौचयुक्तेन ब्रह्मचर्यवता च त्रैवर्णिकेन स्वाध्यायोऽध्येतव्य इति सूत्रशेषः। 'शुचौदेशे' शूद्राद्यनुपहतदेशे स्वाध्यायोऽध्येतव्यः। 'शूद्रपतितयोरसंश्रावंस्वाध्यायोऽध्येतव्यः' शूद्रपतितादयो (पतितो ब्रह्महत्यादिपातकेन) यथा न शृण्वन्ति तथा शुद्धेन शुद्धायां भूमौ स्वाध्यायोऽध्येतव्यः। (शु० य० प्रा० १७—१९)

२. 'शुश्रुणुपृकृवृभ्यश्छन्दसि' ६।४।१०२ इत्यनेन साधुः।

अग्नेव्वरुणस्यव्विद्वान्देवस्यहेडोऽअवयासिसीष्ठाः । यजिष्ठोव-
ह्नितमःशोशुचानोविश्वाद्वेषांᳪसिप्रमुमुग्ध्यस्स्मत् ॥ ३ ॥ स-
त्वन्नोऽअग्नेवमोभवोतीनेदिष्ठोअस्याऽउषसोव्युष्टौ । अवयक्ष्वनो
व्वरुणᳪरराणोव्वीहिमृडीकᳪसुहवोनऽएधि ॥ ४ ॥ महीमूषुमातरᳪ
सुव्रतानामृतस्यपत्नीमवसेहुवेम । तुविक्षत्रामजरन्तीमुरूचीᳪसु-
शर्म्माणमदितिᳪसुप्रणीतिम् ॥ ५ ॥ सुत्रामाणम्पृथिवीन्द्यामनेहसᳪ
सुशर्म्माणमदितिᳪसुप्रणीतिम् । दैवीन्नावᳪस्वरित्रामनागसमस्र-

१. इत्यादिस्थलेषु पृथिवि, दिवि, उपरि, चर्पणि, शकुनि, यासिभ्यः, ३।८४, एतेभ्यो भाविभ्यः परः सकारः प्रकृत्या भवति संहितायाम् ।

वन्तीमारुहेमास्वस्तये ॥ ६ ॥ सुनावमारुहेयमस्रवन्तीमनागसम् ।
शतारित्राᳬंस्वस्तये ॥ ७ ॥ आनोमित्रावरुणाघृतैर्गव्यूतिमुक्षतम् ।
मद्ध्वारजाᳬंसिसुक्रतू ॥ ८ ॥ प्रबाहवासिसृतञ्जीवसेनऽआनोग-
व्यूतिमुक्षतङ्घृतेन । आमाजनेश्रवयतंयुवानाश्रुतम्मेमित्रावरु-
णाहवेमा ॥ ९ ॥ शन्नोभवन्तुव्वाजिनोहवेषुदेवतातामितद्रवः स्व-
र्काः । जम्भयन्तोहिंवृकᳬंरक्षाᳬंसिसनेम्यस्मद्युयवन्नमीवाः
॥ १० ॥ व्वाजेवाजेवतव्वाजिनोनोधनेषुविप्राऽअमृताऽऋतज्ञाः ।
अस्यमद्ध्वः पिबतमादयद्ध्वन्तृप्तायातपथिभिर्देवयानैः ॥ ११ ॥
समिद्धोऽअग्निःसमिधासुसमिद्धोवरेण्यः । गायत्रीच्छन्दऽइन्द्रिय-

न्त्र्यविर्गौर्व्वयोदधुः ॥१२॥ तनूनपाच्छुचिव्व्रतस्तनूपाश्च सरस्वती ।
उष्णिहाच्छन्दऽइन्द्रियन्दित्यवाड्गौर्व्वयोदधुः ॥ १३ ॥ इडाभिर-
ग्निरीड्यः सोमोदेवोऽअमर्त्यः । अनुष्टुप्छन्दऽइन्द्रियम्पञ्चाविर्गौ-
र्व्वयोदधुः ॥ १४ ॥ सुबर्हिरग्निः पूषण्वान्स्तीर्णबर्हिरमर्त्यः । बृह-
तीच्छन्दऽइन्द्रियन्त्रिवत्सोगौर्व्वयोदधुः ॥ १५ ॥ दुरोदेवीर्दिशोम-
हीर्ब्रह्मादेवोबृहस्पतिः । पङ्क्तिश्छन्दऽइहेन्द्रियन्तुर्य्यवाड्गौ-
र्व्वयोदधुः ॥ १६ ॥ उषेयह्वीसुपेशसाविश्वेदेवाऽअमर्त्याः । त्रि-
ष्टुप्छन्दऽइहेन्द्रियम्पष्ठवाड्गौर्व्वयोदधुः ॥ १७ ॥ दैव्याहोतारा-
भिषजेन्द्रेणसयुजासुजा । जगतीच्छन्दऽइन्द्रियमनड्वान्गौर्व्वयोदधुः

॥ १८ ॥ तिस्रऽइडासरस्वतीभारतीमरुतोविशः । विराट्छन्दऽइ-
हेन्द्रियन्धेनुर्ग्गौर्न्नवयोदधुः ॥ १९ ॥ त्वष्टातुरीपोऽअद्भुतऽइन्द्रा-
ग्नीपुष्टिवर्द्धना । द्विपदाच्छन्दऽइन्द्रियमुक्षागौर्न्नवयोदधुः ॥ २० ॥
शमितानोव्वनस्पतिः सविताप्प्रसुवन्भगम् । ककुप्छन्दऽइहेन्द्रि-
यंव्वशाव्वेहद्वयोदधुः ॥ २१ ॥ स्वाहायज्ञंव्वरुणः सुक्षत्रोभेषजङ्करत् ।
अतिच्छन्दाऽइन्द्रियंबृहदृषभोगौर्व्वयोदधुः ॥ २२ ॥ व्वसन्तेनऽऋ-
तुनादेवाव्वसवस्त्रिवृतास्तुताः । रथन्तरेणतेजसाहविरिन्द्रेव्वयो-
दधुः ॥ २३ ॥ ग्रीष्मेणऽऋतुनादेवारुद्राः पञ्चदशेस्तुताः । बृहताय
शसाबलꣳहविरिन्द्रेव्वयोदधुः ॥ २४ ॥ व्वर्षाभिर्ऋतुनादित्यास्तोमे

सप्तदशेस्तुताः । वैरूपेण विशौजसा हविरिन्द्रे वयो दधुः ॥ २५ ॥
शारदेनऽऋतुना देवाऽएकविंशऽऋभवस्तुताः । वैराजेन श्रिया-
श्रियं हविरिन्द्रे वयो दधुः ॥ २६ ॥ हेमन्तेनऽऋतुना देवास्त्रिणवेम-
रुतस्तुताः । बलेन शक्करीः सहो हविरिन्द्रे वयो दधुः ॥ २७ ॥ शैशि-
रेणऽऋतुना देवास्त्रयस्त्रिंशेऽमृतास्तुताः । सत्येन रेवतीः क्षत्रं हवि-
रिन्द्रे वयो दधुः ॥ २८ ॥ होता यक्षत्समिधाग्निमिडस्पदेऽश्विनेन्द्रं
सरस्वतीमजो धूम्रो न गोधूमैः कुवलैर्भेषजम्मधु शष्पैर्न तेजऽइन्द्रिय-
म्पयः सोमः परिस्रुता घृतम्मधु व्यन्त्वाज्यस्य होतर्यज ॥ २९ ॥ हो-
ता यक्षत्तनूनपात्सरस्वतीमविर्मेषो न भेषजम्पथा मधुमता भरन्नश्विने-

न्द्रायव्वीर्य्यंस्वदरैरुपवाकाभिर्भेषजन्तोक्कमभिः पयः सोमः परिस्रु-
ताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३० ॥ होतायक्षन्नराशᳬस-
न्ननग्नहुस्पतिᳬसुरयाभेषजम्मेषः सरस्वतीभिषग्ग्रथोनचन्द्र्यश्विनो-
र्व्वपाऽइन्द्रस्यव्वीर्य्यंस्वदरैरुपवाकाभिर्भेषजन्तोक्कमभिः पयः सो-
मः परिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३१ ॥ होतायक्षदि-
डेडितऽआजुह्वानः सरस्वतीमिन्द्रम्बलेनव्वर्द्धयन्नृषभेणगवेन्द्रिय-
मश्विनेन्द्रायभेषजंय्यवैः कर्कन्धुभिर्म्मधुलाजैर्न्नमासरम्पयः सोमः
परिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३२ ॥ होतायक्षद्बर्हि-
रूर्णम्म्रदाभिषङ्नासत्याभिषजाश्विनाश्वाशिशुमतीभिषग्धेनुः स-

रस्वतीभिषग्गदुहऽइन्द्रायभेषजम्पयःसोमः परिस्रुताघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३३ ॥ होतायक्षद्दुरोदिशः कवष्योनव्यचस्वतीरश्विभ्यान्नदुरोदिशऽइन्द्रोनरोदसीदुघेदुहेधेनुःसरस्वत्यश्विनेन्द्रायभेषजꣳशुक्रन्नज्ज्योतिरिन्द्रियम्पयःसोमः परिस्रुताघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३४ ॥ होतायक्षत्सुपेशसोषेनक्तन्दिवाश्विनासमञ्जातेसरस्वत्यात्विषिमिन्द्रेनभेषजꣳश्येनोनरजसाहृदाश्रियानमासरम्पयःसोमः परिस्रुताघृतम्मधुव्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३५ ॥ होतायक्षद्दैव्याहोताराभिषजाश्विनेन्द्रन्नजागृविदिवानक्तन्नभेषजैःशूषꣳसरस्वतीभिषक्क्सीसेनदुहऽइन्द्रियम्पयःसोमः प-

रिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३६ ॥ होतायक्षत्तिस्रो-
देवीर्न्नभेषजन्त्रयस्त्रिधातवोपसोरूपमिन्द्रेहिरण्ययमश्श्विनेडानभा-
रतीव्वाचासरस्वतीमहऽइन्द्रायदुहऽइन्द्रियम्पयःसोमः परिस्रुताघृत-
म्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३७ ॥ होतायक्षत्सुरेतसमृषभन्न
र्य्यापसन्त्वष्टारमिन्द्रमश्श्विनाभिषजन्नसरस्वतीमोजोनजूतिरिन्द्रि-
यंव्वृकोनरभसोभिषग्ग्यशःसुरयाभेषजंश्रियानमासरम्पयःसोमः
परिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३८ ॥ होतायक्षद्वन-
स्पतिंशमितारंशतक्क्रतुम्भीमन्नमन्न्युःराजानंव्व्याघ्रन्नमसा-
श्श्विनाभामःसरस्वतीभिषगिन्द्रायदुहऽइन्द्रियम्पयःसोमः परिस्रु-

ताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यजं ॥ ३९ ॥ होतायक्षदग्निᳬस्वाहाज्ज्यस्यस्तोकानाᳬस्वाहामेदसाम्पृथक्स्वाहाच्छागमश्श्विभ्याᳬस्वाहामेषᳬसरस्वत्यैस्वाहऽऋषभमिन्द्रायसिᳬहायसहसऽइन्द्रियᳬस्वाहाग्निन्नभेषजᳬस्वाहासोममिन्द्रियᳬस्वाहेन्द्रᳬसुत्रामाणᳬसवितारंव्वरुणम्भिषजाम्पतिᳬस्वाहाव्वनस्प्पतिम्प्रियम्पाथोनभेषजᳬस्वाहादेवाऽआज्ज्यपाजुषाणोऽअग्निर्भेषजम्पयःसोमः परिस्रुताघृतम्मधुव्व्यन्त्वाज्ज्यस्यहोतर्य्यजं ॥ ४० ॥ होतायक्षदश्श्विनौछागस्यव्वपायामेदसोजुषेताᳬहविर्होतर्य्यजं । होतायक्षत्सरस्वतीम्मेषस्यव्वपायामेदसोजुषताᳬहविर्होतर्य्यजं । होतायक्षदिन्द्रमृषभस्यंव्व-

पायामेदंसोजुषताᳬं हविर्होतर्य्यज ॥ ४१ ॥ होतायक्षदश्विनौसरस्वतीमिन्द्रᳬं सुत्रामाणमिमेसोमाःसुरामाणश्छागैर्न्नमेषैर्ऋषभैःसुताः शष्पैर्न्नतोक्मभिर्ल्लाजैर्म्महस्वन्तोमदामासरेणपरिष्कृताःशुक्राः पयस्वन्तोमृताःप्रस्थितावोमधुश्च्युतस्तानश्विनासरस्वतीन्द्रःसुत्रामाव्वृत्रहाजुषन्ताᳬं सोम्म्यम्मधुपिबन्तुमदन्तुव्व्यन्तुहोतर्य्यज ॥ ४२ ॥ होतायक्षदश्विनौछागस्यहविषऽआत्तामद्द्यमद्ध्यतोमेदऽउद्भृतम्पुराद्द्वेषोभ्यःपुरापौरुषेय्याग्गृभोघस्तान्नूनङ्घासेऽअज्ज्राणांयवसप्प्रथमानाᳬं सुमत्क्षराणाᳬं शतरुद्रियाणामग्निष्वात्तानाम्पीवोपवसनानाम्पार्श्वतःश्रोणितःशितामतऽउत्सादतोङ्गादङ्गादव-

त्तानाङ्करंतऽएवाश्विनांजुषेतांछंहविर्होतर्य्यज ॥ ४३ ॥ होतायक्ष-
त्सरस्वतीम्मेषस्यहविषऽआवयदद्द्यमद्ध्यतोमेदऽउद्भृतम्पुराद्द्वे
षोब्भ्यः पुरापौरुषेय्याग्गृभोघसन्नूनङ्घासेऽअंज्ज्राणांय्यवसप्प्रथमा-
नाछंसुमत्क्षराणाछंशतरुद्रियाणामग्निष्ष्वात्तानाम्पीवोपवसनाना-
म्पार्श्वतः श्रोणितः शितामतऽउत्सादतोङ्गादङ्गादवत्तानाङ्करदेवं सर-
स्वतीजुषताछंहविर्होतर्य्यज ॥ ४४ ॥ होतायक्षदिन्द्रमृषभस्यहविषऽ-
आवयदद्द्यमद्ध्यतोमेदऽउद्भृतम्पुराद्द्वेषोब्भ्यः पुरापौरुषेय्याग्गृभो
घसन्नूनङ्घासेऽअंज्ज्राणांय्यवसप्प्रथमानाछंसुमत्क्षराणाछंशतरुद्रि-
याणामग्निष्ष्वात्तानाम्पीवोपवसनानाम्पार्श्वतः श्रोणितः शितामतऽ-

उत्सादतोङ्गादङ्गादवत्तानाङ्करद्देवमिन्द्रोजुषताꣳहविर्होतर्य्यज ॥ ४५ ॥
होतायक्षद्वनस्प्पतिमभिहिपिष्टतमयारभिष्ठयारशनयाधित । यत्रा-
श्विनोश्छागस्यहविषः प्प्रियाधामानियत्रसरस्वत्यामेषस्यहविषः
प्प्रियाधामानियत्रेन्द्रस्यऽऋषभस्यहविषः प्प्रियाधामानियत्रा-
ग्नेः प्प्रियाधामानियत्रसोमस्यप्प्रियाधामानियत्रेन्द्रस्यसुत्राम्णः
प्प्रियाधामानियत्रसवितुः प्प्रियाधामानियत्रव्वरुणस्यप्प्रियाधामा-
नियत्रव्वनस्प्पतेः प्प्रियापाथाꣳसियत्रदेवानामाज्ज्यपानाम्प्रियाधा-
मानियत्राग्नेर्होतुः प्प्रियाधामानितत्रैतान्प्रस्तुत्येवोपस्तुत्येवोपाव-
स्रक्षद्रभीयसऽइवकृत्वीकरद्देवन्देवोव्वनस्पतिर्जुषताꣳ हविर्होत-

र्य्यज ॥ ४६ ॥ होतायक्षदग्निᳬ स्विष्टकृतमयाडग्निरश्विनो
श्छागस्यहविषः प्प्रियाधामान्न्ययाट्सरस्वत्यामेषस्यहविषः
प्प्रियाधामान्न्ययाडिन्द्रस्यऽऋषभस्यहविषः प्प्रियाधामान्न्यया-
डग्नेः प्प्रियाधामान्न्ययाट्सोमस्यप्प्रियाधामान्न्ययाडिन्द्रस्यसुत्रा-
म्म्णः प्प्रियाधामान्न्ययाट्सवितुः प्प्रियाधामान्न्ययाड्वरुणस्य
प्प्रियाधामान्न्ययाड्वनस्पतेः प्प्रियापाथाᳬस्ययाड्देवानामाज्यपा-
नाम्प्प्रियाधामानियक्षदग्नेर्होतुः प्प्रियाधामानियक्षत्स्वम्महिमानमाय-
जतामेज्ज्याऽइषः कृणोतुसोऽअध्वराजातवेदाजुषताᳬहविर्होतर्य्यज
॥ ४७ ॥ देवम्बर्हिः सरस्वतीसुदेवमिन्द्रेऽअश्विना । तेजोनचक्षुर-

क्ष्योर्ब्बर्हिषांदधुरिन्द्रियंव्वसुवनेंव्वसुधेयस्यव्वयन्तुयज ॥ ४८ ॥ देवी-
र्द्वारोऽअश्विनाभिषजेन्द्रे सरस्वती । प्राणन्नव्वायुर्म्मसिद्द्वारोद-
धुरिन्द्रियंव्वसुवनेंव्वसुधेयस्यव्वयन्तुयज ॥ ४९ ॥ देवीऽउषासाव-
श्विनासुत्रामेन्द्रे सरस्वती । बलन्नवाचमास्यऽउषाभ्यान्दधुरि-
न्द्रियंव्वसुवनेंव्वसुधेयस्यव्वयन्तुयज ॥ ५० ॥ देवीजोष्ट्रीसरस्वत्य-
श्विनेन्द्रमवर्द्धयन् । श्रोत्रन्नकर्णयोर्य्यशोजोष्ट्रीभ्यान्दधुरिन्द्रि-
यंव्वसुवनेंव्वसुधेयस्यव्वयन्तुयज ॥ ५१ ॥ देवीऽऊर्ज्जाहुतीदुघेसुदु-
घेन्द्रेसरस्वत्यश्विनाभिषजावतः । शुक्रन्नज्ज्योतिस्तनयोराहुतीध-
त्तऽइन्द्रियंव्वसुवनेंव्वसुधेयस्यव्वयन्तुयज ॥ ५२ ॥ देवादेवानाम्भि-

षजाहोतारावि॒न्द्रम॒श्विना॑ । व्वषट्कारैःसर॑स्वती॒त्त्विषि॒र्न्नहृद॑येसति-
ऽहोतृ॑भ्यान्दधुरि॒न्द्रि॒यंव्व॑सुवनै॑व्वसु॒धेय॑स्यव्व्यन्तु॒यज॑ ॥ ५३ ॥ दे॒-
वीस्ति॒स्रस्ति॒स्रोदे॒वीर॒श्विनेडा॒सर॑स्वती । शूष॒न्नमद्ध्ये॒नाभ्या॒मिन्द्रा॑-
यदधुरि॒न्द्रि॒यंव्व॑सुवनै॑व्वसु॒धेय॑स्यव्व्यन्तु॒यज॑ ॥ ५४ ॥ दे॒वऽइन्द्रो॒नरा॒श-
ऽसस्त्रि॒वरू॒थःसर॑स्वत्या॒श्विभ्या॑मीयते॒रथः॑ । रेतो॒नरू॒पम॒मृतं॒ज॒-
नित्र॒मिन्द्रा॑यत्वष्टा॒दध॑दिन्द्रि॒याणि॒व्वसु॒वनै॑व्वसु॒धेय॑स्यव्व्यन्तु॒यज॑
॥ ५५ ॥ दे॒वोदे॒वैर्व्वन॒स्पति॒र्हिर॑ण्यपर्णो॑ऽअ॒श्विभ्या॒ᳪसर॑स्वत्यासु-
पिप्प॒लऽइन्द्रा॑यपच्यते॒मधु॑ । ओजो॒नजू॒तिर्ऋ॑ष॒भोनभा॒मंव्वन॒स्पति॑-
र्नो॑दध॑दिन्द्रि॒याणि॒व्वसु॒वनै॑व्वसु॒धेय॑स्यव्व्यन्तु॒यज॑ ॥ ५६ ॥ दे॒वम्ब॒र्हिर्व्वा॑-

रितीनामद्ध्वरेस्तीर्ण्णमश्विभ्यामूर्ण्णम्म्रदाः सरस्वत्यास्योनमिन्द्र-
तेसदः । ईशायैमन्न्युᳲराजानम्बर्हिषादधुरिन्द्रियंव्वसुवनेव्वसु-
धेयस्यव्यन्तुयज ॥ ५७ ॥ देवोऽअग्निःस्विष्टकृद्देवान्यक्षद्यथायथᳲ
होताराविन्द्रमश्विनाव्वाचाव्वाचᳲसरस्वतीमग्निᳲसोमꣳ स्विष्ट-
कृत्स्विष्टऽइन्द्रः सुत्रामासवितावरुणोभिषगिष्टोदेवोव्वनस्पतिः
स्विष्टादेवाऽआज्ज्यपाःस्विष्टोऽअग्निरग्निनाहोताहोत्रेस्विष्टकृद्यशो-
नदधदिन्द्रियमूर्ज्जमपचितिꣳस्वधांव्वसुवनेवसुधेयस्यव्यन्तुयज ।५८।
अग्निमद्यहोतारमवृणीतायंयजमानःपचन्पक्तीःपचन्पुरोडाशा-

१. इत्यत्र 'न होतरि' ३।११६ इत्यनेन होतृशब्दे प्रत्यये अद्येत्ययं ह्रस्वो न दीर्घमापद्यते।

न्न्वधःनन्नश्विभ्याञ्छागꣳसरस्वत्यैमेषमिन्द्रायऽऋषभꣳसुन्वन्न-
श्विभ्याꣳसरस्वत्याऽइन्द्रायसुत्राम्णेसुरासोमान् ॥ ५९ ॥ सू-
पस्थाऽअद्यदेवोव्वनस्पतिरभवदश्विभ्याञ्छागेनसरस्वत्यैमेषेणे-
न्द्रायऽऋषभेणाक्षँस्तान्मेदस्तःप्रतिपचताग्गृभीषतावीवृधन्तपुरोडा-
शैरपुरश्विनासरस्वतीन्द्रः ÷ सुत्रामासुरासोमान् ॥ ६० ॥ त्वा-
मद्यऽऋषऽआर्षेयऽऋषीणान्नपादवृणीतायंय्यजमानोबहुभ्यऽआस
ङ्गतेभ्यऽएषमेदेवेषुव्वसुव्वार्य्यायक्ष्यतऽइतितायादेवादेवदानान्यदु-
स्तान्यस्माऽआचशास्वाचगुरस्वेषितश्चहोतरसिभद्रवाच्याय

ष्प्रेषितोमानुषःसूक्तवाकायसूक्ताब्रूहि ॥ ६१ ॥ इति संहितायां
एकविंशोऽध्यायः ।

❀ अथ द्वाविंशोऽध्यायः ❀

ॐ तेजोसिशुक्रममृतमायुष्पाऽआयुर्म्मेपाहि । देवस्यत्वासवि-
तुःप्प्रसवेऽश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्यामाददे ॥ १ ॥ इमाम-
गृब्भ्णन्नशनामृतस्यपूर्व्वऽआयुषिविदथेषुकव्या । सानोऽअस्स्मि-
न्त्सुतऽआबभूवऽऋतस्यसामन्त्सरमारपन्ती ॥ २ ॥ अभिधाऽअसिभु-
वनमसियन्तासिधर्त्ता । सत्वमग्निंवैश्वानरꣳसप्प्रथसङ्गच्छस्वाहा

कृतं ॥ ३ ॥ स्वगात्वादेवेभ्यः प्रजापतयेब्रह्मन्नश्वम्भन्त्स्यामि
देवेभ्यः प्रजापतयेतेनराद्ध्यासम् । तम्बधानदेवेभ्यः प्रजापत-
येतेनराध्नुहि ॥ ४ ॥ प्रजापतयेत्वाजुष्टम्प्रोक्षामीन्द्राग्निभ्यान्त्वाजु-
ष्टम्प्रोक्षामिव्वायवेत्वाजुष्टम्प्रोक्षामिव्विश्वेभ्यस्त्वादेवेभ्योजुष्टम्प्रो-
क्षामिसर्वेभ्यस्त्वादेवेभ्योजुष्टम्प्रोक्षामि । योऽअर्वन्तञ्जिघांꣳस
तितमभ्यमीतिव्वरुणःपरोमर्त्तःपरःश्वा ॥ ५ ॥ अग्नयेस्वाहासोमाय
स्वाहापाम्मोदायस्वाहासवित्रेस्वाहाव्वायवेस्वाहाव्विष्णवेस्वाहेन्द्रा-
यस्वाहाबृहस्पतयेस्वाहामित्रायस्वाहाव्वरुणायस्वाहा ॥ ६ ॥ हिङ्करा-
यस्वाहाहिङ्कृतायस्वाहाक्क्रन्दतेस्वाहावक्क्रन्दायस्वाहाप्प्रोथतेस्वाहा

ऽअप्प्रोथायस्वाहागन्धायस्वाहाघ्रातायस्वाहानिविष्टायस्वाहोपवि-
ष्टायस्वाहासन्दितायस्वाहाव्वल्गतेस्वाहासीनायस्वाहाशयानायस्वा-
हास्वपतेस्वाहाजाग्ग्रतेस्वाहाकूजतेस्वाहाप्प्रबुद्धायस्वाहाव्विजृम्भ-
माणायस्वाहाव्विचृतायस्वाहासꣳहानायस्वाहोपस्थितायस्वाहाय-
नायस्वाहाप्प्रायणायस्वाहा ॥ ७ ॥ यतेस्वाहाधावतेस्वाहोद्द्रावाय
स्वाहोद्द्रुतायस्वाहाशूकारायस्वाहाशूकृतायस्वाहानिषण्णायस्वा-
होत्थितायस्वाहाजवायस्वाहाबलायस्वाहाव्विवर्त्तमानायस्वाहाव्वि-
वृत्तायस्वाहाव्विधून्न्वानायस्वाहाव्विधूतायस्वाहाशुश्रूषमाणाय
स्वाहाशृण्वतेस्वाहेक्षमाणायस्वाहेक्षितायस्वाहाव्वीक्षितायस्वाहा

निमेषायस्वाहाषदत्तितस्मैस्वाहाषत्पिबतितस्मैस्वाहाषन्मूत्रङ्करो-
तितस्मैस्वाहाकुर्वतेस्वाहाकृतायस्वाहा ॥ ८ ॥ तत्सवितुर्वरेण्यम्भ-
र्गो देवस्यधीमहि । धियोयोनः प्रचोदयात् ॥ ९ ॥ हिरण्यपाणिमूत-
येसवितारमुपह्वये । सचेत्तादेवतापदम् ॥१०॥ देवस्यचेततोमहीम्प्र-
सवितुर्हवामहे । सुमतिꣳसत्यराधसम् ॥११॥ सुष्टुतिꣳसुमतीवृधो
रातिꣳसवितुरीमहे । प्रदेवायमतीविदे ॥ १२ ॥ रातिꣳसत्पतिम्महेस
वितारमुपह्वये । आसवन्देववीतये ॥१३॥ देवस्यसवितुर्म्मतिमासवं
विश्वदेव्यम् । धियाभगम्मनामहे ॥१४॥ अग्निꣳस्तोमेनबोधयसमि-
धानोऽअमर्त्यम् । हव्यादेवेषुनोदधत् ॥१५॥ सहव्यवाडमर्त्यऽउशि-

ग्गदूतश्चनोहितः। अग्निर्द्धियासमृण्वति ॥ १६ ॥ अग्निन्दूतम्पुरोदधे हव्यवाहमुपब्रुवे। देवाँ २ आसादयादिह ॥ १७ ॥ अजीजनोहिपवमानसूर्य्यंविधारेशक्मनापयः। गोजीरयारꣳहमाणःपुरन्ध्या ॥ १८ ॥ विभूम्मात्राप्रभूःपित्राश्वोसिहयोस्यत्योसिमयोस्यर्व्वासि सप्तिरसिव्वाज्यसिव्वृषासिनृमणाऽअसि। ययुर्न्नामासिशिशुर्न्नामास्यादित्यानाम्पत्वान्विहिदेवाऽआशापालाऽएतन्देवेभ्योश्वम्मेधायप्प्रोक्षितꣳरक्षतेहरन्तिरिहरमतामिहधृतिरिहस्वधृतिःस्वाहा॥१९॥ कायस्वाहाकस्मैस्वाहाकतमस्मैस्वाहास्वाहाधिमाधीतायस्वाहामनः प्रजापतयेस्वाहाचित्तंविज्ञातायादित्यैस्वाहादित्यैमह्यैस्वाहादित्यै

सुमृडीकायैस्वाहासरस्वत्यैस्वाहासरस्वत्यैपावकायैस्वाहासरस्वत्यै
बृहत्यैस्वाहापूष्णेस्वाहापूष्णेप्रपथ्यायस्वाहापूष्णेनरन्धिषायस्वा-
हात्वष्ट्रेस्वाहात्वष्ट्रेतुरीपायस्वाहात्वष्ट्रेपुरुरूपायस्वाहाविष्णवेस्वा
हाविष्णवेनिभूयपायस्वाहाविष्णवेशिपिविष्टायस्वाहा ॥ २० ॥ विव-
श्वोदेवस्यनेतुर्मर्त्तोव्वुरीतसख्यम् । विश्वोरायऽइषुध्यतिद्युम्नं
व्वृणीतपुष्यसेस्वाहा ॥२१॥ आब्रह्मन्ब्राह्मणोब्रह्मवर्चसीजा-
यतामाराष्ट्रेराजन्यःशूरऽइषव्योतिव्याधीमहारथोजायतान्दोग्ध्री
धेनुर्व्वोढानड्वानाशुःसप्तिःपुरन्धिर्योषाजिष्णूरथेष्ठाःसभेयोयुवा-
स्ययजमानस्यवीरोजायतान्निकामेनिकामेनःपर्जन्योवर्षतुफलव-

त्योन॒ऽओष॑धयः॒पच्यन्ताँ॒योगक्षे॒मो॑नः॑कल्पताम् ॥ २२ ॥ प्रा॒णा-
य॒स्वाहा॑ऽपा॒नाय॒स्वाहा॑व्या॒नाय॒स्वाहा॒चक्षु॑षे॒स्वाहा॒श्रोत्रा॑य॒स्वाहा॑
वा॒चेस्वाहा॒मन॑से॒स्वाहा॑ ॥ २३ ॥ प्राच्यै॑दि॒शेस्वाहा॒र्वाच्यै॑दि॒शेस्वा-
हा॒दक्षि॑णायैदि॒शेस्वाहा॒र्वाच्यै॑दि॒शेस्वाहा॑प्रती॒च्यै॑दि॒शेस्वाहा॒र्वा-
च्यै॑दि॒शेस्वाहोदी॑च्यैदि॒शेस्वाहा॒र्वाच्यै॑दि॒शेस्वाहो॒र्ध्वायै॑दि॒शेस्वा-
हा॒र्वाच्यै॑दि॒शेस्वाहावा॑च्यैदि॒शेस्वाहा॒र्वाच्यै॑दि॒शेस्वाहा॑ ॥ २४ ॥
अ॒द्भ्यःस्वाहा॑वा॒र्भ्यःस्वाहो॑द॒काय॒स्वाहा॒तिष्ठ॑न्तीभ्य॒ःस्वाहा॒स्रव॑-
न्तीभ्य॒ःस्वाहा॒स्यन्द॑मानाभ्य॒ःस्वाहा॒कूप्या॑भ्य॒ःस्वाहा॒सूद्या॑भ्य॒ः
स्वाहा॒धार्या॑भ्य॒ःस्वाहा॑र्ण॒वाय॒स्वाहा॑समु॒द्राय॒स्वाहा॑सरि॒राय-

स्वाहा ॥ २५ ॥ व्वातायस्वाहाधूमायस्वाहाब्भ्रायस्वाहामेघायस्वाहाव्विद्योतमानायस्वाहास्तनयतेस्वाहावस्फूर्ज्जतेस्वाहाव्वर्षतेस्वाहावव्वर्षतेस्वाहोग्ग्रंव्वर्षतेस्वाहाशीघ्रंव्वर्षतेस्वाहोद्गृह्णतेस्वाहोद्गृहीतायस्वाहाप्प्रुष्णतेस्वाहाशीकायतेस्वाहाप्प्रुष्वाभ्भ्यःस्वाहाह्रादुनीभ्भ्यःस्वाहानीहारायस्वाहा ॥ २६ ॥ अग्नयेस्वाहासोमायस्वाहेन्द्रायस्वाहापृथिव्यैस्वाहान्तरिक्षायस्वाहादिवेस्वाहादिग्भ्भ्यःस्वाहाशाभ्भ्यःस्वाहोर्व्व्यै दिशेस्वाहार्व्वाच्च्यैदिशेस्वाहा ॥ २७ ॥ नक्षत्रेभ्भ्यःस्वाहानक्षत्रि येभ्भ्यःस्वाहाहोरात्रेभ्भ्यःस्वाहार्द्धमासेभ्भ्यःस्वाहामा-

---

१. नक्षत्राद्धः (४ । ४ । १४१) इत्यनेन साधुः ।

सेभ्यःस्वाहाऽऋतुभ्यःस्वाहार्तवेभ्यःस्वाहासंव्वत्सरायस्वाहाद्या-
वापृथिवीभ्याꣳ स्वाहाचन्द्रायस्वाहासूर्य्यायस्वाहारश्मिभ्यः
स्वाहाव्वसुभ्यःस्वाहारुद्रेभ्यःस्वाहादित्येभ्यःस्वाहामरुद्भ्यः
स्वाहाविश्वेभ्योदेवेभ्यःस्वाहामूलेभ्यःस्वाहाशाखाभ्यःस्वाहा
व्वनस्पतिभ्यःस्वाहापुष्पेभ्यःस्वाहाफलेभ्यःस्वाहौषधीभ्यः
स्वाहा ॥२८॥ [शतम् १३००] पृथिव्यैस्वाहान्तरिक्षायस्वाहादिवे-
स्वाहासूर्य्यायस्वाहाचन्द्रायस्वाहानक्षत्रेभ्यःस्वाहाद्भ्यःस्वाहौषधी-
भ्यःस्वाहाव्वनस्पतिभ्यःस्वाहापरिप्लवेभ्यःस्वाहाचराचरेभ्यः
स्वाहासरीसृपेभ्यःस्वाहा ॥२९॥ असवेस्वाहाव्वसवेस्वाहाव्विभुवे-

स्वाहाव्विवस्वतेस्वाहागणश्रियेस्वाहागणपतयेस्वाहाभिभुवेस्वाहा-
धिपतयेस्वाहाशूषायस्वाहासꣳसर्प्पायस्वाहाचन्द्रायस्वाहाज्ज्योति-
षेस्वाहामलिम्म्लुचायस्वाहादिवापतयतेस्वाहा ॥ ३० ॥ मधवेस्वाहा-
माधवायस्वाहाशुक्क्रायस्वाहाशुचयेस्वाहानभसेस्वाहानभस्यायस्वा-
हेषायस्वाहोर्ज्जायस्वाहासहसेस्वाहासहस्यायस्वाहातपसेस्वाहात-
पस्यायस्वाहाꣳहसस्पतयेस्वाहा ॥ ३१ ॥ व्वाजायस्वाहाप्प्रसवाय-
स्वाहापिजायस्वाहाक्क्रतवेस्वाहास्वः स्वाहामूर्द्ध्नेस्वाहाव्व्यश्नु-
विनेस्वाहान्त्यायस्वाहान्त्यायभौवनायस्वाहाभुवनस्यपतयेस्वाहाधि-
पतयेस्वाहाप्प्रजापतयेस्वाहा ॥ ३२ ॥ आयुर्य्यज्ञेनकल्पताꣳस्वाहा-

प्प्राणोयज्ञेनंकल्पता ᳪ स्वाहापानोयज्ञेनंकल्पता ᳪ स्वाहाव्यानोय-
ज्ञेनंकल्पता ᳪ स्वाहोदानोयज्ञेनंकल्पता ᳪ स्वाहासमानोयज्ञेनंकल्प-
ता ᳪ स्वाहाचक्षुर्यज्ञेनंकल्पता ᳪ स्वाहाश्श्रोत्रंय्यज्ञेनंकल्पता ᳪ स्वा-
हाव्वाग्ग्यज्ञेनंकल्पता ᳪ स्वाहामनोयज्ञेनंकल्पता ᳪ स्वाहात्मायज्ञेनं-
कल्पता ᳪ स्वाहाब्ब्रह्मायज्ञेनंकल्पता ᳪ स्वाहाज्ज्योतिर्यज्ञेनंकल्प-
ता ᳪ स्वाहास्वर्यज्ञेनंकल्पता ᳪ स्वाहापृष्ठंय्यज्ञेनंकल्पता ᳪ स्वाहा-
यज्ञोयज्ञेनंकल्पता ᳪ स्वाहा ॥ ३३ ॥ एकस्म्मैस्वाहाद्वाब्भ्या ᳪ स्वाहा-
शतायस्वाहैकंशतायस्वाहाव्व्युष्ट्यै स्वाहास्वर्ग्गायस्वाहा ॥ ३४ ॥

इति संहितायां द्वाविंशोऽध्यायः ॥

❀ अथ त्रयोविंशोऽध्यायः ❀

ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् । सदाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा विधेम ॥ १ ॥ उपयामगृहीतोसि प्रजापतये त्वा जुष्टङ्गृह्णाम्येष ते योनिः सूर्य्यस्ते महिमा । यस्तेहन्त्संवत्सरे महिमा सम्बभूव यस्ते वायावन्तरिक्षे महिमा सम्बभूव यस्ते दिवि सूर्य्ये महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये स्वाहा देवेभ्यः ॥ २ ॥ यः प्राणतो निमिषतो महित्वैकऽइद्राजा जगतो बभूव । यऽईशेऽअस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम

॥ ३ ॥ उपयामगृहीतोसिप्रजापतयेत्वाजुष्टङ्गृह्णाम्येषतेयोनिश्चन्द्र-
मास्तेमहिमा । यस्तेरात्रौसंवत्सरेमहिमासम्बभूवयस्तेपृथिव्याम-
ग्नौमहिमासम्बभूवयस्तेनक्षत्रेषुचन्द्रमसिमहिमासम्बभूवतस्मैतेम-
हिम्नेप्रजापतयेदेवेभ्यःस्वाहा ॥ ४ ॥ युञ्जन्तिब्रध्नमरुषञ्चरन्त-
म्परितस्थुषः । रोचन्तेरोचनादिवि ॥ ५ ॥ युञ्जन्त्यस्यकाम्या-
हरीविपक्षसारथे । शोणाधृष्णूनृवाहसा ॥ ६ ॥ यद्वातोऽअपोऽअ-
गनीगन्प्रियामिन्द्रस्यतन्वम् । एतꣳस्तोतरनेनपथापुनरश्वमावर्त्त-
यासिनः ॥ ७ ॥ वसवस्त्वाञ्जन्तुगायत्रेणच्छन्दसारुद्रास्त्वाञ्जन्तु
त्रैष्टुभेनच्छन्दसादित्यास्त्वाञ्जन्तुजागतेनच्छन्दसा । भूर्भुवःस्वर्ला-

जीं३ऽच्छाचीं३ऽन्न्यक्व्येगव्व्यंऽएतदन्नंमत्तदेवाऽएतदन्नंमद्धिप्प्रजापते
॥ ८ ॥ कःस्स्विदेकाकीचरतिकऽउंस्स्विज्जायतेपुनः । किंᳪस्विद्धि-
मस्यंभेषजङ्किम्म्वावपंनम्महत् ॥ ९ ॥ सूर्य्यंऽएकाकीचरतिचन्द्रमा-
जायतेपुनः । अग्निर्हिमस्यंभेषजम्भूमिरावपंनम्महत् ॥ १० ॥
कास्विदासीत्पूर्व्वचित्तिःकिंᳪस्विदासीद्बृहद्वयः । कास्विदा-
सीत्पिलिप्पिलाकास्विदासीत्पिशङ्गिला ॥ ११ ॥ द्यौरासीत्पूर्व्व-
चित्तिरश्श्वंऽआसीद्बृहद्वयः । अविरासीत्पिलिप्पिलारात्रिरा-
सीत्पिशङ्गिला ॥ १२ ॥ व्वायुष्ष्टांपचतैरंवत्वसितग्ग्रीवश्श्छागैर्न्न्य-
ग्ग्रोधश्चमसैश्शल्मलिर्व्वृद्ध्या । एषस्यराथ्योव्वृषापड्भिश्चतु-

भिरेदंगन्न्वह्म्माक्कंष्णश्चनोवतुनमोग्गयें ॥ १३ ॥ सह्शितोरश्मि-
नारथहंसह्शितोरश्मिनाहयं ÷ । सहशितोऽअप्स्वप्सुजाव्रह्मा-
सोमपुरोगवः ॥ १४ ॥ स्वयंव्वाजिँस्तन्न्वङ्कल्पयस्वस्वयंय्यजस्व-
स्वयञ्जुषस्व । महिमातेन्येननसन्नशे ॥ १५ ॥ नवाऽउऽएतन्म्रिय-
सेनरिष्यसिदेवाँ२ऽइदेषिपथिभि ÷ सुगेभि ÷ यत्रासतेसुकृतोयत्रतेय-
युस्तत्रत्वादेवःसविताद्धातु ॥ १६ ॥ अग्निःपशुरासीत्तेनायजन्त-
सऽएतंलोकमजयद्यस्मिन्नग्निःसतेलोकोभविष्यतितञ्जेष्यसिपिवै-
ताऽअपः । व्वायुःपशुरासीत्तेनायजन्तसऽएतंलोकमजयद्यस्मि-
न्वायुःसतेलोकोभविष्यतितञ्जेष्यसिपिवैताऽअपः । सूर्य्य÷पशु-

रासीत्तेनायजन्तसऽएतंल्लोकमंजयद्यस्मिन्त्सूर्ष्य्ःसतेलोकोभविष्य-
तितञ्जेष्यसिपिवैताऽअपः ॥ १७ ॥ प्राणायस्वाहापानायस्वाहा-
व्यानायस्वाहा । अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन । ससं-
स्त्यश्श्वकःसुभद्रिकाङ्काम्पीलवासिनीम् ॥ १८ ॥ गणानान्त्वागण-
पतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳ-
हवामहेवसोमम । आहमजानिगर्ब्भधमात्वमजासिगर्ब्भधम् ॥ १९ ॥

१. 'मुष्ट्याकृतिर्मकारे स्यान्नकारे तु नखग्रहः' या० शि० श्लो० ६१ । प्रत्य-वसानगतेऽर्धमात्रिके नकारे हस्तस्य मुष्ट्याकृतिः स्यात् । यथा गणानान्त्वा० धम् । एवं नकारे अवसानगते नखग्रहः । तर्जन्याः नखस्य अङ्गुष्ठेन स्पर्शः कार्यः । यथा— 'सहस्तो० रश्मीन् (शु० य० सं० ३४।४९) इत्यादि मन्त्रेषु ।

ताऽउभौचतुरं᳡ पुदः सम्प्रसारयावस्वर्ग्गेलोकेप्प्रोर्णुवाथांव्वृषांव्वा-
जीरेतोधारेतोदधातु ॥ २० ॥ उत्सक्थ्याऽअवंगुदन्धेहिसमञ्जिञ्चार-
याव्वृषन् । यस्त्रीणाञ्जीवभोजनः ॥ २१ ॥ यकासकौशकुन्तिकाहल-
गितिव्वञ्चति । आहन्तिगभेपसोनिगल्गलीतिधारका ॥ २२ ॥ यको-
सकौशकुन्तकऽआहलगितिव्वञ्चति । व्विवक्षतऽइवतेमुखमद्ध्वर्य्यो-
मानस्त्वमभिभाषथाः ॥ २३ ॥ मातार्चतेपिताचतेग्ग्रंव्वृक्षस्यरोहतः ।
प्रतिलामीतितेपितागभेमुष्टिमतंसयत् ॥ २४ ॥ मातार्चतेपिताच-
तेग्ग्रेव्वृक्षस्यक्क्रीडतः । व्विवक्षतऽइवतेमुखम्ब्रह्मन्मात्वंव्वदोबहु
॥ २५ ॥ ऊर्द्ध्वमेनामुच्छ्रापयगिरौभारंहरन्निव । अथास्यैमद्ध्य-

मेधताᳬशीतेव्वातेपुनन्निव ॥ २६ ॥ ऊद्र्ध्वमेनमुच्छ्रयताद्गिरौभा-
रᳬहरन्निव । अथास्यमद्ध्यमेजतुशीतेव्वातेपुनन्निव ॥ २७ ॥ यद-
स्याऽअᳬहुभेद्याःक्रुधुस्थूलमुपातसत् । मुष्काविदस्याऽएजतोगो-
शफेशकुलाविव ॥ २८ ॥ यद्देवासोललामगुम्प्रविष्टीमिनमाविषुः ।
सक्थनादेदिश्यतेनारीसत्यस्याक्षिभुवोयथा ॥ २९ ॥ यद्धरिणोयव-
मत्तिनपुष्टम्पशुमन्न्यते । शूद्रायदर्य्यजारानपोषायधनायति ॥ ३० ॥
यद्धरिणोयवमत्तिनपुष्टम्बहुमन्न्यते । शूद्रोयदर्य्यायैजारोनपोष-
मनुमन्न्यते ॥ ३१ ॥ दधिक्क्राव्णोऽअकारिषञ्जिष्णोरश्वस्यव्वा-
जिनः । सुरभिनोमुखाकरत्प्रणऽआयूᳬषितारिषत् ॥ ३२ ॥ गायत्री-

त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्यासह । बृहत्युष्णिहाककुप्सूचीभिः शम्यन्तुत्वा ॥ ३३ ॥ द्विपदायाश्चतुष्पदास्त्रिपदायाश्चषट्पदाः । विच्छन्दायाश्चसच्छन्दाःसूचीभिःशम्यन्तुत्वा ॥ ३४ ॥ महानाम्न्योरेवत्योविश्वाऽआशाःप्रभूवरीः । मैघीर्विद्युतोवाचःसूचीभिःशम्यन्तुत्वा ॥ ३५ ॥ नार्य्यस्तेपत्न्योलोमविचिन्वन्तुमनीषया । देवानाम्पत्न्योदिशःसूचीभिःशम्यन्तुत्वा ॥ ३६ ॥ रजताहरिणीःसीसायुजोयुज्यन्तेकर्म्मभिः । अश्वस्यवाजिनस्त्वचिसिमाःशम्यन्तुशम्यन्तीः ॥ ३७ ॥ कुविदङ्गयवमन्तोयवञ्चिद्यथादान्त्यनुपूर्व्वंवियूय । इहेहैषाङ्कृणुहिभोजनानियेबर्हिषोनमऽउक्ति-

ऽस्रजन्ति ॥ ३८ ॥ कस्त्वाछ्यंतिकस्त्वाव्विशास्तिकस्तेगात्राणिश-
म्म्यति । कउंतेशमिताकविः ॥ ३९ ॥ ऋतवस्तऽऋतुथापर्वंशमिता-
रोव्विशासतु । संव्वत्सरस्यतेजसाशमीभिः शम्म्यन्तुत्वा ॥ ४० ॥
अर्द्धमासाःपरूंषितेमासाऽआच्छ्यन्तुशम्म्यन्तः । अहोरात्राणि-
मरुतोव्विलिष्टंसूदयन्तुते ॥ ४१ ॥ दैव्याऽअद्ध्वर्य्यवस्त्वाछ्य-
न्तुव्विचशासतु । गात्राणिपर्व्वशस्तेसिमाःकृण्वन्तुशम्म्यन्तीः
॥ ४२ ॥ द्यौस्तेपृथिव्व्यन्तरिक्षंव्वायुश्छिद्रंपृणातुते । सूर्य्यस्तेनक्ष-
त्रैःसहलोककृणोतुसाधुया ॥ ४३ ॥ शन्तेपरेभ्योगात्रेभ्यःशमस्त्व-
वरेभ्यः । शमस्थभ्योमज्जभ्यःशम्म्वस्तुतन्न्वैतव ॥ ४४ ॥

कःस्विदेकाकीचरतिकऽउस्विज्जायतेपुनः । किꣳस्विद्धिमस्यभेष-
जङ्किम्वावपनम्महत् ॥ ४५ ॥ सूर्य्यऽएकाकीचरतिचन्द्रमाजाय-
तेपुनः । अग्निर्हिमस्यभेषजम्भूमिरावपनम्महत् ॥ ४६ ॥ किꣳस्वि-
त्सूर्य्यसमञ्ज्योतिःकिꣳसमुद्रसमꣳसरः । किꣳस्वित्पृथिव्यै-
व्वर्षीयःकस्यमात्रानविद्यते ॥ ४७ ॥ ब्रह्मसूर्य्यसमञ्ज्योतिर्द्यौः
समुद्रसमꣳसरः । इन्द्रः पृथिव्यैव्वर्षीयान्गोस्तुमात्रानवि-
द्यते ॥ ४८ ॥ पृच्छामित्वाचितयेदेवसखयदित्वमत्रमनसाजगन्थ ।
येषुव्विष्णुस्त्रिषुपदेष्वेष्टस्तेषुविश्वम्भुवनमाविवेशा३ ॥ ४९ ॥
अपितेषुत्रिषुपदेष्वस्मियेषुव्विश्वम्भुवनमाविवेश । सद्यःपर्य्ये-

सिपृथिवीमुतद्यामेकेनाङ्गेनदिवोऽअ्स्यपृष्ठम् ॥ ५० ॥ केष्ववन्तः
पुरुषऽआविवेशकान्यन्तःपुरुषेऽअर्पितानि । एतद्ब्रह्मन्नुपवल्हा-
मसित्वाकिंᳪस्विन्नःप्रतिवोचास्यत्र ॥ ५१ ॥ पञ्चस्वन्तःपुरुषऽ-
आविवेशतान्यन्तःपुरुषेऽअर्पितानि । एतत्त्वात्रप्रतिमन्वानोऽ-
अस्मिनमाययाभवस्युत्तरोमत् ॥ ५२ ॥ कास्विदासीत्पूर्व्वचित्तिः
किंᳪस्विदासीद्बृहद्वयः । कास्विदासीत्पिलिप्पिलाकास्विदासी-
त्पिशङ्गिला ॥ ५३ ॥ द्यौरासीत्पूर्व्वचित्तिरश्वऽआसीद्बृहद्वयः ।
अविरासीत्पिलिप्पिलारात्रिरासीत्पिशङ्गिला ॥ ५४ ॥ कऽईमरेपि-
शङ्गिलाकाऽईङ्कुरुपिशङ्गिला । कईमास्कन्दमर्षतिकऽईम्पन्थांविस-

र्प्पति ॥ ५५ ॥ अजारेपिशङ्गिलाश्वावित्कुरुपिशङ्गिला । शशऽआ-
स्कन्दमर्षत्यहिꣳपन्थांव्विसर्प्पति ॥ ५६ ॥ कत्यस्यव्विष्ठाःकत्यक्षरा-
णिकतिहोमासꣳकतिधासमिद्धꣳ । यज्ञस्यत्वाव्विदथापृच्छमत्रकति-
होतारऽऋतुशोयजन्ति ॥ ५७ ॥ षडस्यव्विष्ठाःशतमक्षराण्ण्यशी-
तिर्होमाꣳसमिधोहतिस्रः । यज्ञस्यतेव्विदथाप्प्रब्रवीमिसप्तहोतारऽ-
ऋतुशोयजन्ति ॥ ५८ ॥ कोऽअस्यव्वेदभुवनस्यनाभिङ्कोद्यावापृथि-
वीऽअन्तरिक्षम् । कःसूर्य्यस्यव्वेदबृहतोजनित्रङ्कोव्वेदचन्द्रमसंय्यत-
तोजाः ॥ ५९ ॥ व्वेदाहमस्यभुवनस्यनाभिंव्वेदद्यावापृथिवीऽ-
अन्तरिक्षम् । व्वेदसूर्य्यस्यबृहतोजनित्रमथोव्वेदचन्द्रमसंय्यतोजाः

॥ ६० ॥ पृच्छामित्वापरमन्तम्पृथिव्याः पृच्छामि यत्र भुवनस्यना-
भिः । पृच्छामित्वावृष्णोऽअश्वस्यरेतः पृच्छामिव्वाचः परमंव्व्योम
॥ ६१ ॥ इयंव्वेदिः परोअन्तः पृथिव्याऽअयंय्यज्ञोभुवनस्यनाभिः ।
अयꣳसोमोव्वृष्णोऽअश्वस्यरेतोब्ब्रह्म्मायंव्वाचः परमंव्व्योम ॥६२॥
सुभूः स्वयम्भूः प्प्रथमोन्तर्म्महत्यर्ण्णवे । दधेहगर्ब्भमृत्वियंय्यतोजा-
तः प्प्रजापतिः ॥ ६३ ॥ होतायक्षत्प्रजापतिꣳसोमस्यमहिम्म्नः ।
जुषताम्पिबतुसोमꣳहोतर्य्यज ॥ ६४ ॥ प्रजापतेनत्वदेतान्न्यन्न्यो-
व्विश्वारूपाणिपरितावभूव । यत्कामास्तेजुहुमस्तन्नोऽअस्तुव्वयꣳ
स्यामपतयोरयीणाम् ॥ ६५ ॥ इति संहितायां त्रयोविंशोऽध्यायः ॥

अथ चतुर्विंशोऽध्यायः

ओ३म् अश्वस्तूपरो गोमृगस्ते प्राजापत्याः कृष्णग्रीवऽआग्नेयो ररा-
टे पुरस्तात्सारस्वती मेष्यधस्ताद्धन्न्वोराश्विनावधोरामौ बाह्वोः
सौमापौष्णः श्यामो नाभ्याᳬ सौर्य्ययामौ श्वेतश्च कृष्णश्च पार्श्व-
योस्त्वाष्ट्रौ लोमशसक्थौ सक्थ्योर्व्वायव्यः श्वेतः पुच्छऽइन्द्राय स्व-
पस्याय व्वेहद्वैष्णवो व्वामनः ॥ १ ॥ रोहितो धूम्ररोहितः कर्कन्धु-
रोहितस्ते सौम्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते व्वारुणाः शितिरन्ध्रो-
न्न्यतः शितिरन्ध्रः समन्तशितिरन्ध्रस्ते सावित्राः शितिबाहुरन्न्यतः

शितिबाहुःसमन्तशितिवाहुस्तेवार्हस्प्पत्याः पृषतीक्षुद्द्रपृषतीस्त्थूलपृष-
तीतामैत्त्रावरुण्ण्यः ॥ २ ॥ शुद्धवालःसर्व्वशुद्धवालोमणिवालस्तऽआ-
श्शिवनाःश्येतःश्येताक्षोरुणस्तेरुद्द्रायपशुपतयेकण्णायामाऽअवलि-
प्ताराैद्द्रानभोरूपाःपार्ज्जन्न्याः ॥ ३ ॥ पृश्निस्तिरश्चीनपृश्निरू-

१. 'ऊष्ममन्तस्स्थाभ्यश्च स्प्पर्शः' (शु० य० ४।१०२) ऊष्माणः—शषसहाः अन्तस्स्थाः—यरलवा। एतेभ्यः परः स्पर्शो द्विरुच्यते। अत्र—एकः शकारो द्वौ नकारौ संयोगः। एवम्—'अश्म्मो' (१८।१३) इत्यत्रापि—शकारो द्वौ मकारौ संयोगः। केचित्—अत्र स्थले—पाष्ण्ण्र्या (२५।४०) इत्यत्र रेफः—पकारो द्वौ णकारौ यकारश्च संयोगं मन्यन्ते तदसाधुः। णकारस्य द्वित्वसम्भावना न कार्या 'नास्वरपूर्वा ऊष्मान्तस्स्थाः' १०५ अस्वरपूर्वा ऊष्माणोऽन्तस्थाश्च परान्स्पर्शान्न द्विर्भावयन्ति। अतः अनेन सूत्रेण निषेधात्। नेदमुदाहरणं युक्तम्।

द्ध्र्वपृश्निस्तेमारुताः फल्गूर्ल्लोहितोर्णीपलक्षीताः सारस्वत्यः प्ली-
हाकर्णः शुण्ठाकर्णोऽध्यालोहकर्णस्तेत्वाष्ट्राः कृष्णग्रीवः शिति-
कक्षोऽञ्जिसक्थस्तऽऐन्द्राग्नाः कृष्णाञ्जिरल्पाञ्जिर्म्महाञ्जिस्तऽउष-
स्याः ॥ ४ ॥ शिल्पाव्वैश्वदेव्व्योरोहिण्ण्यस्त्र्यवयोव्वाचेविज्ञाताऽ-
अदित्यैसरूपाधात्रेव्वत्सतर्य्योदेवानाम्पत्नीभ्यः ॥ ५ ॥ कृष्णग्री-
वाऽआग्नेयाः शितिभ्रवोव्वसूनाꣳ रोहितारुद्द्राणाꣳ श्वेताऽअवरो-
किणऽआदित्यानान्नभोरूपाः पार्ज्जन्न्याः ॥ ६ ॥ उन्नतऽऋषभोव्वा-
मनस्तऽऐन्द्रावैष्णवाऽउन्नतः शितिबाहुः शितिपृष्ठस्तऽऐन्द्राबार्हस्प-
त्याः शुकरूपाव्वाजिनाः कल्माषाऽआग्निमारुताः श्यामाः पौष्णाः

॥ ७ ॥ एताऽऐन्द्राग्ग्नाद्विरूपाऽअग्ग्नीषोमीयाव्वामनाऽअनड्वाहऽ-
आग्ग्नावैष्ष्णवाव्वशामैत्रावरुण्युऽन्न्यतऽएन्न्योमैत्त्र्य÷ ॥ ८ ॥ कृष्ष्ण-
ग्ग्रीवाऽआग्ग्नेयावब्भ्रव÷ सौम्म्याःश्श्वेताव्वायव्व्याऽअविज्ञाताऽअ-
दित्त्यैसरूपाधात्रेव्वत्सतर्य्योदेवानाम्पत्त्नीब्भ्यः ॥ ९ ॥ कृष्ष्णाभौमा-
धूम्म्राआन्तरिक्षाबृहन्तोदिव्व्याःशबलाव्वैद्युताःसिध्मास्तारकाः
॥ १० ॥ धूम्म्रान्व्वसन्तायालभतेश्श्वेतान्ग्ग्रीष्ष्मायकृष्ष्णान्व्वर्षाब्भ्यो-
ऽरुणाञ्छरदेपृषतोहेमन्तायपिशङ्गाञ्छिशिराय ॥ ११ ॥ त्र्यवयोगायत्र्यै-
पञ्चावयस्त्रिष्ष्टुभेदित्त्यवाहोजगत्त्यैत्रिवत्साऽअनुष्ष्टुभेतुर्य्यवाहऽउष्ष्णि-
हे ॥ १२ ॥ पष्ठवाहोव्विराजऽउक्षाणोबृहत्त्याऽऋषभाःककुभेनड्वा-

हं÷पङ्क्त्यैधेनवोतिच्छन्दसे ॥ १३ ॥ कृष्णग्रीवाऽआग्नेयावब्भ्रवं÷ सौम्म्याऽउपद्ध्वस्ताःसावित्राव्वत्सतर्य्यं ÷ सारस्वत्य ÷ श्यामाःपौष्णाःपृश्नयोमारुतावहुरूपाव्वैश्श्वदेवाव्वशाद्यावापृथिवीयाः ॥१४॥ उक्ताःसञ्चराऽएताऽऐन्द्राग्नाःकृष्णाव्वारुणाःपृश्नयोमारुताःकायास्तूपराः ॥ १५ ॥ अग्नयेनीकवतेप्रथमजानालभतेमरुद्भ्यं ÷ सान्तपनेभ्यं ÷ सवात्यान्मरुद्भ्योगृहमेधिभ्योवष्किहान्मरुद्भ्यं ÷ क्क्रीडिभ्यं ÷ सꣳसृष्टान्मरुद्भ्यःस्वतवद्भ्योनुसृष्टान् ॥ १६ ॥ उक्ताःसञ्चराऽएताऐन्द्राग्नाःप्राशृङ्गामाहेन्द्रावहुरूपाव्वैश्वकर्म्मणाः ॥ १७ ॥ धूम्म्रावब्भ्रनीकाशाःपितृणाꣳसोमवतामब्भ्रवो

धूम्म्रनीकाशाः पितृणांवर्हिषदांकृष्णाभ्रनीकाशाःपितृणामग्निष्वात्तानांकृष्णाःपृषन्तस्त्रैयम्बकाः ॥ १८ ॥ उक्त्ताःसञ्चराऽएताःशुनासीरीयाःश्वेतावायव्या ÷ श्वेताःसौर्याः ॥ १९ ॥ वसन्तायकपिञ्जलानालभतेग्रीष्मायकलविंकान्वर्षाभ्यस्तित्तिरीञ्छरदेवर्तिकाहेमन्तायककरान्शिशिरायविककरान् ॥ २० ॥ समुद्रायशिशुमारानालभतेपर्जन्न्यायमण्डूकानद्भ्योमत्स्यान्मित्रायकुलीपयान्वरुणायनाक्क्रान् ॥ २१ ॥ सोमायहꣳसानालभतेवायवेबलाकाऽइन्द्राग्निभ्याङ्क्रुञ्चान्मित्रायमद्गून्वरुणायचक्रवाकान् ॥ २२ ॥ अग्नयेकुटरूनालभतेवनस्पतिभ्यऽउलूकानग्नीषोमा-

ब्भ्याञ्चाषानश्विब्भ्याम्मयूरान्मित्त्रावरुणाब्भ्याङ्कपोतान् ॥२३॥ सो-
मायलबानालभतेत्वष्ट्रेकौलीकान्गोषादीर्द्देवानाम्पत्नीब्भ्यः कुलीका दे-
वजामिब्भ्योग्नयेगृहपतयेपारुष्णान् ॥ २४ ॥ अह्नेपारावतानालभते-
रात्र्यैसीचापूरहोरात्त्रयोःसन्धिब्भ्योजतूर्म्मासेब्भ्योदात्यौहान्त्संव्वत्स-
रायमहतः सुपर्णान् ॥ २५ ॥ भूम्म्याऽआखूनालभतेन्तरिक्षायपा-
ङ्क्त्रान्दिवेकशान्दिग्ग्भ्योनकुलान्बभ्रुकानवान्तरदिशाब्भ्यः ॥२६॥
व्वसुब्भ्यऽऋश्यानालभतेरुद्द्रेब्भ्योरुरूनादित्येब्भ्योन्न्यङ्कून्विश्वे-
ब्भ्योदेवेब्भ्यः पृषतान्त्साद्ध्येब्भ्यः कुलुङ्गान् ॥ २७ ॥ ईशानाय

परस्वतऽआलभतेमित्त्रायगौरान्न्वरुणायमहिषान्न्बृहस्पतयेगवयाँ-
स्त्वष्ट्रऽउष्ट्रान् ॥ २८ ॥ प्रजापतयेपुरुषान्न्हस्तिनऽआलभतेव्वाचे-
प्प्लुषींश्चक्षुषेमशकाञ्छ्रोत्त्रायभृङ्गाः ॥२९॥ [शतम् १४००] प्रजा-
पतयेचव्वायवेचगोमृगोव्वरुणायारण्ण्योमेषोयमायकृष्ण्णोमनुष्य्यरा-
जायमर्क्कटः शार्दूलायरोहिदृषभायगवयीक्षिप्प्रश्येनायव्वर्तिकानी-

---

१. इत्यत्र 'तथयोः सम्' (३।१३६) तकारथकारयोः प्रत्यययोर्न्नकारः सकारमापद्यते, उपधाचानुस्वारेण व्यवधीयते । एवं अन्याँस्ते (१७।११) 'कऽँस्थामं देवसवितः' इति शाखान्तरीयमप्युदाहरणम् । थकारस्य रूपोदाहरणं—विद्वान् थकारः—विद्वाँस्थकारः ।

२. इत्यत्रापि 'चछयोः शम्' (३।१३५) इत्यनेन शकारमापद्यते ।

लङ्गोहःक्क्रिमिं÷समुद्द्रायशिशुमारोहिमवतेहस्ती ॥ ३० ॥ मयुःप्प्रा-
जापत्यऽउलोहलिक्ष्णोव्वृषदंशस्तेधात्त्रेदिशाङ्कङ्कोधुङ्क्षाग्ग्नेयीकल-
विङ्कोलोहिताहिःपुष्ष्करसादस्तेत्वाष्ट्राव्वाचेक्क्रुञ्च÷ ॥ ३१ ॥ सोमा-
यकुलुङ्गऽआरण्योजोनकुलःशकातेपौष्ष्णाःक्क्रोष्टामायोरिन्द्रस्यगौ-
रमृगःपिद्द्वोन्न्यङ्कु÷कक्कटस्तेनुमत्त्यैप्प्रतिश्श्रुत्कायैचक्क्रवाकः ॥ ३२ ॥
सौरीबलाकाशार्गःसृजयःशयाण्डकस्तेमैत्त्राःसरस्वत्यैशारि÷पुरु-
षवाक्श्श्वाविद्भौमीशार्दूलोव्वृकःपृदाकुस्तेमन्न्यवेसरस्वतेशुक÷
पुरुषवाक् ॥ ३३ ॥ सुपर्णःपार्ज्जन्न्यऽआतिर्व्वाहसोदर्व्विदातेव्वा-
यवेबृहस्प्पतयेव्वाचस्प्पतयेपैङ्गराजोलजऽआन्तरिक्षःप्प्लवोमद्गुर्म्म-

त्स्यस्तेनंदीपतयेंद्यावापृथिवीयं कूर्म्मः ॥ ३४ ॥ पुरुषमृगश्चन्द्र-
मंसोगोधाकालंकादार्व्वाघाटस्तेव्वनस्प्पतीनाङ्कृकवाकुं ÷ सावित्त्रो-
हु॒ठ्ठ॒सोव्वातंस्यनाक्क्रोमकरं कुलीपयस्तेकूपारस्यह्नियैशल्यकः ॥३५॥
एण्ण्यन्होमण्डूकोमूषिकातित्तिरिस्तेसर्प्पाणांल्लोपाशऽआंश्विनः
कृष्ण्णोरात्र्याऽऋक्षोंजतूः सुषिलीकातऽइंतरजनानाञ्जहकाव्वैष्णवी
॥ ३६ ॥ अन्न्यवापोर्द्धमासानामृश्योंमयूरं ÷ सुपर्ण्णस्तेगंन्ध-
र्व्वाणांमपामुद्रोमासाङ्कश्यपोरोहित्कुंण्डृणाचीगोलत्तिकाते प्सर-

---

१. 'कश्श्यपस्यानार्षेये जातूकर्ण्यस्य' (शु० प्रा० सू० १५८) जातूकर्णस्या-
चार्यमते कश्यपशब्दस्यार्षेयवर्जं यकारो न भवति एतदुक्तं भवति कच्छपे वाच्ये

साम्मृत्यवैसित॒ः ॥ ३७ ॥ क्वर्षाहूर्श्रौतूनासाखुःकशौमा-
न्थालस्तेपितृणाम्बलायाजगरोव्वसूनाङ्कुपिञ्जलःकपोतऽउलूकःशश-
स्तेनिर्ऋत्यैव्वरुणायारण्योमेषः ॥ ३८ ॥ श्वित्रऽआदित्यानामुष्ट्रो-
घृणीवान्वार्ध्रीनसस्तेमत्याऽअरण्यायसृमरोरुरूरौद्रःक्वयिः कुट-

---

द्विरुक्तो सत्यां चकारो भवति किन्तु शकारस्य छकारादेशः स्यात् जातूकर्ण्यमते, जातूकर्ण्यस्येति किम्—काण्वमाध्यन्दिनादेर्माभूत् । अपामुद्द्रो मासाङ्कश्यपः ।

१. 'पक्षौ वितत्य खे गृध्रो भ्रान्त्या सङ्कुच्य तिष्ठति । एवं वर्णाः प्रयोक्तव्या 'वार्ध्रीनसो निदर्शनम्' (या० शि० श्लोक ६८) गृध्रः, पक्षी, भ्रांत्या, खे—आकाशे, पक्षौ, वितत्य-विस्तीर्य, पुनः सङ्कुच्य, तिष्ठति, एवं, वर्णाः—दीर्घाः गुरुभूताः प्रयोक्तव्याः ।

रुद्रांत्यौहस्तेव्वाजिनाङ्कामायपिकः ॥ ३९ ॥ खड्गोव्वैश्श्वदेवःश्श्वा-
कृष्ण ः कर्णोगर्द्दभस्तरक्षुस्तेरक्षसामिन्द्रायसूकरः सिꣳहोमारुतःकृकं-
लासःपिप्पकाशकुनिस्तेशरव्यायैव्विश्श्वेषान्देवानाम्पृषतः ॥ ४० ॥

इति संहितायां चतुर्विंशोऽध्यायः ॥

❀ अथ पञ्चविंशोऽध्यायः ❀

ॐ शादन्दद्भिरवकान्दन्तमूलैर्म्मृदम्बर्स्वैस्तेगान्दꣳष्ट्राभ्याꣳ
सरस्वत्याऽअग्रजिह्वञ्जिह्वायाऽउत्सादमवक्रन्देनतालुव्वाजꣳ
हनुभ्यामपऽआस्येनव्वृषणमाण्डाभ्यामादित्याँश्श्मश्रुभिःपन्था-

नम्भ्रूभ्यान्द्यावापृथिवीव्वर्त्तोभ्यांव्विद्युतङ्कनीनकाभ्याꣳशुक्लाय
स्वाहाकृष्णायस्वाहापाऽर्य्याणिपक्ष्माण्यवाऽर्य्याऽइक्षवोवाऽर्य्याणिप-
क्ष्माणिपाऽर्य्याऽइक्षवः ॥ १ ॥ व्वातम्प्राणेनापानेननासिकेऽउपया-
ममधरेणौष्ठेनसदुत्तरेणप्प्रकाशेनान्तरमनूकाशेनबाह्यन्निवेष्प्यम्मू-
र्द्ध्नास्तनयित्नुन्निर्ब्बाधेनाशनिम्मस्तिष्क्केणव्विद्युतङ्कनीनकाभ्या-
ङ्कर्णाभ्याꣳश्रोत्रꣳश्रोत्राभ्याङ्कर्णौतेदनीमधरकण्ठेनापः शुष्क्ककण्ठे-
नचित्तम्मन्न्याभिरदितिꣳशीर्ष्णानिर्ऋतिन्निर्ज्जर्ज्जल्प्येनशीर्ष्णासं-
क्क्रोशैःप्प्राणान्रेष्माणꣳस्तुपेन ॥ २ ॥ मशकान्केशैरिन्द्रꣳस्व-
पसाव्वहेनबृहस्पतिꣳशकुनिसादेनकूर्म्मान्छफैराक्रमणꣳस्थूरा-

भ्यामृक्षलाभिः कपिञ्जलाञ्जवञ्जङ्घाभ्यामद्ध्वानम्बाहुभ्याञ्जाम्बीलेना-
रण्यमग्निमतिरुग्भ्याम्पूषणन्दोभ्र्यामश्विनावꣳसाभ्याꣳ रुद्द्र-
ꣳरोराभ्याम् ॥ ३ ॥ अग्नेः पक्षतिर्व्वायोर्न्निपक्षतिरिन्द्रस्यतृती-
यासोमस्यचतुर्त्थ्यदित्यैपञ्चमीन्द्राण्यैषष्ठीमरुताꣳ सप्तमीवृहस्पते-
रष्ट्टम्यर्य्यम्णोनवमीधातुर्द्दशमीन्द्रस्यैकादशीव्वरुणस्यद्द्वादशीय-
मस्यत्त्रयोदशी ॥ ४ ॥ इन्द्राग्न्योः पक्षतिः सरस्वत्यैनिपक्षतिर्म्मित्रस्य-
तृतीयापाञ्चतुर्त्थीनिर्ऋत्यैपञ्चम्यग्नीषोमयोः षष्ठ्ठीसर्प्पाणाꣳ सप्त-
मीव्विष्णोरष्ट्टमीपूष्णोनवमीत्वष्टुर्द्दशमीन्द्रस्यैकादशीव्वरुणस्य
द्द्वादशीयम्म्यैत्त्रयोदशीद्यावापृथिव्व्योर्द्दक्षिणम्पार्श्वंव्विश्वेषान्दे-

वानामुत्तरम् ॥ ५ ॥ मरुताꣳ स्कन्धा विश्वेषान्देवानाम्प्रथमा कीकसा रुद्राणान्द्वितीयादित्यानान्तृतीया व्वायोः पुच्छमग्नीषोमयो र्भासदौ क्रुञ्चौ श्रोणिभ्यामिन्द्राबृहस्पती ऽऊरुभ्याम्मित्त्रावरुणा वल्गाभ्यामाक्क्रमणꣳ स्थूराभ्याम्बलङ्कुष्ठाभ्याम् ॥ ६ ॥ पूषणं व्वनिष्ठुनान्धाहीन्त्स्थूलगुदया सर्प्पान्गुदाभिर्व्विह्रुत ऽआन्त्रैरपो व्वस्तिना व्वृषणमाण्डाभ्यां व्वाजिनꣳ शेपेन प्रजाꣳ रेतसा चाषान्पित्तेन प्रदरान्पायुना कूश्माञ्छकपिण्डैः ॥ ७ ॥ इन्द्रस्य क्रोडो दित्यै पाजस्यन्दिशाञ्जत्रवो दित्यै भसज्जीमूतान्हृदयौपशेनान्तरिक्षम्पुरीतता नभ ऽउदर्य्येण चक्रवाकौ मतस्नाभ्यान्दिवं व्वृक्काभ्याङ्गिरी-

न्प्लाशिभिरुपलान्प्लीन्हाव्वल्मीकान्क्लोमभिग्ग्लौभिग्गुल्मान्हि-
राभिᳪस्रवन्तीर्ह्रदान्कुक्षिभ्यां ᳪ समुद्रमुदरेणव्वैश्वानरम्भस्म-
ना ॥ ८ ॥ व्विधृतिन्नाभ्याघृत ᳪ रसेनापोयूष्णामरीचीर्व्वि-
प्रुड्भिर्नीहारमूष्मणाशीनंव्वसयाप्रुष्वाऽअश्रुभिर्ह्रादुनीर्दूषीकाभि-
रस्नारक्षाᳪ सिचित्राण्यङ्गैर्न्नक्षत्राणिरूपेणपृथिवीन्त्वचाजुम्बकाय
स्वाहा ॥ ९ ॥ हिरण्यगर्भःसमवर्त्तताग्ग्रेभूतस्यजातःपतिरेकऽआ-
सीत् । सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहविषाव्विधेम ॥ १० ॥
यःप्राणतोनिमिषतोमहित्वैकऽइद्राजाजगतोवभूव । यऽईशेऽअस्य
द्विपदश्चतुष्पदᳪकस्मैदेवायहविषाव्विधेम ॥ ११ ॥ यस्येमेहिमव-

न्तोमहित्वायस्यंसमुद्द्रह्ँ रसयासहाहुः । यस्येमाःप्प्रदिशोयस्य
वाहूकस्म्मैदेवायहविषाव्विधेम ॥ १२ ॥ यऽआत्मदावलदायस्यव्वि-
श्श्वंऽउपासतेप्प्रशिषंयस्यदेवाः । यस्यच्छायामृतंय्यस्यमृत्त्युःकस्म्मै
देवायहविषाव्विधेम ॥ १३ ॥ आनोभद्द्राःक्क्रतवोयन्तुव्विश्श्व-
तोदब्धासोऽअपरीतासऽउद्भिदः । देवानोयथासदमिद्वृधेऽअस-
न्नप्प्रायुवोरक्षितारोदिवेदिवे ॥ १४ ॥ देवानाम्भद्द्रासुमतिर्ऋजूय-

---

१. इत्यत्र 'यस्यातिहायसहेतिन' (४।२६) इति सूत्रेण यस्य, अतिहाय, सह, इत्येतैः पदैरुपहितः स्वरः छकारे प्रत्ययेन चकारेण व्यवधीयते । एवमन्यत्र स्थलेष्वपि-यथा-अतिशयच्छिद्रा (२५।४१) सहच्छन्दसः (३४।४८) ।

तान्देवानां ꣳ रातिरभिनोनिवर्त्तताम् । देवानां ꣳ सक्ख्यमुपसेदिमा
व्वयन्देवानऽआयुःप्प्रतिरन्तुजीवसे ॥ १५ ॥ तान्पूर्व्वँयानिविदाहूम-
हेव्वयम्भगम्मित्रमदितिन्दक्षमस्रिधम् । अर्य्यमणंव्वरुण ꣳ सोमम-
श्विनासरस्वतीनःसुभगामयस्करत् ॥ १६ ॥ तन्नोव्वातोमयोभुव्वा-
तुभेषजन्तन्मातापृथिवीतत्पितादद्यौः । तद्ग्रावाणःसोमसुतोमयो-
भुवस्तदश्श्विनाश्शृणुतन्धिष्ण्यायुवम् ॥ १७ ॥ तमीशानञ्जगतस्त-
स्त्थुषस्प्पतिन्धियञ्जिन्न्वमवसेहूमहेव्वयम् । पूषानोयथाव्वेदसाम-
सद्वृधेरक्षितापायुरदब्धःस्वस्तये ॥ १८ ॥ स्वस्तिनऽइन्द्रोव्वृद्धश्श्र-
वाःस्वस्तिनःपूषाव्विश्श्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्व-

स्तिनोबृहस्पतिर्द्दधातु ॥ १९ ॥ पृषदश्श्वामरुतः पृश्निमातरः शु-
भंय्यावानोव्विदथेषुजग्ग्मयः । अग्निजिह्व्वामनवः सूरचक्षसोव्वि-
श्श्वेनोदेवाऽअवसागमन्निह ॥ २० ॥ भद्रङ्कर्णेभिः श्शृणुयामदेवाभ-
द्द्रम्पश्श्येमाक्षभिर्य्यजत्राः । स्थिरैरङ्गैस्तुष्टुवा ७ं सस्तनूभिर्व्यशेम-
हिदेवहितंय्यदायुः ॥ २१ ॥ शतमिन्नुशरदोऽअन्तिदेवायत्रान-
श्श्चक्क्राजरसन्तनूनाम् । पुत्त्रासोयत्रपितरोभवन्तिमानोमद्ध्यारीरि-
षतायुर्ग्गन्तोः ॥ २२ ॥ अदितिर्द्द्यौरदितिरन्तरिक्षमदितिर्म्माताास-
पितासपुत्त्रः । व्विश्श्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्ज्जातमदि-
तिर्ज्जनित्वम् ॥ २३ ॥ मानोमित्त्रोव्वरुणोऽअर्य्यमायुरिन्द्रऽऋभुक्षा

मरुतःपरिक्ख्यन् । यद्वाजिनोदेवजातस्यसप्तेःप्प्रवक्ष्यामोव्विदथे-
व्वीर्याणि ॥ २४ ॥ यन्निर्णिजारेक्णसाप्प्रावृतस्यरातिङ्गृभीताम्मुख-
तोनयन्ति । सुप्प्राङजोमेम्म्यद्विश्वरूपऽइन्द्रापूष्णोःप्प्रियमप्प्ये-
तिपाथः ॥ २५ ॥ एषच्छागःपुरोऽअश्श्वेनव्वाजिनापूष्णोभागो-
नीयतेव्विश्श्वदेव्व्यः । अभिप्प्रियंय्यत्पुरोडाशमर्व्वतात्वष्टेदेनꣳसौ-
श्रवसायजिन्वति ॥ २६ ॥ यद्धविष्ष्यमृतुशोदेवयानन्त्रिर्म्मानुषाः
पर्य्यश्श्वन्नयन्ति । अत्रापूष्णःप्प्रथमोभागऽएतियज्ञन्देवेब्भ्यःप्प्रति-
वेदयन्नजः ॥ २७ ॥ होताध्वर्य्युरावयाऽअग्निमिन्धोग्ग्रावग्ग्राभऽउत-
शꣳस्तासुविप्प्रः । तेनयज्ञेनस्वरङ्कृतेनस्विष्टेनव्वक्षणाऽआपृण-

द्ध्वम् ॥ २८ ॥ सुपुत्रस्कोऽउतस्येषू पवाहाश्श्चषालँ ङ्ये ऽअश्वयुपाय-
तक्षति । येचाव्वंतेपचनँ सम्भरन्त्युतोतेषामभिगूर्तिर्न्नऽइन्न्वतु ॥२९॥
उपप्रागात्सुमन्म्मेधायिमन्म्मदेवानामाशाऽउपवीतपृष्ठः । अन्न्वेनं
व्विप्राऽऋषयोमदन्तिदेवानाम्पुष्टेचकृमासुवन्धुम् ॥३०॥ यद्वाजि-
नोदामसन्दानमव्वतोयाशीर्षण्यारशनारज्जुरस्य । यद्वाघास्यम्प्र-
भृतमास्युतृणँ सव्वांताते ऽअपिदेवेष्ष्वस्तु ॥३१॥ यदश्वस्यक्रविषो
मक्षिकाशयद्द्वास्वरौस्वधितौरिप्तमस्ति । यद्धस्तयोःशमितुर्य्यन्न-
खेषुसव्र्वाताते ऽअपिदेवेष्ष्वस्तु ॥ ३२ ॥ यदूवध्यमुदरस्यापवाति
यऽआमस्यक्रविषोगन्धोऽअस्ति । सुकृतातच्छमितारः कृण्वन्तु-

तमेधंꣳशृतपाकम्पचन्तु ॥ ३३ ॥ यत्तेगात्रादग्निनापच्यमानादभि-
शूलन्निहतस्यावधावति । मातद्भूम्म्यामाश्रिषन्मातृणेषुदेवेभ्य-
स्तदुशद्भ्योरातमस्तु ॥ ३४ ॥ येव्वाजिनम्परिपश्यन्तिपक्वंय्यऽईं-
माहुःसुरभिर्न्निर्हरेति । येचार्व्वतोमाꣳसभिक्षामुपासतऽउतोतेषाम-
भिगूर्त्तिर्न्नऽइन्वतु ॥ ३५ ॥ यन्नीक्षणम्माँस्पचन्न्याऽउखायायापात्राणि
यूष्ण्णऽआसेचनानि । ऊष्म्मण्ण्यापिधानाचरूणामङ्काःसूनाःपरिभूष-
न्त्यश्श्वम् ॥ ३६ ॥ मात्वाग्निर्द्ध्वनयीद्धूमगन्धिर्म्मोखाभ्राजन्त्यभि-
विक्तजघ्रिः । इष्टंव्वीतमभिगूर्त्तंव्वषट्कृतन्तन्देवासꣳप्प्रतिगृभ्ण-
न्त्यश्श्वम् ॥ ३७ ॥ निक्क्रमणन्निषदनंव्विवर्त्तनंयच्चपड्वीशमर्व्वतꣳ ।

यच्चंपपौयच्चंघासिञ्जघासस्सर्व्वातातेऽअपिंदेवेष्वंस्तु ॥ ३८ ॥ यद-
श्श्वायव्वासंऽउपस्तृणन्त्यंधीवासंय्याहिरंण्यान्यस्मै । सन्दानम-
र्व्वन्तम्पड्वींशम्प्रियादेवेष्वायांमयन्ति ॥ ३९ ॥ यत्तेसादेमहंसाशूकृत-
स्यपाष्ण्र्याव्वाकशंयाव्वातुतोदं । स्रुचेवताहविषोऽअदूध्वरेषुसर्व्वाता-
तेब्रह्मंणासूदयामि ॥ ४० ॥ चतुंस्त्रिꣳशद्वाजिनोदेवबंन्धोर्व्वङ्क्री-
रश्श्वंस्यस्वधितिꣳसमेति । अच्छिद्द्रागात्त्राव्वयुनांकृणोतपरुष्परु-
रनुघुष्याविशस्त ॥ ४१ ॥ एकस्त्वष्टुरश्श्वंस्याविशस्ताद्वायन्ता-
रांभवतस्तथंऽऋतुः । यातेगात्त्राणामृतुथाणोकुमितातापिण्डांनाम्प्र-
जुंहोम्म्यग्नौ ॥ ४२ ॥ मात्वांतपत्प्रियऽआत्मापियन्तम्मास्वधितिस्त-

न्न्वुऽआतिष्ठिपत्ते । मातेगृध्नुरविशस्तातिहायछिद्रागात्राण्यसिना-
मिथूकः ॥ ४३ ॥ नवाऽउऽएतन्म्रियसेनरिष्यसिदेवा२ँ इदेषिपथि-
भिः सुगेभिः । हरीतेयुञ्जापृषतीऽअभूतामुपास्थाद्वाजीधुरिरा-
सभस्य ॥ ४४ ॥ सुगव्यन्नोव्वाजीस्वश्व्यम्पुᳬसः पुत्रा२ँ उतव्वि-
श्वापुषᳬरयिम् । अनागास्त्वन्नोऽअदितिःकृणोतुक्षत्रन्नोऽअश्वोव्व-
नताᳬहविष्मान् ॥ ४५ ॥ इमानुकम्भुवनासीषधामेन्द्रश्चव्विश्वे
चदेवाः । आदित्यैरिन्द्रःसगणोमरुद्भिरस्मभ्यम्भेषजाकरत् ।
यज्ञञ्चनस्तन्वञ्चप्रजाञ्चादित्यैरिन्द्रः सहसीषधाति ॥ ४६ ॥ अग्ने-
त्वन्नोऽअन्तमऽउतत्राताशिवोभवावरूथ्यः । व्वसुरग्निर्व्वसुश्रवा-

वा॒ऽअच्छा॑नक्षिद्युमत्त॑मꣳर॒यिन्दाः॑ । तन्त्वा॑शोचिष्ठदीदिवꣳसु॒म्नाय॑ नू॒नमी॑महे॒सखि॑भ्यः॑ ॥ ४७ ॥ इति संहितायां पञ्चविंशोऽध्यायः ।

❀ अथ षड्विंशतितमोऽध्यायः ❀

ॐ अ॒ग्निश्च॑पृथि॒वीच॒सन्न॑ते॒तेमे॒सन्न॑मतास॒दो॑व्वा॒युश्चा॒न्तरि॑क्षञ्च॒ सन्न॑ते॒तेमे॒सन्न॑मतास॒दऽआ॑दि॒त्यश्च॑च॒द्यौश्च॒सन्न॑ते॒तेमे॒सन्न॑मताम॒दऽ- आप॑श्च॒व्वरु॑णश्च॒सन्न॑ते॒तेमे॒सन्न॑मतास॒द॑ः । स॒प्तस॒ꣳसदो॑ऽअष्ट॒मी भू॒तसाध॑नी । सका॑मा॒ँ२ऽअद्ध्व॑नस्कु॒रु॒सं॒ज्ञान॑मस्तु॒मे॒मुना॑ ॥ १ ॥

---

१. 'अध्वनस्कुर्विति च' (प्रा० २९) अध्वन इत्ययं विसर्जनीयः कुर्वित्येतस्मिंश्च प्रत्यये सकारमापद्यते ।

यथेमांव्वाचङ्कल्याणीमावदानिजनेब्भ्यः । ब्ब्रह्मराजन्याब्भ्याꣳ
शूद्रायचार्य्यायचस्वायचारणायच । प्प्रियोदेवानान्दक्षिणायैदातु-
रिहभूयासमयम्मेकामःसमृद्ध्यतामुपमादोनमतु ॥ २ ॥ बृहस्प्पते
ऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु । यद्दीदयच्छव-
सऽऋतप्प्रजाततदस्म्मासुद्द्रविणन्धेहिचित्रम् । उपयामगृहीतोसि
बृहस्प्पतयेत्वैषतेयोनिर्ब्बृहस्प्पतयेत्वा ॥ ३ ॥ इन्द्रगोमन्निहायाहिपि-
बासोमꣳशतक्क्रतो । व्विद्यद्भिर्ग्ग्रावभिःसुतम् । उपयामगृही-
तोसीन्द्रायत्वागोमतऽएषतेयोनिरिन्द्रायत्वागोमते ॥ ४ ॥ इन्द्राया-
हिव्वृत्रहन्पिबासोमꣳशतक्क्रतो । गोमद्भिर्ग्ग्रावभिःसुतम् । उप-

यामगृहीतोसीन्द्रायत्वागोमतऽएषतेयोनिरिन्द्रायत्वागोमते ॥ ५ ॥
ऋतावानंव्वैश्वानरमृतस्यज्ज्योतिषस्प्पतिम् । अजस्रङ्घर्म्ममीमहे ।
उपयामगृहीतोसिव्वैश्वानरायत्वैषतेयोनिर्व्वैश्वानरायत्वा ॥ ६ ॥
व्वैश्वानरस्यसुमतौस्यामराजाहिकम्भुवनानामभिश्रीः । इतोजा-
तोव्विश्वमिदंव्विचष्टेव्वैश्वानरोयततेसूर्य्येण । उपयामगृहीतो-
सिव्वैश्वानरायत्वैषतेयोनिर्व्वैश्वानरायत्वा ॥ ७ ॥ व्वैश्वानरो-
नऽऊतयऽआप्प्रयातुपरावतः । अग्निरुक्क्थेनव्वाहसा । उपया-
मगृहीतोसिव्वैश्वानरायत्वैषतेयोनिर्व्वैश्वानरायत्वा ॥ ८ ॥
अग्निर्ऋषिःपवमानःपाञ्चजन्न्यःपुरोहितः । तमीमहेमहागयम् ।

उपयामगृहीतोस्यग्ग्नयेँत्वाव्वर्चसऽएषतेयोनिरग्ग्नयेँत्वाव्वर्च्चँसे ॥ ९ ॥
महाँ२ऽइन्द्रोव्वज्रहस्तꣳषोडशीशर्म्मँयच्छतु । हन्तुपाप्मानंय्योस्मान्द्वेष्टि । उपयामगृहीतोसिमहेन्द्रायत्वैषतेयोनिर्म्महेन्द्रायत्वा
॥ १० ॥ तंव्वोदस्ममृतीषहंव्वसोर्म्मन्दानमन्धसꣳ । अभिवत्सन्न-
स्वसरेषुधेनवऽइन्द्रङ्गीर्ब्भिर्न्नँवामहे ॥ ११ ॥ यद्वाहिष्ठन्तदग्ग्नयेवृह-
दर्च्चविभावसो । महिषीवत्वद्रयिस्त्वद्वाजाऽउदीरते ॥ १२ ॥
एह्यूषुब्रवाणितेग्ग्नऽइत्थेतरागिरः । एभिर्व्वर्धासऽइन्दुभिः
॥ १३ ॥ ऋतवस्तेयज्ञंव्वितन्न्वन्तुमासारक्षन्तुतेहविः । संव्वत्सर-
स्तेयज्ञन्दधातुनःप्रजाञ्चपरिपातुनः ॥ १४ ॥ उपह्वरेगिरीणाꣳसङ्ग-

मेचन्नदीनाम् । धियाव्विप्प्रोऽअजायत ॥ १५ ॥ उच्चातेजातमन्धसो
दिविसद्भूम्म्याददे । उग्ग्रᳫं शर्म्ममहिश्श्रवः ॥ १६ ॥ सनऽइन्द्राय
यज्ज्यवेव्वरुणायमरुद्भ्यः । व्वरिवोवित्परिस्स्रव ॥ १७ ॥ एनाव्वि-
श्श्वान्न्यर्य्यऽआद्युम्म्नानिमानुषाणाम् । सिषासन्तोव्वनामहे ॥ १८ ॥
अनुव्वीरैरनुपुष्ष्यास्म्मगोभिरन्न्वश्श्वैरनुसर्व्वेणपुष्टैः । अनुद्द्विपदा-
नुचतुष्ष्पदाव्वयन्देवानोयज्ञमृतुथानयन्तु ॥ १९ ॥ अग्ग्नेपत्क्नी-
रिहावहदेवानामुशतीरुप । त्वष्टारᳫं सोमपीतये ॥ २० ॥ अभियज्ञङ्गृ-
णीहिनोग्ग्नावोनेष्टःपिबऽऋतुना । त्वᳫं हिरत्क्नधाऽअसि ॥ २१ ॥
द्रविणोदाःपिपीषतिजुहोतप्प्रचतिष्ठत । नेष्ट्रादृतुभिरिष्ष्यत ॥२२॥

तवायꣳसोमस्त्वमेह्यर्वाङ्शश्वत्तमꣳसुमनाऽअस्यपाहि । अस्मिम-
न्न्यज्ञेबर्हिष्ष्यानिषद्द्यादधिष्ष्वेमञ्जठरऽइन्दुमिन्द्र ॥ २३ ॥ अमेवनꣳ
सुहवाऽआहिगन्तंननिबर्हिषिंसदतनारणिष्टन । अथामन्दस्वजुजुषा-
णोऽअन्धसस्त्वष्टर्द्देवेभिर्ज्जनिभिꣳसुमद्गणꣳ ॥ २४ ॥ स्वादिष्ठया-
मदिष्ठयापवस्वसोमधारया । इन्द्रायपातवेसुतः ॥ २५ ॥ रक्षोहा-
व्विश्श्वचर्षणिरभियोनिमयोहते । द्रोणेसधस्थमासदत् ॥ २६ ॥

इति संहितायां षड्विंशतितमोऽध्यायः ।

❀ अथ सप्तविंशोऽध्यायः ❀

ॐ समास्त्वाग्नऽऋतवोव्वद्‌र्द्धयन्तुसंव्वत्सराऽऋषयोयानिसत्या ।
सन्दिव्व्येनदीदिहिरोचनेनव्विश्श्वाऽआभाहिप्प्रदिशश्श्चतस्रः ॥ १ ॥
सञ्चेद्ध्यस्वाग्नेप्प्रचबोधयैनमुच्चतिष्ठमहतेसौभगाय । माचरिषदुप-
सत्तातेऽअग्नेब्ब्रह्माणस्तेयशसः सन्तुमान्न्ये ॥ २ ॥ त्वामग्नेव्वृण
तेब्ब्राह्मणाऽइमेशिवोऽअग्नेसंव्वरणेभवानः । सपत्नहानोऽअभिमा
तिजिच्चस्वेगयेजागृह्यप्प्रयुच्छन् ॥ ३ ॥ इहैवाग्नेऽअधिधारयारयिम्मा-
त्वानिक्कत्रन्न्पूर्व्वचितोनिकारिणः । क्षत्रमग्नेसुयममस्तुतुब्भ्यमुपस-

त्त्वान्दूद्वंतान्तेऽअनिष्टृतः ॥ ४ ॥ क्षत्रेणाग्ग्नेस्वायुःसᳪरभस्वमित्रेणा-
ग्ग्नेमित्रधेयेयतस्व । सजातानाम्मद्ध्यमस्थाऽएधिराज्ञामग्ग्नेव्विह-
व्योदीदिहीह ॥ ५ ॥ अतिनिहोअतिस्त्रिधोत्यचित्तिमत्यरातिमग्ग्ने ।
व्विश्श्वाह्यग्ग्नेदुरितासहस्वाथास्म्मभ्यᳪसहवीराᳪरयिन्दाः ॥ ६ ॥
अनाधृष्ष्योजातवेदाऽनिष्टृतोव्विराडग्ग्नेक्षत्रभृद्दीदिहीह । विश्श्वा-
ऽऽआशाःप्प्रमुञ्चन्मानुषीर्ब्भियःशिवेभिरद्द्यपरिपाहिनोव्वृधे ॥ ७ ॥
बृहस्प्पतेसवितर्ब्बोधयैनᳪसᳪशितञ्चित्सन्तराᳪसᳪशिशाधि । व्व-
र्द्धयैनम्महतेसौभगायव्विश्श्वऽएनमनुमदन्तुदेवाः ॥ ८ ॥ अमुत्रभूया-
दधयद्द्यमस्यबृहस्प्पतेऽअभिशस्तेरमुञ्चः । प्रत्यौहतामश्श्विनामृत्यु-

मंस्म्माद्देवानांमग्नेभिषजाशचीभिः ॥ ९ ॥ उदुद्वयन्तमंसस्प्परिस्वुः
पश्यन्तऽउत्तरम् । देवन्देवत्राासूर्य्यमगंन्मज्ज्योतिरुत्तमम् ॥१०॥ ऊ-
र्द्ध्वाऽअंस्यसमिधोभवन्त्यूर्द्ध्वाशुक्क्राशोचीॅष्ष्यग्नेः । द्युमत्तमासुप्प्र-
तींकस्यसूनोः ॥११॥ तनूनपादसुरोव्विश्श्ववेदादेवोदेवेषुदेवः । पथोऽ-
ऽअंनक्तुमद्र्ध्वाघृतेनं ॥१२॥ मद्र्ध्वायज्ञन्नंक्षसेप्प्रीणानोनराशङ्सोऽ-
अग्ने । सुकृद्देवःसंविताव्विश्श्ववारः ॥१३॥ अच्छायमेंतिशवसाघृतेनें-
डानोव्वह्निर्न्नमंसा । अग्निॅस्रुवोऽअद्र्ध्वरेषुप्प्रयत्सु ॥१४॥ सर्यक्षद-
स्यमहिमानंमग्नेःसऽईम्मन्द्रासुप्प्रयसः । व्वसुश्श्चेतिंष्ठोव्वसुधातमश्च
॥१५॥ द्वारोदेवीरन्न्वंस्यव्विश्श्वेव्व्रतादंदन्तेऽअग्ग्नेः । उरुव्व्यचंसोधा-

म्म्नापत्यमानाः ॥१६॥ तेऽअस्यय्योषणेदिव्व्येनय्योऽनांउषासानक्ता ।
इमंय्यज्ञमंवतामद्ध्वरन्नं ॥ १७॥ दैव्व्याहोताराऽऊर्द्ध्वमंद्ध्वरन्नोग्ग्ने-
र्ज्जिह्वामभिगृणीतम् । कृणुतन्नः स्विष्टिम् ॥ १८ ॥ तिस्रोदेवीर्ब्बर्हिरे-
दꣳ सदन्त्विडासरस्वतीभारती । महीगृणाना ॥ १९ ॥ तन्नस्तुरीपम-
द्भुतम्पुरुक्षुत्वष्टासुवीर्य्यम् । रायस्पोषंव्विष्ष्यतुनाभिमस्म्मे ॥२०॥
व्वनस्पतेवसृजाररांणस्त्मनांदेवेषु । अग्निर्हव्व्यꣳ शमितासूदयाति
॥२१॥ अग्नेस्वाहाकृणुहिजातवेदऽइन्द्रायहव्व्यम् । व्विश्श्वेदेवाहविरि-
दञ्जुषन्ताम् ॥ २२ ॥ पीवोऽअन्नारयिवृधः सुमेधाः श्वेतः सिषक्तिक्त-
नियुतामभिश्श्रीः । तेव्वायवेसमनसोव्वितस्त्थुर्व्विश्शवेन्नरः स्वप-

त्यानिचक्रुः ॥ २३ ॥ रायेनुयञ्जज्ञतूरोदसीमेरायेदेवीधिषणाधाति
देवम् । अधंव्वायुन्नियुतःसश्चतस्वाऽउतश्श्वेतंव्वसुधितिन्निरेके
॥ २४ ॥ आपोहयद्बृहतीर्व्विश्वमायन्गर्भन्दधानाजनयन्तीरग्निम् ।
ततोदेवानाꣳसमवर्त्ततासुरेकःकस्मैदेवायहविषाव्विधेम ॥ २५ ॥
यश्चिदापोमहिनापर्य्यपश्यद्दक्षन्दधानाजनयन्तीर्य्यज्ञम् । योदेवेष्ष्व-
धिदेवऽएकऽआसीत्कस्मैदेवायहविषाव्विधेम ॥ २६ ॥ प्रयाभिर्य्या-
सिदाश्श्वाꣳसमच्छानियुद्भिर्व्वायविष्टयेदुरोणे । निनोरयिꣳसुभो-
जसंय्युवस्वनिवीरङ्गव्व्यमश्श्व्यञ्चराधः ॥ २७ ॥ आनोनियुद्भिः
शतिनीभिरद्ध्वरꣳसहस्रिणीभिरुपयाहियज्ञम् । व्वायोऽअस्म्मिन्त्स-

वंनेमादयस्वषूयम्पातस्वस्तिभिंःसदानः ॥ २८ ॥ नियुत्वान्वायवाग-
ह्ययंशुक्रोऽअयामिते । गन्तासिसुन्वतोगृहम् ॥ २९ ॥ वायो-
शुक्रोऽअयामितेमदूध्वोऽअग्रन्दिविष्टिषु । आयाहिसोमपीतयेस्पा-
र्होदेवनियुत्वता ॥ ३० ॥ वायुरग्रेगायज्ञप्रीःसाकङ्गन्मनसायज्ञम् ।
शिवोनियुद्भिः शिवाभिः ॥ ३१ ॥ वायोयेतेसहस्त्रिणोरथासः-
स्तेभिरागहि । नियुत्वान्त्सोमपीतये ॥ ३२ ॥ एकयाचदशभिश्चस्व-
भूतेद्वाभ्यामिष्टयेविंशतीच । तिसृभिश्चवहसेत्रिंशताच-
नियुद्भिर्वायविहताविमुञ्च ॥ ३३ ॥ तववायवृतस्पतेत्वष्टुर्ज्जा-
मातरद्भुत । अवांस्यावृणीमहे ॥ ३४ ॥ अभित्वाशूरनोनुमोदुग्धा-

ऽइवधेनवः । ईशानमस्यजगतःस्वर्दृशमीशानमिन्द्रतस्थुषः ॥३५॥
नत्वावाँ २ ऽअन्न्योदिव्व्योनपार्थिवोनजातोनजनिष्ष्यते । अश्श्वा-
यन्तोमघवन्निन्द्रव्वाजिनोगव्व्यन्तस्त्वाहवामहे ॥ ३६ ॥ त्वामिद्धि-
हवामहेसातौव्वाजस्यकारवः । त्वांव्वृत्रेष्ष्विन्द्रसत्पतिन्नरस्त्वाङ्का-
ष्ठास्वर्व्वतः ॥ ३७ ॥ सत्वन्नश्चित्रव्वज्ज्रहस्तधृष्ष्णुयामहस्तवानो
ऽअद्रिवः । गामश्श्वःरत्थ्यमिन्द्रसङ्किरसत्राव्वाजन्नजिग्ग्युषे ॥३८॥
कयानश्चित्रऽआभुवदूतीसदावृधःसखा । कयाशचिष्ठयाव्वृता ॥३९॥
कस्त्वासत्योमदानाम्मःहिष्ठोमत्सदन्धसः । दृढाचिदारुजेव्वसु ॥४०॥
अभीषुणःसखीनामविताजरितृणाम् । शतम्भवास्यूतये ॥ ४१ ॥

सञ्ज्ञायंज्ञावोऽअग्नयेंगिरागिराचदक्षसे । प्रप्प्रंवयमम्मृतञ्ञातवेदसम्प्रियम्मित्रन्नशंᳫसिषम् ॥४२॥ पाहिनोऽअग्नऽएकयापाह्युतद्वितीययां । पाहिगीर्ब्भिस्तिसृभिरूर्ज्जाम्पतेपाहिचंतसृभिर्व्वसो ॥ ४३ ॥ ऊर्ज्जोनपांतᳫसहिनायमस्म्मयुर्द्दाशेमहव्यदातये । भुवद्वाजेष्ष्वविताभुवद्वृधऽउतत्रातातनूनाम् ॥ ४४ ॥ संव्वत्सरोसिपरिवत्सरोसीदावत्सरोसीद्वत्सरोसिव्वत्सरोसि । उषसंस्तेकल्प्पन्तामहोरात्रास्तेकल्प्पन्तामर्द्धमासास्तेकल्प्पन्ताम्मासास्तेकल्प्पन्तामृतवस्तेकल्प्पन्ता ᳫ संव्वत्सरस्तेकल्प्पताम् । प्रेत्याऽएत्यैसञ्चाञ्चप्प्रचसारय । सुपर्ण्णचिदसितयादेवतयाङ्गिरस्वद्ध्रुवःसीद ॥ ४५ ॥

इति संहितायां सप्तविंशोऽध्यायः ।

ॐ अथ अष्टाविंशतितमोऽध्यायः ॐ

होता यक्षत्समिधेन्द्रमिडस्पदे नाभा पृथिव्व्या ऽअधि । दिवो व्वर्ष्मन्-
त्समिध्यत ऽओजिष्ठश्चर्षणीसहां व्वेत्वाज्ज्यस्य होतर्य्यज ॥ १ ॥
होता यक्षत्तनूनपातमूतिभिर्ज्जेतारमपराजितम् । इन्द्रं देवꣳ स्वर्विदं-
म्पथिभिर्म्मधुमत्तमैर्न्नराशꣳसेन तेजसा व्वेत्वाज्ज्यस्य होतर्य्यज ॥ २ ॥
होता यक्षदिडाभिरिन्द्रमीडितमाजुह्वानममर्त्यम् । देवो देवैः सवी-
र्य्यो व्वज्ज्रहस्तः पुरन्दरो व्वेत्वाज्ज्यस्य होतर्य्यज ॥ ३ ॥ होता यक्ष-
द्बर्हिषीन्द्रन्निषद्वरं वृषभन्नर्य्यापसम् । वसुभी रुद्रैरादित्यैः स-

युग्भिर्व्वर्हिरासंददद्द्वेत्वाज्ज्यस्यहोतर्य्यज ॥ ४ ॥ होतायक्षद्दोजोन-
व्वीर्य्यᳬसहोदद्वारऽइन्द्रमवर्द्धयन् । सुप्रायणाऽअस्मिन्न्यज्ञेवि-
श्रयन्तामृतावृधोदद्वारऽइन्द्रायमीढुषेव्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ५ ॥
होतायक्षदुषेऽइन्द्रस्यधेनूसुदुघेमातरामही । सवातरौनतेजसाव्वत्स-
मिन्द्रमवर्द्धतांव्वीतामाज्ज्यस्यहोतर्य्यज ॥ ६ ॥ होतायक्षद्दैव्व्याहोतारा
भिषजासखायाहविषेन्द्रम्भिषज्ज्यतᳬ । कवीदेवौप्प्रचेतसाविन्द्रायध-
त्तऽइन्द्रियंव्वीतामाज्ज्यस्यहोतर्य्यज ॥ ७ ॥ होतायक्षत्तिस्रोदेवीर्न्नभेष-
जन्त्रयस्त्रिधातवोपसऽइडासरस्वतीभारतीमहीः । इन्द्रपत्नीर्हविष्म्म-
तीव्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ८ ॥ होतायक्षत्त्वष्टारमिन्द्रन्देवम्भि-

षजᳪसुयजङ्घृतश्रियम् । पुरुरूपᳪसुरेतसम्मघोनमिन्द्रायत्वष्टा-
दधदिन्द्रियाणिव्वेत्वाज्ज्यस्यहोतर्य्यज ॥ ९ ॥ होतायक्षद्वनस्प-
तिᳪशमितारᳪशतक्क्रतुन्धियोजोष्टारमिन्द्रियम् । मद्ध्वासमञ्ज-
न्पथिभिः सुगेभिःस्वदातियज्ञम्मधुनाघृतेनव्वेत्वाज्ज्यस्यहोतर्य्यज
॥ १० ॥ होतायक्षदिन्द्रᳪस्वाहाज्ज्यस्यस्वाहामेदसःस्वाहास्तोका-
नाᳪस्वाहास्वाहाकृतीनाᳪस्वाहाहव्यसूक्तीनाम् । स्वाहादेवाऽ-
आज्ज्यपाजुषाणाऽइन्द्रऽआज्ज्यस्यव्यन्तुहोतर्य्यज ॥ ११ ॥ देवम्ब-
र्हिरिन्द्रᳪसुदेवन्देवैर्व्वीरवत्स्तीर्णव्वेद्यामवर्द्धयत् । व्वस्तोर्व्वृतम्प्रा-
क्तोब्भृतᳪरायाबर्हिष्म्मतोत्यगाद्वसुवनेव्वसुधेयस्यव्वेतुयज ॥ १२ ॥

देवीद्द्वारऽइन्द्रꣳसङ्घातेव्वीड्वीर्य्यामन्नवर्द्धयन् । आवत्सेनतरुणे-
नकुमारेणचमीवतापार्व्वाणꣳरेणुकंकाटन्नुदन्तांव्वसुवनेव्वसुधेयस्यव्य-
न्तुयज ॥ १३ ॥ देवीऽउषासानक्तेन्द्रंय्यज्ञेप्प्रयत्यह्व्वेताम् ।
दैवीर्व्विशꣳप्प्रायासिष्टाꣳसुप्प्रीतेसुधितेव्वसुव्वनेव्वसुधेयस्यव्वीतांय्यज
॥ १४ ॥ देवीजोष्ट्रीव्वसुधितीदेवमिन्द्रमवर्द्धताम् । अयाव्य-
न्न्याघाद्द्वेषाꣳस्यान्न्यावक्षद्वसुवार्य्याणियजमानायशिक्षितेव्वसुवने
व्वसुधेयस्यव्वीतांय्यज ॥ १५ ॥ देवीऽऊर्ज्जाहुतीदुघेसुदुघेपयसे-
न्द्रमवर्द्धताम् । इषमूर्ज्जमन्न्यावक्षत्सग्ग्धꣳसपीतिमन्न्यानवेनपूर्व्व-
न्दयमानेपुराणेननवमधातामूर्ज्जमूर्ज्जाहुतीऽऊर्ज्जयमानेव्वसुव्वार्य्याणि

यजमानायशिक्षितेव्वसुवनेव्वसुधेयस्यव्वीतांऽयज ॥ १६ ॥ देवा
दैव्याहोतारादेवमिन्द्रमवर्द्धताम् । हताघशᳪसावाभाष्टाँव्वसुव्वा-
र्य्याणियजमानायशिक्षितौव्वसुवनेव्वसुधेयस्यव्वीताᳪयज ॥ १७ ॥
देवीस्तिस्रस्तिस्रोदेवीःपतिमिन्द्रमवर्द्धयन् । अस्पृक्षद्भारतीदिवᳪ
रुद्रैर्य्यज्ञᳪ सरस्वतीडाव्वसुमतीगृहान्न्वसुवनेव्वसुधेयस्यव्यन्तुयज
॥ १८ ॥ देवऽइन्द्रोनराशᳪसस्त्रिवरूथस्त्रिवन्धुरोदेवमिन्द्रमवर्द्धयत् ।
शतेनशितिपृष्ठानामाहितᳪसहस्रेणप्रवर्त्ततेमित्रावरुणेदस्यहोत्रमर्हतो
बृहस्पतिस्तोत्रमश्श्विनाद्ध्वर्य्यवंव्वसुवनेव्वसुधेयस्यव्वेतुयज ॥ १९ ॥
देवोदेवैर्व्वनस्पतिर्हिरण्यपर्णोमधुशाखः सुपिप्पलोदेवमिन्द्रमवर्द्ध-

यत् । दिवमग्ग्रेणास्पृक्षदान्तरिक्षम्पृथिवीमदृᳬहीद्द्वसुवनेव्वसुधेयं-
स्यव्वेतुयजं ॥ २० ॥ देवम्बर्हिर्व्वारितीनान्देवमिन्द्रमवर्द्धयत् ।
स्वासस्थमिन्द्रेणासन्नमन्न्यावर्हीᳬ ष्यभ्यभूद्द्वसुवनेव्वसुधेयस्यव्वेतु
यजं ॥ २१ ॥ देवोऽअग्निऽस्विष्टकृद्देवमिन्द्रमवर्द्धयत् । स्विष्टङ्कु
र्व्वन्त्स्विष्टकृत्स्विष्टमद्यकरोतुनोव्वसुवनेव्वसुधेयस्यव्वेतुयजं ॥ २२ ॥
अग्निमद्यहोतारमवृणीतायंय्यजमानᳬपचन्पक्तीᳬपचन्पुरोडाशम्ब
ध्नन्निन्द्रायच्छागम् । सूपस्थाऽअद्यदेवोव्वनस्पतिरभवदिन्द्राय
च्छागेन । अघत्तम्मेदस्तः प्प्रतिपचताग्ग्रभीदवीवृधत्पुरोडाशेन ।

त्वामद्यऽऋषे[1] ॥ २३ ॥ होतायक्षत्समिधानम्महद्यशः सुसमिद्धं
वरेण्यमग्निमिन्द्रं वयोधसम् । गायत्रीञ्छन्दऽइन्द्रियन्त्र्यविङ्गां वयोदध-
द्वेत्वाज्यस्य होतर्यज ॥ २४ ॥ होतायक्षत्तनूनपातमुद्भिदं यङ्ग-
र्भमदितिर्दधे शुचिमिन्द्रं वयोधसम् । उष्णिहञ्छन्दऽइन्द्रियन्दित्यवा-
हङ्गां वयोदधद्वेत्वाज्यस्य होतर्यज ॥ २५ ॥ होतायक्षदीडेन्यमी-
डितं वृत्रहन्तममिडाभिरीड्यꣳ सहः सोममिन्द्रं वयोधसम् । अनुष्टु-
भञ्छन्दऽइन्द्रियम्पञ्चाविङ्गां वयोदधद्वेत्वाज्यस्य होतर्यज ॥ २६ ॥
होतायक्षत्सुबर्हिषम्पूषण्वन्तममर्त्यꣳ सीदन्तम्बर्हिषि प्रियेऽमृतेन्द्रं वयो-

१. त्वामद्यऽऋषऽआर्षेय० (अ० २१ म० ६१)

धसम् । बृहतीञ्छन्दऽइन्द्रियन्त्रिवत्सङ्गांव्वयोदधद्वेत्वाज्ज्यस्यहोत-
र्य्यज ॥ २७ ॥ होतायक्षद्व्यचस्वतीःसुप्रायणाऽऋतावृधोद्वारोदेवी-
र्हिरण्ययीर्ब्रह्माणमिन्द्रंव्वयोधसम् । पङ्क्तिञ्छन्दऽइहेन्द्रियन्तुर्य्य-
वाहङ्गांव्वयोदधद्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ २८ ॥ होतायक्षत्सुपेश-
सासुशिल्पेबृहतीऽउभेनक्तोषासानदर्शतेव्विश्वमिन्द्रंव्वयोधसम् ।
त्रिष्टुभञ्छन्दऽइहेन्द्रियम्पष्ठवाहङ्गांव्वयोदधद्वीतामाज्ज्यस्यहोत-
र्य्यज ॥ २९ ॥ होतायक्षत्प्रचेतसादेवानामुत्तमंय्यशोहोतारादैव्या
कवीसयुजेन्द्रंव्वयोधसम् । जगतीञ्छन्दऽइन्द्रियमनड्वाहङ्गांव्वयोद-
धद्वीतामाज्ज्यस्यहोतर्य्यज ॥ ३० ॥ होतायक्षत्पेशस्वतीस्तिस्रो

देवीर्हिरण्ययीर्भारतीर्बृहतीर्म्महीःपतिमिन्द्रंव्वयोधसम् । विरा-
जञ्छन्दऽइहेन्द्रियन्धेनुङ्गान्नव्वयोदधद्व्यन्त्वाज्ज्यस्यहोतर्य्यज ॥ ३१ ॥
होतायक्षत्सुरेतसन्त्वष्टारम्पुष्टिवर्द्धनꣳ रूपाणिबिभ्रतम्पृथक्पुष्टि-
मिन्द्रंव्वयोधसम् । द्विपदञ्छन्दऽइन्द्रियमुक्षाणङ्गान्नव्वयोदधद्वे-
त्वाज्ज्यस्यहोतर्य्यज ॥ ३२ ॥ होतायक्षद्वनस्पतिꣳ शमितारꣳ शत-
क्रतुꣳ हिरण्ययपर्णमुक्थिनꣳ रशनाम्बिभ्रतंव्वशिम्भगमिन्द्रंव्वयोध-
सम् । ककुभञ्छन्दऽइहेन्द्रियंव्वशांव्वेहतङ्गांव्वयोदधद्वेत्वाज्ज्यस्य
होतर्य्यज ॥ ३३ ॥ होतायक्षत्स्वाहाकृतीरग्निङ्गृहपतिम्पृथग्वरुणम्भे-
षजङ्कविङ्क्षत्रमिन्द्रंव्वयोधसम् । अतिच्छन्दसञ्छन्दऽइन्द्रियम्बृहदृषभ-

ज्ञांव्वयो दधद्व्यन्त्वाज्ज्यस्य होतर्ष्यज ॥ ३४ ॥ देवम्बर्हिर्व्वयोधसन्दे-
वमिन्द्रमवर्द्धयत् । गायत्र्याच्छन्दसेन्द्रियञ्चक्षुरिन्द्रे व्वयो दधद्द्वसु-
वनेव्वसुधेयस्य व्वेतु यज ॥ ३५ ॥ देवीर्द्वारो व्वयोधसꣳ शुचिमिन्द्र-
मवर्द्धयन् । उष्णिहाच्छन्दसेन्द्रियम्प्राणमिन्द्रे व्वयो दधद्द्वसुवने व्व-
सुधेयस्य व्यन्तु यज ॥ ३६ ॥ देवीऽउषासानक्त्ता देवमिन्द्रं व्वयोधस-
न्देवी देवमवर्द्धताम् । अनुष्टुभाच्छन्दसेन्द्रियम्बलमिन्द्रे व्वयो दधद्द्व-
सुवने व्वसुधेयस्य व्वीतां यज ॥ ३७ ॥ देवी जोष्ट्री व्वसुधिती देवमि-
न्द्रं व्वयोधसन्देवी देवमवर्द्धताम् । बृहत्याच्छन्दसेन्द्रियꣳ श्रोत्रमिन्द्रे
व्वयो दधद्द्वसुवने व्वसुधेयस्य व्वीतां यज ॥ ३८ ॥ देवीऽऊर्ज्जाहुती

दुघेसुदुघेपयसेन्द्रंव्वयोधसन्देवीदेवमवर्द्धताम् । पङ्क्त्याच्छन्दसेन्द्रि-
यꣳशुक्रमिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयस्यव्वीतांऽयज ॥ ३९ ॥
देवादैव्व्याहोतारादेवमिन्द्रंव्वयोधसन्देवौदेवमवर्द्धताम् । त्रिष्टु-
भाच्छन्दसेन्द्रियंत्विषिमिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयस्यव्वीतांऽयज
॥ ४० ॥ देवीस्तिस्रस्तिस्रोदेवीर्व्वयोधसम्पतिमिन्द्रमवर्द्धयन् ।
जगत्याच्छन्दसेन्द्रियꣳशूषमिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयस्यव्व्यन्तु
यज ॥ ४१ ॥ देवोनराशꣳसोदेवमिन्द्रंव्वयोधसन्देवोदेवमवर्द्धयत् ।
व्विराजाच्छन्दसेन्द्रियꣳरूपमिन्द्रेव्वयोदधद्वसुवनेव्वसुधेयस्यव्वेतुयज
॥ ४२ ॥ देवोव्वनस्पतिर्देवमिन्द्रंव्वयोधसन्देवोदेवमवर्द्धयत् । द्वि-

पदाच्छन्दसेन्द्रियम्भगमिन्द्रे व्वयोदधद्वसुवने व्वसुधेयस्य व्वेतुयज
॥ ४३ ॥ देवम्बर्हिर्व्वारितीनान्देवमिन्द्रं व्वयोधसन्देवंदेवमवर्द्धयत् ।
ककुभाच्छन्दसेन्द्रियंयशऽइन्द्रे व्वयोदधद्वसुवने व्वसुधेयस्य व्वेतुयज
॥ ४४ ॥ देवोऽअग्निः स्विष्टकृद्देवमिन्द्रं व्वयोधसन्देवोदेवमवर्द्धयत् ।
अतिच्छन्दसाच्छन्दसेन्द्रियङ्क्षत्रमिन्द्रे व्वयोदधद्वसुवने व्वसुधेयस्य व्वे-
तुयज ॥ ४५ ॥ अग्निमद्यहोतारमवृणीतायंयजमानः पचन्पक्तीः प-
चन्पुरोडाशम्बध्नन्निन्द्राय व्वयोधसेच्छागम् । सूपस्थाऽअद्यदेवो
व्वनस्पतिरभवदिन्द्राय व्वयोधसेच्छागेन । अघत्तम्मेदस्तः प्रतिपच-

ताग्ग्रभीदर्वीवृधत्पुरोडाशेन । त्वामुद्यऽऋषे[1] ॥४६॥ इति संहितायां अष्टाविंशोऽध्यायः ।

❀ अथ एकोनत्रिंशोऽध्यायः ❀

ॐ समिद्धोऽअञ्जन्कृदरम्मतीनाङ्घृतमग्नेमधुमत्पिन्वमानः । व्वाजीवहन्न्वाजिनञ्जातवेदोदेवानाँव्वक्षिप्प्रियमासधस्त्थम् ॥ १ ॥ घृतेनाञ्जन्त्सम्पथोदेवयानान्प्रजानन्न्वाज्ज्यप्येतुदेवान् । अनुत्वासप्ते प्प्रदिशः सचन्ताᳪस्वधामस्म्मैयजमानायधेहि ॥ २ ॥ ईड्यश्चा-

---

१. त्वामद्यऽ ऋषऽ आर्षेय (ऋ० अ० २१ म० ६१)।

सि॒ञ्चन्त्य॑श्च॒च्चाजि॑न्नाशुश्चासि॒मेद्ध्य॑श्च॒सप्त॑ते । अ॒ग्निष्ट्वा॑दे॒वैर्व्व॒सु॑भि॑ᳬ
स॒जोषा॑ᳬप्प्री॒तंव्व॑न्हि॑र्व्वहतुजा॒तवे॑दाः ॥ ३ ॥ स्ती॒र्ण॑म्ब॒र्हि॒ः सु॒ष्टरी॑-
माजुषा॒णोरुपृ॒थुप्प्रथ॑मानम्पृथि॒व्याम् । दे॒वेभि॑र्युक्तमदि॑ति॒ᳬस॒जोषा॑ः
स्यो॒नङ्कृ॒ण्वा॒नासु॑वि॒तेद॑धातु ॥ ४ ॥ ए॒ताऽउ॑वᳬसु॒भगा॑व्वि॒श्वरू॑पा
व्विप॒क्षोभि॒ᳬश्रय॑मा॒णाऽउद्रा॑तैः । ऋ॒ष्वाः स॒तीः क॒वषᳬशुम्भ॑माना॒
द्वारो॑दे॒वीः सु॒प्प्राय॒णाभ॑वन्तु ॥ ५ ॥ अ॒न्तरा॑मि॒त्रावरु॑णा॒चर॑न्ती॒मुखं॑
य॒ज्ञाना॑म॒भिसं॑व्विदा॒ने । उ॒षासा॑वाᳬसु॒हि॒र॒ण्ये॒सु॑शि॒ल्पेऽऋ॒तस्य॒
योना॑वि॒हसा॑दयामि ॥ ६ ॥ प्र॒थमा॑वाᳬस॒र॒थिना॑सु॒वर्णा॑दे॒वौपश्य॑-
न्तौ॒भुव॑नानि॒व्विश्वा॑ । अपि॑प्प्रय॒ञ्चोद॑ना॒वाम्मिमा॑नाहोता॑रा॒ज्ज्यो-

तिं꣡ प्प्रदिशा꣡दिशन्ता꣡ ॥ ७ ॥ आ꣡दित्यैर्नो꣡ भार꣡ती व्वष्टु यज्ञꣳ꣡ सर꣡स्वती
सहरुद्रैर्न꣡ऽआवीत् । इडोप꣡हूता व्वसु꣡भिः सजोषा꣡ यज्ञन्नो꣡ देवीरमृतेषु
धत्त ॥ ८ ॥ त्वष्टा꣡रं व्वीरन्देवका꣡मञ्जजानत्त्वष्टुरर्वा꣡ जायतऽआशु-
रश्वः꣡ । त्वष्टे꣡दं꣡ व्विश्वम्भुव꣡नञ्जजान ब्बहोः꣡ कर्ता꣡रमिह꣡ यक्षि होतः
॥ ९ ॥ अश्वो꣡ घृतेन त्त्मन्या꣡ सम꣡क्तऽउप꣡ देवाँ꣡२ऽऋतुशः꣡ पाथ꣡ऽएतु ।
व्वनस्पति꣡र्देवलोकम्प्र꣡जानन्नग्निना꣡ हव्या꣡ स्वदि꣡तानि꣡ व्वक्षत् ॥ १० ॥
प्रजाप꣡तेस्तप꣡सा व्वावृधानः꣡ सद्यो꣡ जातो꣡ दधिषे यज्ञम꣡ग्ने । स्वाहा꣡कृतेन
हविषा꣡ पुरोगा꣡ याहि साध्या꣡ हविर꣡दन्तु देवाः꣡ ॥ ११ ॥ यदक्र꣡न्दः
प्प्रथमञ्जाय꣡मानऽउद्यन्त्स꣡मुद्राद्रुत वा꣡ पुरी꣡षात् । श्येनस्य꣡ पक्षा꣡ हरि-

णस्यंबाहूऽउपस्तुत्यम्महिजातन्तेऽअर्व्वन् ॥ १२ ॥ यमेनदत्तन्त्रित
ऽएनमायुनगिन्द्रऽएणम्प्रथमोऽअद्ध्यतिष्ठत् । गन्धर्व्वोऽअस्यरशना
मंगृभ्णात्सूरादश्वंव्वसवोनिरतष्ट ॥ १३ ॥ असियमोऽअस्यादित्यो
ऽअर्व्वन्नसित्रितोगुह्येनव्व्रतेन । असिसोमेनसमयाविपृक्तआहुस्ते
त्रीणिदिविबन्धनानि ॥ १४ ॥ त्रीणितऽआहुर्दिविबन्धनानित्रीण्यप्सु
त्रीण्यन्तःसमुद्रे । उतेवमेव्वरुणश्छन्त्स्यर्व्वन्न्यत्रातऽआहुःपरमञ्ज
नित्रम् ॥ १५ ॥ इमातेव्वाजिन्नवमार्ज्जनानीमाशफानांᳫसनितुर्न्नि
धाना । अत्रातेभद्द्रारशनाऽअपश्यमृतस्ययाऽअभिरक्षन्तिगोपाः
॥ १६ ॥ आत्मानन्तेमनसारादजानामवोदिवापतयन्तम्पतङ्गम् । शि-

रोऽअपश्यन्पथिभिः सुगेभिरेणुभिर्जेहमानम्पतत्रि ॥ १७ ॥ अत्राते
रूपमुत्तममपश्यञ्जिगीषमाणमिषऽआपदेगोः । यदातेमर्त्तोऽअनुभोग-
मानडादिद्ग्रसिष्ठऽओषधीरजीगः ॥१८॥ अनुत्वारथोऽअनुमर्य्योऽअ-
र्व्वन्ननुगावोऽनुभगः कनीनाम् । अनुव्रातासस्तवसख्यमीयुरनुदेवा-
ममिरेव्वीर्य्यन्ते ॥१९॥ हिरण्यशृङ्गोयोऽअस्यपादामनोजवाऽअवरऽइ-
न्द्रऽआसीत् । देवाऽइदस्यहविरद्यमायन्योऽअर्व्वन्तम्प्रथमोऽअद्ध्यतिष्ठत्
॥ २० ॥ ईर्म्मान्तासः सिलिकमद्ध्यमासः सᳬशूरणासोदिव्यासोऽअ-
त्याः । हᳬसाऽइवश्रेणिशोयतन्तेयदाक्षिषुर्द्दिव्यमज्ममश्वाः
॥ २१ ॥ तवशरीरम्पतयिष्ण्वर्व्वन्तवचित्तंव्वातऽइवध्रजीमान् ।

तवश्रृङ्गाणिव्विष्ठिताषुरुत्राऽरंण्येषुजर्भुराणाचरन्ति ॥ २२ ॥ उप-
प्प्रागाच्छसनंव्वाज्ज्यव्वींदेवद्रीचामनंसादीद्ध्यांनः । अजःपुरोनी-
यतेनाभिरस्यानुपश्चात्कवयोयन्तिरेभाः ॥ २३ ॥ उपप्प्रागात्परमं
ष्वत्सधस्त्थमर्व्वां २ अच्छापितरंम्मातरंञ्च । अद्द्यादेवाञ्जु-
ष्टतमोहिगम्म्याऽऽअथाशांस्तेदाशुषेव्वार्य्याणि ॥ २४ ॥ समिद्धोऽ-
अद्द्यमनुषोदुरोणेदेवोदेवान्न्यंजसिजातवेदः । आचव्वहमित्रमह-
श्चिकित्वान्त्वन्दूतःकविरंसिप्प्रचेताः ॥ २५ ॥ तनूनपात्पथऽऋत-
स्ययानान्म्मद्ध्वासमञ्जन्त्स्वंदयासुजिह्व । मन्न्मांनिधीभिरुतय-
ज्ञमृन्धन्देवत्राचंकृणुह्यद्ध्वरन्नः ॥ २६ ॥ नराशःसंस्यमहिमानं-

मेषामुपस्तोषामयजतस्ययज्ञैः । येसुक्रतवःशुचयोधियन्धाःस्वद-
न्तिदेवाऽउभयानिहव्व्या ॥ २७ ॥ आजुह्वानऽईड्योव्वन्द्यश्चा-
याह्यग्नेव्वसुभिःसजोषाः । त्वन्देवानामसियह्वहोतासऽएना-
न्न्यक्षीषितोयजीयान् ॥ २८ ॥ प्राचीनम्बर्हिःप्प्रदिशापृथिव्याव्व-
स्तोरस्याव्वृज्ज्यतेऽअग्ग्रेऽअह्नाम् । व्व्युप्प्रथतेव्वितरंव्वरीयोदेवे-
भ्योऽअदितयेस्योनम् ॥ २९ ॥ व्व्यचस्वतीरुर्व्वियाव्विश्श्रयन्ता-
म्पतिब्भ्योनजनयःशुम्भमानाः । देवीर्द्वारोबृहतीर्व्विश्श्वमिन्वा-
देवेब्भ्योभवतसुप्प्रायणाः ॥ ३० ॥ आसुष्ष्वयन्तीयजतेऽउपाकेऽ
उषासानक्तासदतान्नियोनौ । दिव्व्येयोषणेबृहतीसुरुक्मेऽअधि-

श्श्रयं६ शुक्रक्रपिशन्दधाने ॥ ३१ ॥ दैव्याहोतारा प्रथमासुवाचामि-
मानायज्ञम्मनुषोयजंद्ध्यै । प्रचोदयंन्ताव्विदथेषुकारू प्राचीनञ्ज्यो-
तिं ÷ प्प्रदिशादिशन्ता ॥ ३२ ॥ आनोयज्ञम्भारंतीतूयंमेत्विडामनु-
ष्ष्वदिहचेतयंन्ती । तिस्रोदेवीर्ब्बर्हिरेद ꣳ स्योन ६ सरंस्वतीस्वपंसः
सदन्तु ॥ ३३ ॥ यऽइमेद्यावापृथिवीजनिंत्रीरूपैरपिं६ शद्भुवंनानि
व्विश्श्वा । तमद्यहोतरिषितोयजीयान्देवन्त्वष्टारमिहयंक्षिव्वि-
द्द्वान् ॥ ३४ ॥ उपावंसृजत्मन्न्यासमञ्जन्देवानाम्पाथंऽऋतुथाह-
वीꣳषि । व्वनस्प्पतिं ÷ शमितादेवोऽअग्निः स्वदंन्तुहव्व्यम्मधुना
घृतेनं ॥ ३५ ॥ सद्योजातोव्व्यंमिमीतयज्ञमग्निर्देवानामभवत्पुरोगाः ।

अस्यहोतुः प्रदिश्यृतस्य्वाचिस्वाहाकृतꣳहविरदन्तुदेवाः ॥ ३६ ॥
केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे । समुषद्भिरजायथाः ॥ ३७॥
जीमूतस्येवभवतिप्रतीकंयद्वर्म्मीयातिसमदामुपस्थे । अनावि-
द्धयातन्न्वाजयत्वꣳसत्वावर्म्मणोमहिमापिपर्त्तु ॥ ३८ ॥ धन्न्वना
गाधन्न्वनाजिञ्जयेमधन्न्वनातीव्राःसमदोजयेम । धनुःशत्रोरप-
कामङ्कृणोतिधन्न्वनासर्व्वाः प्रदिशोजयेम ॥ ३९ ॥ व्वक्ष्यन्ती
वेदागनीगन्तिकर्णम्प्रियꣳसखायम्परिषस्वजना । योषेवशिङ्क्तेव्वि-
तताधिधन्न्वञ्ज्याऽइयꣳसमनेपारयन्ती ॥ ४० ॥ तेऽआचरन्तीसमनेवयो-
षामातेवपुत्रम्बिभृतामुपस्थे । अपशत्रून्विद्ध्यताꣳसंविदानेऽआर्त्नी-

ऽइमेव्विष्फुरन्तीऽअमित्रान् ॥४१॥ बह्वीनाम्पिताबहुरस्यपुत्रश्चिश्चाकृ
णोतिसमनावगत्य ॥ इषुधिः सङ्काः पृतनाश्चसर्व्वाः पृष्ठेनिनद्धोजयति
प्प्रसूतः ॥४२॥ रथेतिष्ठन्नयतिव्वाजिनः पुरोयत्रयत्रकामयतेसुषारथिः ॥
अभीशूनाम्महिमानम्पनायतमनः पश्चादनुयच्छन्तिरश्मयः ॥४३॥
तीव्रान्घोषान्कृण्वतेवृषपाणयोश्वारथेभिः सहव्वाजयन्तः ॥
अवक्क्रामन्तः प्प्रपदैरमित्रान्क्षिणन्तिशत्रूँ१ रनपव्व्ययन्तः ॥४४॥
रथवाहनꣳ हविरस्यनामयत्रायुधन्निहितमस्यव्वर्म्म । तत्रारथमुप-
शग्मꣳ सदेमव्विश्वाहाव्वयꣳ सुमनस्यमानाः ॥४५॥ स्वादुषꣳस-
दः पितरोव्वयोधाः कृच्छ्रेश्रितः शक्तीवन्तोगभीराः । चित्रसेना

ऽइषुबलाऽअमृद्ध्राःसतोवीराऽउरवोव्रातसाहाः ॥ ४६ ॥ ब्राह्म-
णासःपितरःसोम्यासःशिवेनोद्यावापृथिवीऽअनेहसा । पूषान्नः
पातुदुरितादृतावृधोरक्षामाकिर्नोऽअघशंसईशत ॥ ४७ ॥ सुपर्ण्णं
व्वस्तेमृगोऽअस्यादन्तोगोभिःसन्नद्धापततिप्रसूता । यत्रानरःसञ्च
विचद्द्रवन्तितत्रास्मभ्यमिषवःशर्म्मयंसन् ॥ ४८ ॥ ऋजीतेपरि
वृङ्धिनोश्मा भवतुनस्तनूः । सोमोऽअधिब्रवीतुनोदितिःशर्म्मय-
च्छतु ॥ ४९ ॥ आजङ्घन्तिसान्वेषाञ्जघनाँ२उपजिघ्नते । अश्वाज-
निप्रचेतसोश्वान्त्समत्सुचोदय ॥ ५० ॥ अहिरिवभोगैःपर्य्येतिबाहु-
ञ्ज्यायाहेतिम्परिबाधमानः । हस्तघ्नोविश्वाव्वयुनानिविद्वान्पु-

मान्नुमां ॐ सम्परिपातुव्विश्श्वतं ÷ ॥ ५१ ॥ व्वनस्प्पतेव्वीड्वङ्ग-
ङ्गोहिभूयाऽअस्म्मत्सखाप्प्रतरणꣳसुवीरं÷ । गोभिꣳसन्नद्धोऽअसि
व्वीडयस्वास्त्थातातेंजयतुजेत्वानि ॥ ५२ ॥ दिवꣳपृथिव्व्याꣳपर्य्योज-
ऽउद्भृतंव्वनस्प्पतिब्भ्यꣳपर्य्याभृतꣳसहं ÷ । अपामोज्मानम्परिगो-
भिरावृतमिन्द्रस्यव्वज्ज्रꣳहविषारथंय्यज ॥ ५३ ॥ इन्द्रस्यव्वज्ज्रोम-
रुतामनीकम्मित्त्रस्यगर्ब्भोव्वरुणस्यनाभिं ÷ । सेमान्नोहव्व्यदातिञ्जु-
षाणोदेवरथप्प्रतिहव्व्यागृभाय ॥ ५४ ॥ उपश्श्वासयपृथिवीमुतद्द्या-
म्पुरुत्त्रातेमनुतांविष्ष्ठितञ्जगत् । सदुन्दुभेसजूरिन्द्रेणदेवैर्द्दूराद्दवीयोऽ-
अपसेधशत्त्रून् ॥ ५५ ॥ आक्क्रन्दयबलमोजोनऽआधानिष्ष्टनिहिदुरि-

तावाधमानः । अपप्रोथदुन्दुभेदुच्छुनाऽइतऽइन्द्रस्यमुष्टिरसिवीड-
यस्व ॥ ५६ ॥ आमूरजप्रत्यावर्त्तयेमाःकेतुमद्दुन्दुभिर्वावदीति ।
समश्वपर्णाश्चरन्तिनोनरोऽस्माकमिन्द्ररथिनोजयन्तु ॥ ५७ ॥ आग्ने-
यःकृष्णग्रीवःसारस्वतीमेषीबभ्रुःसौम्यःपौष्णःश्यामःशितिपृष्ठो
बार्हस्पत्यःशिल्पोवैश्वदेवऽऐन्द्रोरुणोमारुतःकल्माषऽऐन्द्राग्नःसꣳ-
हितोधोरामःसावित्रोवारुणःकृष्णऽएकशितिपात्पेत्वः ÷ ॥ ५८ ॥
अग्नयेनीकवतेरोहिताञ्जिरनड्वानधोरामौसावित्रौपौष्णौरजतनाभीवै-
श्वदेवौपिशङ्गौतूपरौमारुतःकल्माषऽआग्नेयःकृष्णोजःसारस्वतीमे-
षीवारुणःपेत्वः ÷ ॥ ५९ ॥ अग्नयेगायत्रायत्रिवृतेराथन्तरायाष्टा-

कपाल ऽइन्द्रायत्रैष्टुभायपञ्चदशायबार्हतायैकादशकपालोव्विश्श्वेभ्यो देवेभ्योजागतेभ्यः सप्तदशेभ्योव्वैरूपेभ्योद्द्वादशकपालोमित्त्रावरुणाभ्यामानुष्टुभाभ्यामेकवि ᳪ शाभ्यांव्वैराजाभ्याम्पयस्याबृहस्पतयेपाङ्क्तायत्त्रिणवायशाक्वरायचरुः सवित्त्रऽऔष्णिहायत्त्रयस्त्रि ᳪ शायरैवतायद्द्वादशकपालः प्राजापत्यश्चरुरदित्यैव्विष्णुपत्न्यैचरुरग्नयेव्वैश्वानरायद्द्वादशकपालोनुमत्याऽअष्टाकपालः ॥ ६० ॥

इति संहितायां एकोनत्रिंशोऽध्यायः ॥

❀ त्रिंशत्तमोऽध्यायः ❀

ॐ देवसवितः प्रसुवयज्ञंप्रसुवयज्ञपतिम्भगाय । दिव्योगन्धर्व्वः

केतपूःकेतन्नःपुनातुव्वाचस्पतिर्व्वाचन्नःस्वदतु ॥ १ ॥ तत्सवितुर्व्वरे-
ण्यम्भर्गोदेवस्यधीमहि । धियोयोनः प्रचोदयात् ॥ २ ॥ विश्वा-
निदेवसवितर्दुरितानिपरासुव । यद्भद्रन्तन्नऽआसुव ॥ ३ ॥
व्विभक्तारꣳहवामहेव्वसोश्चित्रस्यराधसः । सवितारन्नृचक्ष-
सम् ॥ ४ ॥ ब्रह्मणेब्ब्राह्मणङ्क्षत्रायराजन्यम्मरुद्भ्योव्वैश्यन्तपसे
शूद्रन्तमसेतस्करन्नारकायव्वीरहणम्पाप्मनेक्लीबमाक्रयायाऽअयो-
गूङ्कामायपुँश्चलूमतिक्रुष्टायमागधम् ॥ ५ ॥ नृत्तायसूतङ्गीताय
शैलूषन्धर्म्मायसभाचरन्नरिष्ठायैभीमलन्नर्म्मायरेभꣳहसायकारिमान-
न्दायस्त्रीषखम्प्रमदेकुमारीपुत्रम्मेधायैरथकारन्धैर्य्यायतक्षाणम् ॥ ६ ॥

तपसे कौलालम्मायायै कर्म्मारꣳ रूपाय मणिकारꣳ शुभे वपꣳ शरव्याया ऽ-
इषुकारꣳ हेत्यै धनुष्कारङ्कर्म्मणे ज्याकारन्दिष्टाय रज्जुसर्ज्जम्मृत्यवे
मृगयुमन्तकाय श्वनिनम् ॥ ७ ॥ नदीभ्यः पौञ्जिष्ठमृक्षीकाभ्यो
नैषादम्पुरुषव्याघ्राय दुर्म्मदङ्गन्धर्व्वाप्सरोभ्यो व्रात्यम्प्रयुग्भ्य ऽ उन्म-
त्तꣳ सर्प्पदेवजनेभ्यो ऽप्रतिपदमयेभ्यः कितवमीर्य्यताया ऽ अकितवम्पि-
शाचेभ्यो विदलकारीं यातुधानेभ्यः कण्टकीकारीम् ॥ ८ ॥ सन्-
धये जारङ्गेहायोपपतिमार्त्यै परिवित्तन्निर्ऋत्यै परिविविदानमराध्या ऽए-
दिधिषुःपतिन्निष्कृत्यै पेशस्कारीꣴ सञ्ज्ञानाय स्मरकारीम्प्रकामो-
द्यायोपसदं वर्णायानुरुधम्बलायोपदाम् ॥ ९ ॥ उत्सादेभ्यः

कुब्जम्प्रमुदेव्वामनन्द्वार्ब्भ्यः स्रामᳫं स्वप्नायान्धमधर्म्माय बधिरम्पवित्रा-
य भिषजम्प्रज्ञानाय नक्षत्रदर्शमाशिक्षायै प्रश्निनमुपशिक्षायाऽअभिप्र-
श्निनम्मर्यादायै प्रश्नविवाकम् ॥ १० ॥ अर्मेब्भ्यो हस्तिप-
ञ्जवायाश्वपम्पुष्ट्यै गोपालंव्वीर्यायाविपालन्तेजसेऽजपालमिरायै की-
नाशङ्कीलालाय सुराकारम्भद्राय गृहपᳫं श्रेयसे वित्तधमाद्ध्यक्ष्या-
यानुक्षत्तारम् ॥ ११ ॥ भायै दार्व्वाहारम्प्रभायाऽअग्न्येधम्ब्रध्नस्य
व्विष्टपायाभिषेक्तारंव्वर्षिष्ठाय नाकाय परिवेष्टारन्देवलोकाय पेशिता-
रम्मनुष्यलोकाय प्रकरितारᳫं सर्व्वेब्भ्यो लोकेब्भ्यऽउपसेक्तारमवऽ-
ऋत्यै व्वधायोपमन्थितारम्मेधाय व्वासः पल्पूलीम्प्रकामाय रजयित्रीम्

॥ १२ ॥ ऋतयैस्तेनहृदयंव्वैरहत्यायपिशुनंव्विविक्त्यैक्षत्तारमौपद्द्र-
ष्ट्र्यायानुक्षत्तारम्बलायानुचरम्भूम्नेपरिष्कन्दम्प्रियायप्प्रियवादिनमरि-
ष्ट्याऽअश्वसादꣳस्वर्ग्गायलोकायभागदुघंव्वर्षिष्ठायनाकायपरिवे-
ष्टारम् ॥ १३ ॥ मन्यवेयस्तापङ्क्रोधायनिसरंय्योगाययोक्क्तारꣳ
शोकायाभिसर्त्तारङ्क्षेमायव्विमोक्त्तारमुत्कूलनिकूलेभ्यस्त्रिष्ठिनंव्वपु-
षेमानस्कृतꣳशीलायाञ्जनीकारीन्निर्ऋत्यैकोशकारीम् ॥ १४ ॥
यमाययमसूमथर्व्वभ्योवतोकाꣳसंव्वत्सरायपर्यायिणीम्परिवत्सरा-
याविजातामिदावत्सरायातीत्वरीमिद्वत्सरायातिष्क्कद्वरीव्वत्सराय
व्विजर्जराꣳसंत्वत्सरायपलिक्क्नीमृभुभ्योजिनसन्धꣳसाद्ध्येभ्यं-

श्चर्म्मम्म्नम् ॥ १५ ॥ सरोभ्योधैवरमुपस्थावराभ्योदाशंव्वैशन्ता-
भ्योव्वैन्दन्नड्वलाभ्यःशौष्कलम्पारायमार्ग्गारमवारायकैवर्त्तन्तीर्थे-
भ्यऽआन्दंव्विषमेभ्योमैनालꣳस्वनेभ्यःपर्ण्णकङ्गुहाभ्यःकिरातꣳ
सानुभ्योजम्भकम्पर्व्वतेभ्यःकिम्पूरुषम् ॥ १६ ॥ बीभत्सायैपौल्क-
संव्वर्ण्णायहिरण्यकारन्तुलायैव्वाणिजम्पश्चादोषायग्लाविनंव्विश्वे-
भ्योभूतेभ्यः सिध्मलम्भूत्यैजागरणमभूत्यैस्वपनमार्त्त्यैजनवादिनं
व्यृद्ध्याऽअपगल्भꣳसꣳशरायप्प्रच्छिदम् ॥ १७ ॥ अक्षरा-
जायकितवङ्कृतायादिनवदर्शन्त्रेतायैकल्पिनन्द्वापरायाधिकल्पिनमा-
स्कन्दायसभास्थाणुम्मृत्यवेगोव्यच्छमन्तकायगोघातङ्क्षुधेयोगांव्वि-

कुन्तन्तन्भिक्षमाणऽउपतिष्ठ्ठतिदुष्कृताय चरकाचार्य्यम्पाप्मने सैलगम्
॥ १८ ॥ प्रतिश्रुत्काया ऽअर्त्तनङ्घोषायभषमन्तायबहुवादिनमनन्ता-
यमूकꣳ शब्दायाडम्बराघातम्महसे वीणावादङ्क्रोशायतूणवध्ध्मम्वर-
स्पराय शङ्खध्ध्मं वनायवनपमन्न्यतोरण्यायदावपम् ॥ १९ ॥
नर्म्मायपुँश्चलूꣳहसायकारिꣳयादसे शाबल्ल्याङ्ग्रामण्ण्यङ्गणकमभि-
क्क्रोशकन्तान्महसे वीणावादम्पाणिघ्नन्तूणवध्ध्मन्तान्नृत्तायानन्दाय
तलवम् ॥ २० ॥ अग्नयेपीवानम्पृथिव्यैपीठसर्प्पिणंव्वायवेचाण्डा-
लमन्तरिक्षायवꣳशनर्त्तिनन्दिवेखलतिꣳ सूर्य्यायहर्य्यक्षन्नक्षत्रेभ्यः
किर्म्मिरञ्चन्द्रमसे किलासमन्हे शुक्लम्पिङ्गाक्षꣳ रात्र्यैकृष्णम्पिङ्गाक्षम्

॥ २१ ॥ अथैतानष्टौविरूपानालभतेतिदीर्घञ्चातिह्रस्वञ्चातिस्थू-
लञ्चातिकृशञ्चातिशुक्लञ्चातिकृष्णञ्चातिकुल्वञ्चातिलोमशञ्च । अशू-
द्राऽअब्राह्मणास्तेप्राजापत्याः । मागधःपुँश्चलीकितवःक्लीबोशू-
द्राऽअब्राह्मणास्तेप्राजापत्याः ॥ २२ ॥ इति संहितायां त्रिंशत्त-
मोऽध्यायः ।

❀ अथ एकत्रिंशोऽध्यायः ❀

ॐ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् । सभूमिᳬसर्व्वत-
स्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषएवेदᳬसर्वंय्यद्भूतंय्यच्च

भाव्यम् । उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावान-
स्यमहिमातोज्ज्यायाँश्चपूरुषः । पादोस्यव्विश्वाभूतानित्रिपादस्या-
मृतन्दिवि ॥ ३ ॥ त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः ।
ततोव्विष्ष्वङ्व्यक्क्रामत्साशनानशनेऽअभि ॥ ४ ॥ ततोव्विराडजा-
यतव्विराजोऽअधिपूरुषः । सजातोऽअत्यरिच्च्यतपश्चाद्भूमिमथो
पुरः ॥ ५ ॥ तस्माद्यज्ञात्सर्व्वहुतःसम्भृतम्पृषदाज्ज्यम् । पशूँस्ताँश्च-
क्क्रेव्वायव्यानारण्ण्याग्ग्राम्म्याश्चये ॥ ६ ॥ तस्माद्यज्ञात्सर्व्वहुत-
ऽऋचःसामानिजज्ञिरे । छन्दाᳬसिजज्ञिरेतस्म्माद्यजुस्तस्म्मादजा-
यत ॥ ७ ॥ तस्म्मादश्श्वाऽअजायन्तयेकेचोभयादतः । गावोहजज्ञि-

रेतस्मात्तस्माज्जाताऽअजावयः ॥ ८ ॥ तंय्यज्ञम्बर्हिषिप्प्रौक्षन्पु-
रुषञ्जातमग्ग्रतः । तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये ॥ ९ ॥
यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् । मुखङ्किमस्यासीत्किम्बाहू
किमूरूपादाऽउच्यते ॥ १० ॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यः
कृतः । ऊरूतदस्ययद्वैश्यःपद्भ्याँशूद्रोऽअजायत ॥ ११ ॥
चन्द्रमामनसोजातश्चक्षोःसूर्य्योऽअजायत । श्रोत्राद्वायुश्चप्प्राण-
श्चमुखादग्निरजायत ॥१२॥ नाभ्याऽआसीदन्तरिक्षंशीर्ष्णोद्यौः
समवर्त्तत । पद्भ्याम्भूमिर्दिशःश्रोत्रात्तथालोकाँ२ऽअकल्पयन्
॥ १३ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत । व्वसन्तोस्यासीदाज्ज्य-

ङ्ग्रीष्म्मऽइध्मःशरद्धविः ॥ १४ ॥ सप्तास्यासन्परिधयस्त्रिःसप्त-
समिधःकृताः । देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥ १५ ॥
यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् । तेहनाकम्महि-
मानःसचन्तयत्रपूर्वेसाध्याःसन्तिदेवाः ॥ १६ ॥ अद्भ्यःसम्भृतः
पृथिव्यैरसाच्चव्विश्वकर्म्मणःसमवर्त्तताग्ग्रे । तस्यत्वष्टाव्विदधद्रूप-
मेतितन्मर्त्यस्यदेवत्वमाजानमग्ग्रे ॥ १७ ॥ व्वेदाहमेतम्पुरुषम्महान्त-
मादित्यवर्ण्णन्तमसःपरस्तात् । तमेवव्विदित्वातिमृत्युमेतिनान्यः

---

१. 'यथा भारभराऽऽक्रान्ता निश्वसन्ति नरा भुवि । एवं वर्णाः प्रयोक्तव्याः 'अद्भ्यः सम्भृत' इत्यपि ॥ (या० शि० श्लो० ६६)।

पन्थाविद्यतेयनाय ॥ १८ ॥ प्रजापतिश्चरतिगर्ब्भेऽअन्तरजायमानो
बहुधाव्विजायते । तस्ययोनिम्परिपश्यन्तिधीरास्तस्मिन्हतस्थुर्ब्भु-
वनानिव्विश्वा ॥ १९ ॥ योदेवेब्भ्यऽआतपतियोदेवानाम्पुरोहितः ।
पूर्व्वोयोदेवेब्भ्योजातोनमोरुचायब्राह्मये ॥ २० ॥ रुचम्ब्राह्मञ्जन-
यन्तोदेवाऽअग्ग्रेतदब्रुवन् । यस्त्वैवम्ब्राह्मणोव्विद्यात्तस्यदेवाऽअस-
न्वशे ॥ २१ ॥ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूप-
मश्विनौव्यात्तम् । इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण
॥ २२ ॥ इति संहितायामेकत्रिंशोऽध्यायः ।

❀ अथ द्वात्रिंशोऽध्यायः ❀

ॐ तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः। तदेव शुक्रन्त-
द्ब्रह्मताऽआपः सप्रजापतिः ॥ १ ॥ सर्वे निमेषाजज्ञिरे विद्युतः
पुरुषादधि । नैनमूर्ध्वन्नतिर्य्यञ्चन्नमध्ये परिजग्रभत् ॥ २ ॥
नतस्यप्रतिमाऽअस्तियस्यनाममहद्यशः । हिरण्यगर्भऽइत्येष-
मामाहिं सीदित्येषायस्मान्नजातऽइत्येषः ॥ ३ ॥ एषोहदेवः प्रदि-

१. हिरण्यगर्भः सम्, यः प्राणतो नि, यस्येमे, यऽ आत्मदा (शु० अ० २५ मं० १०–१३) यस्मान्न जातः (शु० श० ८ मं० ३६) मा मा हिंसी० सीत् (शु० अ० १२ मं० १०२)

शोनुसर्व्वाꣳपूर्व्वोहजातःसऽउगर्ब्भेऽअन्तः । सऽएवजातःसज-
निष्ष्यमाणꣳप्प्रत्यङ्जनास्तिष्ठतिसर्व्वतोमुखः ॥ ४ ॥ यस्म्माञ्जा-
तन्नपुराकिञ्चनैवयऽआबभूवभुवनानिव्विश्श्वा । प्रजापतिꣳप्प्रज-
यासꣳरराणस्त्रीणिज्ज्योतीꣳषिसचतेसषोडशी ॥ ५ ॥ येनद्यौरु-
ग्ग्राप्पृथिवीचदृढायेनस्वस्तभितंय्येननाकः । योऽअन्तरिक्षेरजसो
व्विमानꣳकस्म्मैदेवायहविषाव्विधेम ॥ ६ ॥ यङ्क्रन्दसीऽअवसात-
स्तभानेऽअभ्यैक्षेतामनसारेजमाने । यत्राधिसूरऽउदितोव्विभाति
कस्म्मैदेवायहविषाव्विधेम । आपोहयदबृहतीर्व्विश्चिदापः ॥ ७ ॥

१. आपो हयद् बृहतीः, यश्चित् (शु० अ० २७ मं० २५, २६)

व्वेनस्तत्पश्यन्निहितङ्गुहासद्यत्रव्विश्श्वम्भवत्येकनीडम् । तस्मि-
न्निद१ꣳसञ्चव्विचैतिसर्व्व१ꣳसऽओत१ꣳप्प्रोतश्च्चव्विभूꣳप्रजासु ॥ ८ ॥
प्रतद्वोचेदमृतन्नुव्विद्द्वान्गन्धर्व्वोधामव्विभृतङ्गुहासत् । त्रीणि
पदानिनिहितागुहास्ययस्तानिव्वेदसपितुꣳपितासत् ॥ ९ ॥ सनो
बन्धुर्ज्जनितासव्विधाताधामानिव्वेदभुवनानिव्विश्श्वा । यत्रदेवाऽ
अमृतमानशानास्तृतीयेधामन्नद्ध्यैरयन्त ॥ १० ॥ परीत्यभूतानि
परीत्यलोकान्परीत्यसर्व्वाꣳप्प्रदिशोदिशश्च्च । उपस्थायप्प्रथम-
जामृतस्यात्मनात्मानमभिसंव्विवेश ॥ ११ ॥ परिद्यावापृथिवीस-
द्यऽइत्त्वापरिलोकान्परिदिशꣳपरिस्वꣳ । ऋतस्यतन्तुंव्विततंव्वि-

चृत्यतदपश्यत्तदभवत्तदासीत् ॥ १२ ॥ सदसस्पतिमद्भुतम्प्रिय
मिन्द्रस्यकाम्म्यम् । सनिम्मेधामयासिषᳪस्वाहा ॥ १३ ॥ याम्मे-
धान्देवगणाःपितरश्श्चोपासते । तयामामद्यमेधयाग्नेमेधाविनङ्कु-
रुस्वाहा ॥ १४ ॥ मेधाम्मेव्वरुणोददातुमेधामग्निःप्प्रजापतिः ।
मेधामिन्द्रश्चव्वायुश्चमेधान्धातादददातुमेस्वाहा ॥ १५ ॥ इदम्मेब्ब्रह्म-
चक्षत्रञ्चोभेश्रियमश्नुताम् । मयिदेवादधतुश्रियमुत्तमान्तस्यै
तेस्वाहा ॥ १६ ॥ इति संहितायां द्वात्रिंशोऽध्यायः ।

❀ अथ त्रयस्त्रिंशतितमोऽध्यायः ❀

ॐअस्याजरासोदमामरित्रा अर्चद्धूमासोऽअग्नयः पावकाः । श्विव-

तीचयः श्श्वात्रासोभुरण्ण्यवोव्वनर्षदोव्वायवोनसोमाः ॥ १ ॥ हर-
योधूमकेतवोव्वातजूताऽउपद्द्यवि । यतन्तेव्वृथगग्ग्नयः ॥ २ ॥ यजा-
नोमित्रावरुणायजादेवाँ२ऋतम्बृहत् । अग्ग्नेयक्षिस्वन्दमम् ॥ ३ ॥
युक्ष्वाहिदेवहूतमाँ२अश्श्वाँ२अग्ग्नेरथीरिव । निहोतापूर्व्यःसदः ॥४॥
द्वेव्विरूपेचरतःस्वर्त्थेऽअन्न्यान्न्यावत्समुपधापयेते । हरिरन्न्यस्या-
म्भवतिस्वधावाञ्छुक्रोऽअन्न्यस्यान्ददृशेसुवर्च्चाः ॥ ५ ॥ [शतम्—
१७००] अयमिहप्प्रथमोधायिधातृभिर्होतायजिष्ठोऽअद्ध्वरेष्ष्वीड्यः ।
यमप्नवानोभृगवोव्विरुरुचुर्व्वनेषुचित्रंव्विब्भ्वंव्विशेविशे ॥६॥ त्रीणि
शतात्रीसहस्त्राण्यग्ग्निन्त्रिꣳशच्चदेवानवचासपर्य्यन् । औक्षन्घृतैरस्तृ-

णन्बर्हिरस्म्माऽआदिद्धोतारन्न्यसादयन्त ॥ ७ ॥ मूर्द्धानन्दिवोऽअर-
तिम्पृथिव्यावैश्श्वानरमृतऽआजातमग्निम् । कविᳫं सम्राजमतिथि-
ञ्जनानामासन्नापात्रञ्जनयन्तदेवाः ॥ ८ ॥ अग्निर्वृत्राणिजङ्घनदद्र-
विणस्युर्विपन्न्यया । समिद्धः शुक्रऽआहुतः ॥ ९ ॥ विश्श्वेभिःसो-
म्म्यम्मद्ध्वग्नऽइन्द्रेणव्वायुना । पिबामित्रस्यधामभिः ॥१०॥ आयदि-
षेनृपतिन्तेजऽआनट्शुचिरेतोनिषिक्तन्द्यौरभीके । अग्निःशर्द्धमनवद्यं
ञ्युवानᳫंस्वाद्ध्यञ्जनयत्सूदयंच ॥ ११ ॥ अग्नेशर्द्धमहतेसौभगाय
तवद्द्युम्म्नान्न्युत्तमानिसन्तु । सञ्जास्पत्त्यᳫं सुयममाकृणुष्ष्वशत्रूय-
तामभितिष्ठामहाᳫंसि ॥ १२ ॥ त्वाᳫंहिमन्द्रतममर्कशोकैर्व्ववृमहे

महिनꣳश्रोष्यंग्ने । इन्द्रन्नत्वाशवसादेवताव्वायुम्पृणन्तिराधसानृ-
तंमाꣳ ॥ १३ ॥ त्वेऽअंग्नेस्वाहुतप्प्रियासः सन्तुसूरयः । यन्तारो
येमघवानोजनानामूर्व्वान्दयंन्तगोनाम् ॥ १४ ॥ श्रुधिश्श्रुत्कर्ण्णव्व-
न्हिभिर्द्देवैरंग्नेसयावंभिꣳ । आसींदन्तुबर्हिषिमित्रोऽअंर्य्यमाप्प्रात-
र्य्यावाणोऽअद्ध्वरम् ॥ १५ ॥ व्विश्श्वेषामदितिर्य्यज्ञियानांव्विश्श्वे-
षामतिंथिर्म्मानुषाणाम् । अग्निर्द्देवानामवंऽआवृणानꣳसुमृडीकोभंव-
तुजातवेदाꣳ ॥ १६ ॥ महोऽअग्नेꣳसमिधानस्यशर्म्मण्यनागामित्रे
व्वरुणेस्वस्तये । श्रेष्ठेस्यामसवितुꣳसवीमनितद्देवानामवोऽअद्द्या-
व्वृणीमहे ॥ १७ ॥ आपश्चित्पिप्युस्तर्य्योनगावोनक्षन्नृतञ्जरितार-

स्तऽइन्द्र । य्याहिव्वायुर्न्नियुतोनोऽअच्छात्वꣳहिधीभिर्द्दयसेव्विवा-
जान् ॥१८॥ गावऽउपावतावतम्महीयज्ञस्यरप्सुदा । उभाकर्ण्णाहि-
रण्ण्यया ॥१९॥ यदद्यसूरऽउदितेनागामित्रोऽअर्य्यमा । सुवातिस-
विताभगः ॥२०॥ आसुतेसिञ्चतश्रियꣳरोदस्योरभिश्रियम् । रसा-
दधीतव्वृषभम् । तम्प्रत्नथायंव्वेनः[1] ॥२१॥ आतिष्ठन्तम्परिव्विश्वेऽअ-
भूषञ्छ्रियोव्वसानश्चरतिस्वरोचिः । महत्तद्वृष्ण्णोऽअसुरस्यनामा
विश्वरूपोऽअमृतानितस्थौ ॥ २२ ॥ प्रवोमहेमन्दमानायान्धसोर्च्चा
व्विश्वानरायव्विश्वाभुवे । इन्द्रस्ययस्यसुमखꣳसहोमहिश्रवोनृ-

१. तम्प्रत्नथा (शु० अ० ७ मं० १२) अयं वेनः (शु० अ० ७ मं० १६)।

म्मणश्च्रुरोदंसीसपर्य्यतं॑ ॥ २३ ॥ बृहन्निदि॒ध्मऽएषाम्भूरिं॒शस्त-
म्पृथुः॒स्वरुंः । येषामिन्द्रो॒युवा॒सखा॑ ॥ २४ ॥ इन्द्रेहि॒मत्स्यन्धं॑सो
व्विश्वें॒भिःसोम॒पर्व्वंभिः । म॒हाँ२ऽअंभि॒ष्टिरोजं॑सा ॥ २५ ॥ इन्द्रो॑व्वृ॒-
त्रमं॑वृणो॒च्छर्द्धं॑नीति॒ःप्रमा॒यिनां॑ममिना॒द्व॒र्प्पं॑णीतिः । अह॒न्व्य॒ꣳस-
मु॒शधग्ग्वनेष्व्वा॒विर्द्धें॑नांऽअकृणोद्र॒म्म्याणा॑म् ॥ २६ ॥ कुत॒स्त्वमि॑-
न्द्र॒माहि॑न॒ःसन्नेको॑यासिसत्पते॒किन्तं॑ऽइ॒त्था । सम्पृंच्छसेसमरा॒णःशु॑-
भा॒नैव्वो॑चेस्तन्नो॑हरिवो॒यत्ते॑ऽअ॒स्मे । [1]म॒हाँ२ऽइन्द्रो॒यऽओजं॑साकृ॒दा-

---

१. महाँऽ इन्द्रो यऽ ओजसा (शु० अ० ७ मं० ४०) ।

चनस्तरीरसिकदाचनप्प्रयुच्छसि ॥ २७ ॥ आतत्तऽइन्द्रायवः पन्ताभियऽऊर्व्वङ्गोमन्तन्तितृत्सान् । सकृत्स्वंय्येपुरुपुत्राम्महीᳪं सहस्रधाराम्बृहतीन्दुदुक्षन् ॥ २८ ॥ इमान्तेधियम्प्रभरेमहोमहीमस्यस्तोत्रेधिषणायत्तऽआनजे । तमुत्सवेचप्प्रसवेचसासहिमिन्द्रन्देवासःशवसामदन्ननु ॥ २९ ॥ व्विभ्राड्बृहत्पिबतुसोम्म्यम्मध्वायुर्दधद्यज्ञपतावविहुतम् । व्वातजूतोयोऽअभिरक्षतित्मनाप्प्रजाःपुपोषपुरुधाव्विराजति ॥ ३० ॥ उदुत्यञ्जातवेदसन्देवंव्वहन्तिकेतवः । दृशेव्वि-

२. कदाचनस्तरीरसि, कदाचन प्रयुच्छसि (शु० अ० ८ मं० २–३)।

श्श्वायसूर्य्यम् ॥३१॥ येनापावकचक्षसाभुरण्ण्यन्तञ्जनाँ२ऽअनु । त्वं व्वरुणपश्श्यसि ॥ ३२ ॥ दैव्व्यावद्ध्वर्य्यूऽआगतꣳरथेनसूर्य्यत्वचा मद्ध्वायज्ञꣳसमञ्जाथे । तम्प्रत्नथायंव्वेनश्चित्रन्देवानाम्[1] ॥ ३३ ॥ आनऽइडाभिर्व्विदथेसुशस्तिव्विश्श्वानरःसवितादेवऽएतु । अपि यथायुवानोमत्सथानोव्विश्श्वञ्जगदभिपित्वेमनीषा ॥ ३४ ॥ यद्-द्यकच्चंव्वृत्रहन्नुदगाऽअभिसूर्य्य । सर्व्वन्तदिन्द्रतेव्वशे ॥ ३५ ॥ तरणिर्व्विश्श्वदर्शतोज्ज्योतिष्कृदसिसूर्य्य । व्विश्श्वमाभासिरोच-

---

१. तम्प्रत्नथा, अयं वेनः, चित्रं देवानाम् (शु० अ० ७ मं० १२, १६, ४२)।

नम् ॥ ३६ ॥ तत्सूर्य्यस्यदेवत्वन्तन्महित्वम्मद्ध्याकर्त्तोर्व्विततᳪ सञ्जभार । यदेदयुक्तहरितः सधस्त्थादाद्द्रात्रीव्वासस्तनुतेसिमस्म्मै ॥ ३७ ॥ तन्मित्रस्यव्वरुणस्याभिचक्षेसूर्य्योरूपङ्कृणुतेद्द्योरुपस्त्थे । अनन्तमन्न्यद्द्रुशदस्यपाजः कृष्णमन्न्यद्धरितᳪ सम्भरन्ति ॥ ३८ ॥ बण्णमहाँ२ असिसूर्य्यबडादित्यमहाँ२ऽअसि । महस्तेसतोमहिमापनस्यतेद्धादेवमहाँ२ऽअसि ॥ ३९ ॥ बट्सूर्य्यश्श्रवसामहाँ२ऽअसिसत्रादेवमहाँ२असि । मन्हादेवानामसुर्य्यः पुरोहितोव्विभुज्ज्योतिरदाभ्यम् ॥ ४० ॥ श्रायन्तऽइवसूर्य्यव्विश्श्वेदिन्द्रस्यभक्षत । व्वसूनिजातेजनमानऽओजसाप्प्रतिभागन्नदीधिम

॥ ४१ ॥ अद्द्यादेवाऽउदितासूर्य्यस्यनिरᳫंहसᳫंपिपृतानिरवद्द्यात् ।
तन्नोमित्रोवरुणोमामहन्तामदितिᳫंसिन्धुः पृथिवीऽउतद्यौः ॥ ४२ ॥
आकृष्ष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च । हिरण्ययेनस-
वितारथेनादेवोयातिभुवनानिपश्यन् ॥ ४३ ॥ प्रवांवृजेसुप्प्रयाबर्हि-
रेषामाविश्श्पतीवबीरिटऽइयाते । व्विशामक्तोरुषसः पूर्व्वहूतौव्वा-
युः पूषास्वस्तयेनियुत्वान् ॥ ४४ ॥ इन्द्रवायूबृहस्प्पतिम्मित्राग्निम्पू-
षणम्भगम् । आदित्यान्मारुतङ्गणम् ॥ ४५ ॥ व्वरुणᳫंप्राविताभुव-
न्मित्रोव्विश्श्वाभिरूतिभिः । करेतान्नᳫंसुराधसᳫं ॥ ४६ ॥ अधि-
नऽइन्द्रैषांव्विष्ष्णोसजात्यानाम् । इतामरुतोऽअश्विना । तम्प्रप्क्रथा-

यंव्वेनोश्चेदेवासऽआनऽइडाभिर्व्विश्वेभिꣳसोम्म्यम्मदन्धोमासश्श्चर्षणी
धृतꣳ ॥ ४७ ॥ अग्नऽइन्द्रव्वरुणमित्रदेवाꣳशर्द्धꣳप्रयन्तमारुतोत-
व्विष्णो । उभानासत्यारुद्रोऽअधग्नाःपूषाभगꣳसरस्वतीज्जुषन्त
॥ ४८ ॥ इन्द्राग्नीमित्रावरुणादितिꣳस्वः पृथिवीन्द्यामरुतःपर्व्व-
ताँ२अपः । हुवेव्विष्णुम्पूषणम्ब्रह्मणस्पतिम्भगन्नुशꣳसꣳसविता-
रमूतये ॥ ४९ ॥ अस्मेरुद्रामेहनापर्व्वतासोव्वृत्रहत्येभरहूतौस-
जोषाः । यःशꣳसतेस्तुवतेधायिपज्रऽइन्द्रज्ज्येष्ठाऽअस्माँ२अवन्तु

---

१. तम्प्रत्नथा, अयं वेनः, ये देवासः, ओमासश्चर्षणीधृ० (शु० अ० ७ मं० १२, १६, १९, ३३) आनऽ इडा, विश्वेभिः सौम्यम् (शु० अ० ३३ मं० ३४, १०)।

देवाः ॥५०॥ अर्व्वाञ्चोऽअद्याभवतायजत्राऽआवोहार्द्दिभयमानोव्व्यय-
येयम् । त्राद्ध्वन्नोदेवानिजुरोव्वृकस्यत्राद्ध्वङ्कर्त्तादवपदोयजत्राः
॥५१॥ व्विश्श्वेऽअद्यमरुतोव्विश्श्वऽऊतीव्विश्श्वेभवन्त्वग्नयःसमिद्धाः ।
व्विश्श्वेनोदेवाऽअवसागमन्तुव्विश्श्वमस्तुद्द्रविणंव्वाजोऽअस्म्मे ॥५२॥
व्विश्श्वेदेवाः श्शृणुतेमꣳ हवम्मेयेऽअन्तरिक्षेयऽउपद्यविष्ठ । येऽअग्नि-
जिह्वाऽउतवायजत्त्राऽआसद्द्यास्म्मिन्न्बर्हिषिमादयद्ध्वम् ॥ ५३ ॥
देवेब्भ्योहिप्प्रथमंय्यज्ञियेब्भ्योमृतत्वꣳ सुवसिभागमुत्तमम् । आदि-
द्दामानꣳ सवितर्व्व्यूर्णुषेनूचीनाजीविताज्ञानुषेब्भ्यः ॥ ५४ ॥ प्रवा-
युमच्छाबृहतीमनीषाबृहद्द्रयिंव्विश्श्ववारꣳ रथप्प्राम् । द्युतद्द्या-

मानियुतꣳपत्यमानꣳकविꣳकविमियक्षसिप्प्रयज्ज्यो ॥ ५५ ॥ इन्द्रंवा-
यूऽइमेसुताऽउपप्प्रयोभिरागतम् । इन्दवोवामुशन्तिहि ॥ ५६ ॥
मित्रꣳहुवेपूतदक्षंव्वरुणञ्चरिशादसम् । धियङ्घृताचीꣳसाधन्ता
॥ ५७ ॥ दस्रायुवाकवꣳसुतानासत्याव्वृक्तबर्हिषꣳ । आयातꣳरु-
द्द्रवर्त्तनी । तम्प्रत्नथायंव्वेनः¹ ॥ ५८ ॥ व्विदद्यदीसरमारुग्णमद्रे-
र्म्महिपाथः पूर्व्व्यꣳसद्ध्र्यक्कः । अग्ग्रन्नयत्सुपद्यक्षराणामच्छारवं-
म्प्रथमाजानतीगात् ॥ ५९ ॥ नहिस्पशमविदन्नन्न्यमस्म्माद्वैश्श्वान
रात्पुरऽएतारमग्नेः । एमेनमवृधन्नमृताऽअमर्त्यंव्वैश्श्वानरङ्क्षैत्र-

१. तम्प्रत्नथा, अयं वेनः (शु० अ० ७ मं० १२, १६)।

जित्यायदेवाः ॥ ६० ॥ उग्ग्राव्विंघ्ननिनामृधऽइन्द्राग्नीहवामहे ।
तानोमृडातऽईदृशे ॥ ६१ ॥ उपास्म्मैगायतानरःपवमानायेन्दवे ।
अभिदेवाँ२ इयक्षते ॥ ६२ ॥ येत्वाहिहत्येमघवन्नवर्द्धन्न्येशाम्बरेहरि-
वोयेगविष्टौ । येत्वानूनमनुमदन्तिविप्राःपिबेन्द्रसोमꣳसगणोमरु-
द्भिः ॥ ६३ ॥ जनिष्ठाऽउग्ग्रःसहसेतुरायमन्द्रऽओजिष्ठोबहुला-
भिमानः । अवर्द्धन्निन्द्रम्मरुतश्चिदत्रमातायद्वीरन्दधनद्धनिष्ठा
॥ ६४ ॥ आतूनऽइन्द्रव्वृत्रहन्नस्म्माकमर्द्धमागहि । महान्म्महीभिरू-
तिभिः ॥ ६५ ॥ त्वमिन्द्रप्प्रतूर्तिष्ष्वभिविश्वाऽअसिस्पृधः ।
अशस्तिहाजनिताव्विश्वतूरसित्वन्तूर्य्यतरुष्ष्यतः ॥ ६६ ॥ अनुते

शुष्म्मन्तुरयन्तमीयतुᳪंक्षोणीशिशुन्नमातरा । व्विश्श्वास्तेस्पृधं÷श्नथ-
यन्तमन्न्यवेव्वृत्रंय्यदिन्द्रतूर्व्वसि ॥ ६७ ॥ यज्ञोदेवानाम्प्रत्येतिसुम्म्न-
मादित्यासोभवतामृडयन्त÷ । आवोर्व्वाचीसुमतिर्व्ववृत्यादᳪंहोश्चि-
द्याव्वरिवोवित्तरासत् ॥ ६८ ॥ अदब्धेभिᳪंसवितᳪंपायुभिष्ट्वᳪंशि-
वेभिरद्यपरिपाहिनोगयम् । हिरण्ण्यजिह्वᳪंसुवितायनव्व्यसेरक्षा-
माकिर्न्नोऽअघशᳪंसऽईशत ॥ ६९ ॥ प्रवीरयाशुचयोदद्रिरेवामद्ध्व-
र्य्युभिर्म्मधुमन्तᳪंसुतास÷ । व्वहव्वायोनियुतोयाह्यच्छापिबासुत-
स्यान्धसोमदाय ॥७०॥ गावऽउपावतावतम्महीयज्ञस्यरप्सुदा । उभा-
कर्णाहिरण्ण्यया ॥७१॥ काव्ययोराजानेषुक्रत्वादक्षस्यदुरोणे । रि-

शार्दसासधस्त्थऽआ॥७२॥ दैव्यावद्ध्वर्य्यूऽआगतह्रथेनसूर्य्यत्वचा। मद्ध्वायज्ञह्रसमञ्जाथे। तम्प्रत्क्कथायंव्वेनः[1] ॥७३॥ तिरश्चीनोव्विततोरश्मिरेषामधःस्विदासी३दुपरिस्विदासी३त्। रेतोधाऽआसन्म्महिमानऽआसन्त्स्वधाऽअवस्तात्प्रयतिःपरस्तात् ॥७४॥ आरोदसीअपृणदास्वम्महज्जातंय्यदेनमपसोऽअधारयन्। सोऽअद्ध्वरायपरिणीयते कविरत्योनव्वाजसातयेचनोहितः ॥ ७५ ॥ उक्क्थेभिर्व्वृत्रहन्तमायामन्दानाचिदागिरा। आङ्गूषैराविवासतः ॥ ७६ ॥ उपनःसूनवोगिरः श्रृण्ण्वन्त्वमृतस्यये। सुमृडीकाभवन्तुनः ॥ ७७ ॥ ब्रह्माणिमेमत-

1—तम्प्रत्नथा, अयं वेनः (शु० अ० ७ म० १२, १६)।

यऽशश्सुतासऽशुष्मंऽइयर्त्तिप्रभृतोमेऽअद्रिः । आशासतेप्रतिहर्य-
न्त्युक्थेमाहरीव्वहतस्तानोऽअच्छ ॥ ७८ ॥ अनुत्तमातेमघवन्नकिर्नु-
नत्वावाँ२ऽअस्तिदेवताव्विदानः । नजायमानोनशतेनजातोयानिक-
रिष्ष्याकृणुहिप्प्रवृद्ध ॥ ७९ ॥ तदिदासभुवनेषुज्ज्येष्ठंयतोजज्ञऽउग्र-
स्त्वेषनृम्णः । सद्योजज्ञानोनिरिणातिशत्रूननुयंव्विश्श्वेमदन्त्यूमाः
॥ ८० ॥ इमाऽउत्त्वापुरूवसोगिरोव्वर्द्धन्तुयाममं । पावकवर्ण्णाःशु-
चयोव्विपश्चितोभिस्तोमैरनूषत ॥ ८१ ॥ यस्यायंव्विश्श्वऽआर्यो
दासःशेवधिपाऽअरिः । तिरश्चिदर्य्येरुशमेपवीरवितुब्भ्येत्सोऽअ-
ज्ज्यतेरयिः ॥ ८२ ॥ अयश्सहस्रमृषिभिःसहस्कृतःसमुद्रऽइवप-

ष्प्रथे । सत्यः सोऽअस्यमहिमागृणेशवोयज्ञेषुविप्रराज्ये ॥ ८३ ॥
अदब्धेभिः सवितःपायुभिष्ट्वᳬशिवेभिरद्यपरिपाहिनोगायम् । हिर-
ण्यजिह्वःसुवितायनव्यसेरक्षामाकिर्नोऽअघशᳬसऽईशत ॥८४॥
आनोयज्ञन्दिविस्पृशंवायोयाहिसुमन्मभिः । अन्तःपवित्रेऽउपरि
श्रीणानोयᳬशुक्रोऽअयामिते ॥ ८५ ॥ इन्द्रवायूसुसन्दृशासुहवेह-
हवामहे । यथानःसर्वऽइज्जनोनमीवःसङ्गमेसुमनाऽअसत् ॥ ८६ ॥
ऋधगित्थासमर्त्यःशशमेदेवतातये । सोनूनम्मित्रावरुणावभिष्टय-
यऽआचक्रेहव्यदातये ॥ ८७ ॥ आयातमुपभूषतम्मद्ध्वः पिबतम-
श्विना । दुग्धम्पयोवृषणाजेन्यावसूमानोमर्द्धिष्टमागतम् ॥ ८८ ॥

प्रैतुब्ब्रह्मणस्प्पतिḫप्प्रदेव्व्येतुसूनृता । अच्छाव्वीरन्नर्य्यम्पङ्क्तिराधसन्देवायज्ञन्नयन्तुनḫ ॥ ८९ ॥ चन्द्रमाऽअप्प्स्वुन्तरासुपर्ण्णोधावते दिवि । रयिम्पिशङ्गम्बहुलम्पुरुस्पृहḫहरिरेतिकनिक्क्रदत् ॥ ९० ॥ देवन्देवंव्वोवसेदेवन्देवमभिष्ष्टये । देवन्देवḫहुवेमव्वाजसातयेगृणन्तोदेव्व्याधिया ॥ ९१ ॥ दिविपृष्ष्टोऽअरोचताग्निर्व्वैश्श्वानरोबृहन् । क्ष्मयाव्वृधानऽओजसाचनोहितोज्ज्योतिषाबाधतेतम ॥ ९२ ॥ इन्द्राग्नीऽअपादियम्पूर्व्वागात्पद्वतीभ्यḫ । हित्वीशिरोजिह्व्वयाव्वावदच्चरत्त्रिḫशत्पदान्न्यक्क्रमीत् ॥ ९३ ॥ देवासोहिष्म्मामनवेसमन्न्यवोव्विश्श्वेसाकḫसरातयḫ । तेनोऽअद्यतेऽअपरन्तुचेतुनोभ-

वन्तुव्वरिवोविदः ॥ ९४ ॥ अपाधमदभिशस्तीरशस्तिहाथेन्द्रोद्द्यु-
म्न्याभवत् । देवास्तऽइन्द्रसख्याययेमिरेबृहद्भानोमरुद्गण ॥९५॥
प्रवऽइन्द्रायबृहतेमरुतोब्रह्मार्चत । व्वृत्रꣳहनतिव्वृत्रहाशतक्क्रतु-
र्व्वज्रेणशतपर्व्वणा ॥ ९६ ॥ अस्येदिन्द्रोव्वावृधेव्वृष्ण्यꣳशवोमदे-
सुतस्यव्विष्ष्णवि । अद्यातमस्यमहिमानमायवोनुष्टुवन्तिपूर्व्वथा ।
इमाऽउत्वायस्यायमयꣳसहस्रमूर्ध्वऽऊषुणः ॥९७॥ इति संहितायां
त्रयस्त्रिंशोऽध्यायः ।

---

१. इमा उत्वा, यस्यायम्, अयꣳ सहस्रम् (शु० अ० ३३ मं० ८१-८३)।
२. ऊर्ध्वऽ ऊषुणः (शु० अ० ११ मं० ४२)।

❀ अथ चतुस्त्रिंशोऽध्यायः ❀

ॐ यज्जाग्ग्रंतोदूरमुदैतिदैवन्तदु सुप्तस्यतथैवैति । दूरङ्गमञ्ज्योति-
षाञ्ज्योतिरेकन्तन्मेमनं÷शिवसंङ्कल्पमस्तु ॥ १ ॥ येनकर्म्माण्य-
पसोमनीषिणोयज्ञेकृण्वन्तिविदथेषुधीराः । यदपूर्व्वंयक्षमन्तःप्र-
जानान्तन्मेमनं÷शिवसंङ्कल्पमस्तु ॥ २ ॥ यत्प्रज्ञानमुतचेतोधृति-
श्चयज्ज्योतिरन्तरमृतम्प्रजासु । यस्मान्नऽऋतेकिञ्चनकर्म्मक्रि-
यतेतन्मेमनं÷शिवसंङ्कल्पमस्तु ॥ ३ ॥ येनेदम्भूतम्भुवनम्भवि-
ष्यत्परिगृहीतममृतेनसर्व्वम् । येनयज्ञस्तायतेसप्तहोतातन्मेमनं÷

शिवसंङ्कल्पमस्तु ॥ ४ ॥ यस्मिन्नृचः सामयजूंषियस्मिन्प्रति-
ष्ठितारथनाभाविवाराः । यस्मिँश्चित्तꣳ सर्वमोतम्प्रजानान्तन्मे
मनः शिवसंङ्कल्पमस्तु ॥ ५ ॥ सुषारथिरश्वानिवयन्मनुष्यान्ने
नीयतेभीशुभिर्वाजिनऽइव । हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्मेम-
नः शिवसंङ्कल्पमस्तु ॥ ६ ॥ पितुन्नुस्तोषम्महोधर्माणन्तविषीम् ।
यस्यत्रितोव्योजसावृत्रंविपर्वमर्दयत् ॥ ७ ॥ अन्विदनुमतेत्वम्म-
न्यासैशञ्चनस्कृधि । क्रत्वेदक्षायनोहिनुप्रणऽआयूंषितारिषः
॥ ८ ॥ [शतम्—१८००] अनुनोद्यानुमतिर्यज्ञन्देवेषुमन्यताम् ।
अग्निश्चहव्यवाहनोभवतान्दाशुषेमयः ॥ ९ ॥ सिनीवालिपृथु-

ष्टुकेषादेवानामसिस्वसा । जुषस्वंहव्यमाहुतम्प्रजान्देविदिदि-
ड्ढिनः ॥ १० ॥ पञ्चनद्यः सरस्वतीमपियन्तिसस्रोतसः । सरस्व-
तीतुपञ्चधासोदेशेभवत्सरित् ॥ ११ ॥ त्वमग्नेप्प्रथमोऽअङ्गिराऽ-
ऋषिर्देवोदेवानामभवःशिवःसखा । तवव्व्रतेकवयोविद्मनापसो-
जायन्तमरुतोभ्राजदृष्टयः ॥ १२ ॥ त्वन्नोऽअग्नेतवदेवपायुभिर्म्म-
घोनोरक्षतन्वश्चव्वन्द्य । त्रातातोकस्यतनयेगवामस्यनिमेषःरक्ष-
माणस्तवव्व्रते ॥ १३ ॥ उत्तानायामवभराचिकित्वान्सद्यःप्प्रवीता
व्वृषणञ्जजान । अरुषस्तूपोरुशदस्यपाजऽइडायास्पुत्रोव्वयुनेजनिष्ट
॥ १४ ॥ इडायास्त्वापदेव्वयन्नाभापृथिव्व्याऽअधि । जातवेदो

निधीमहयज्ञैर्हव्यायव्वोढवे ॥ १५ ॥ प्रमन्न्महेशवसानायशूषमाङ्गू-
षङ्गिर्व्वणसेऽङ्गिरस्वत् । सुवृक्तिभिस्तुवतऽऋग्मियायार्चामार्क-
न्नरेव्विश्श्रुताय ॥ १६ ॥ प्रवोमहेमहिनमोभरद्ध्वमाङ्गूष्यꣳशव-
सानायसाम । येनानꣳपूर्व्वेपितरꣳपदज्ञाऽअर्च्चन्तोऽअङ्गिरसोगाऽ-
अविन्दन् ॥ १७ ॥ इच्छन्तित्वासोम्म्यासꣳसखायꣳसुन्न्वन्तिसोमन्द-
धतिप्प्रयाꣳसि । तितिक्षन्तेऽअभिशस्तिञ्जनानामिन्द्रत्वदाकश्चन-
हिप्प्रकेतः ॥ १८ ॥ नतेदूरेपरमाचिद्रजाꣳस्यातुप्प्रयाहिहरिवो
हरिभ्याम् । स्थिरायव्वृष्णेसवनाकृतेमायुक्ताग्ग्रावाणꣳसमिधाने
ऽअग्नौ ॥ १९ ॥ अषाढꣳयुत्सुपृतनासुपप्प्रिꣳस्वर्षामप्सांव्वृजनस्य

गोपाम् । भरेषुजाᳪसुक्षितिᳪसुश्रवसञ्जयन्तन्त्वामनुमदेमसोम ॥२०॥ सोमोधेनुᳪसोमोऽअर्वन्तमाशुᳪसोमोव्वीरङ्कर्म्मण्यन्ददाति । सादन्यंविदत्थ्यᳪसभेयम्पितृश्रवणंय्योददाशदस्म्मै ॥ २१ ॥ त्वमिमाऽओषधीःसोमव्विश्श्वास्त्वमपोऽअजनयस्त्वङ्गाः । त्वमाततन्थोर्व्वन्तरिक्षन्त्वञ्ज्योतिषाव्वितमोव्ववर्त्थ ॥ २२ ॥ देवेनेनोमनसादेवसोमरायोभागᳪसहसावन्नभियुद्ध्य । मात्वातनदीशिषेव्वीर्य्यस्योभयेब्भ्यःप्रचिकित्सागविष्टौ ॥ २३ ॥ अष्टौव्यख्यत्ककुभःपृथिव्यास्त्रीधन्वयोजनासप्तसिन्धून् । हिरण्याक्षःसवितादेवऽआगाद्दधद्रत्नादाशुषेव्वार्य्याणि ॥ २४ ॥ हिरण्यपाणिःसवितार्व्विचर्षे-

णिरुभेद्यावापृथिवीऽअन्तरीयते । अपामीवाम्बाधतेव्वेत्तिसूर्य्यमभि-
कृष्णेनरजसाद्यामृणोति ॥ २५ ॥ हिरण्यहस्तोऽअसुरःसुनीथः
सुमृडीकःस्ववाँयात्वर्व्वाङ् । अपसेधन्त्रक्षसोयातुधानानस्त्थाद्देवः
प्प्रतिदोषङ्गृणानः ॥ २६ ॥ येतेपन्थाःसवितःपूर्व्यासोरेणवःसुकृता-
ऽअन्तरिक्षे । तेभिर्न्नोऽअद्द्यपथिभिःसुगेभीरक्षाचनोऽअधिचब्रूहिदेव
॥ २७ ॥ उभापिबतमश्श्विनोभानःशर्म्मयच्छतम् । अविद्द्रियाभि-
रूतिभिः ॥२८॥ अप्प्नस्वतीमश्श्विनाव्वाचमस्म्मेकृतन्नोदस्राव्वृष-
णामनीषाम् । अद्द्यूत्येवसेनिह्वयेवाँव्वृधेचनोभवतंव्वाजसातौ ॥२९॥
द्युभिरक्तुभिःपरिपातमस्म्मानरिष्टेभिरश्श्विनासौभगेभिः । तन्नोमि-

त्रोव्वरुंणोमामहन्तामदिंतिःसिन्धुं पृथिवीऽउतद्यौः ॥ ३० ॥ आ कृष्णेनरजंसाव्वर्त्तंमानोनिवेशयंन्नमृतम्मर्त्यञ्च । हिरण्ययेनसविता रथेनादेवोयांतिभुवंनानिपश्यंन् ॥ ३१ ॥ आरांत्रिपार्थिवꣳरजं पितुरंप्प्रायिधामंभिः । दिवःसदांꣳसिबृहतीव्वितिष्ठसऽआत्त्वेषंव्वर्त्ततेतमं ॥ ३२ ॥ उषस्तच्चित्रमाभंरास्म्मभ्यंव्वाजिनीवति । येनं तोकञ्चतनंयञ्चधामंहे ॥ ३४ ॥ प्रातरग्निम्प्रातरिन्द्रꣳहवामहेप्प्रातर्म्मित्रावरुंणाप्प्रातरश्विनां । प्रातर्भगम्पूषणम्ब्रह्मणस्प्पतिम्प्रातःसोमंमुतरुद्रꣳहुंवेम ॥ ३३ ॥ प्रातर्जितम्भगंमुग्ग्रꣳहुंवेमव्वयम्पुत्रमदिंतेर्य्योविधर्त्ता । आद्ध्रश्चिद्यम्मन्न्यमानस्तुरश्चिद्राजांचिद्यम्भ-

गम्भक्षीत्याह ॥ ३५ ॥ भगप्प्रणेतर्ब्भगसत्यराधोभगेमान्धियमुदं-
वाददन्नः । भगप्प्रनोजनयगोभिरश्श्वैर्ब्भगप्प्रनृभिर्न्नृवन्तः स्याम
॥ ३६ ॥ उतेदानीम्भगवन्तः स्यामोतप्प्रपित्वऽउतमद्ध्येऽअन्हाम् ।
उतोदितामघवन्त्सूर्य्यस्यव्वयन्देवानाँ सुमतौस्याम ॥३७॥ भगऽएव
भगवाँ२ऽअस्तुदेवास्तेनव्वयम्भगवन्तः स्याम । तन्त्वाभगसर्व्वऽइज्जो-
हवीतिसनोभगपुरऽएताभवेह ॥३८॥ समद्ध्वरायोषसोनमन्तदधिक्रा-
वेवशुचयेपदाय । अर्व्वाचीनंव्वसुविदम्भगन्नोरथमिवाश्श्वाव्वाजिनऽ-
आवहन्तु ॥ ३९ ॥ अश्श्वावतीर्ग्गोमतीर्न्नऽउषासोव्वीरवतीः सदमुच्छ-
न्तुभद्द्राः । घृतन्दुहानाव्विश्श्वतः प्रपीतायूयपातस्वस्तिभिः स-

दानं॑ ॥ ४० ॥ पूषन्तव॑व्व्रते॒व्वयन्न्न रि॑ष्येम॒ कदा॑च॒न । स्तो॒तार॑स्तऽ इ॒ह स्म्म॑सि ॥ ४१ ॥ प॒थस्प॑थ॒ः परि॑पति॑व्वच॒स्या कामे॑न कृ॒तोऽ अ॒भ्या॑-नड॒र्क्कम् । स नो॑ रासच्छु॒रुध॑श्च॒न्द्राग्ग्रा धियं॑धियं सीषधाति॒ प्र पू॒षा ॥ ४२ ॥ त्रीणि॑ प॒दा व्वि च॑क्क्रमे॒ व्विष्णु॑र्ग्गो॒पाऽ अदा॑भ्यः । अतो॒ धर्म्मा॑णि धा॒रय॑न् ॥ ४३ ॥ तद्विप्रा॑सो व्वि॒पन्न्यवो॑ जागृ॒वांस॒ः सम्मि॑न्धते । व्विष्णो॒र्यत्प॑र॒मम्प॒दम् ॥४४॥ घृ॒तव॑ती॒ भुव॑नानामभि॒श्श्रियो॒र्व्वी पृ॒थ्वी म॑धु॒दुघे॑ सु॒पेश॑सा । द्यावा॑पृथि॒वी व्वरु॑णस्य॒ धर्म्म॑णा॒ व्विष्क॑भिते अ॒जरे॒ भूरि॑रेतसा ॥ ४५ ॥ ये नः॑ स॒पत्ना॒ऽ अप॒ ते भ॑वन्त्विन्द्रा॒ग्निभ्या॒मव॑ बाधाम-हे॒ तान् । व॒सवो॑ रु॒द्द्राऽ आ॑दि॒त्याऽ उ॑परि॒स्पृशं॑म्मो॒ग्ग्रञ्चे॒त्तार॑मधिरा॒जम॑

ऋन् ॥ ४६ ॥ आनासत्यात्त्रिभिरेकादशैरिहदेवेभिर्यातम्मधुपेयम-
श्विना । प्रायुस्तारिष्टन्नीरपांᳫसिमृक्षतᳬसेधतन्द्वेषोभवतᳬसचाभु-
वा ॥ ४७ ॥ एषवस्तोमोमरुतऽइयङ्गीर्म्मान्दार्य्यस्यमान्यस्यकारो[१] ।
एषायासीष्टतन्वेव्वयांव्विद्यामेषंव्वृजनञ्जीरदानुम् ॥ ४८ ॥ सह-
स्तोमाःᳬसहछन्दसऽआवृतःसहप्प्रमाऽऋषयःᳬसप्तदैव्याः । पूर्व्वे-
षाम्पन्थामनुदृश्यधीराऽअन्वालेभिरेरत्थ्योनरश्म्मीन् ॥४९॥ आयु-
ष्यंव्वर्च्चस्यᳬरायस्पोषमौद्भिदम् । इदᳬहिरण्ण्यंव्वर्च्चस्वज्जैत्त्राया-
विशतादुमाम् ॥ ५० ॥ नतद्रक्षांᳫसिनापिशाचास्तरन्तिदेवानामो-

१—यस्यातिहाय सहेतिन प्रा० अ० ४–२६ इति सूत्रेण चकारनिषेधात् ।

जं᳖ प्रथमजᳬंह्येतत् । योबिभर्तिदाक्षायणᳬं हिरण्यᳬं सदेवेषुकृणुते दीर्घमायुᳬं समनुष्ष्ये षुकृणुतेदीर्घमायुः ॥ ५१ ॥ यदाबध्नन्दाक्षायणाहिरण्यᳬं शतानीकायसुमनस्यमानाᳬं । तन्मऽआबध्नामिशतशारदायायुष्ष्माञ्जरदष्ष्टिर्यथासम् ॥५२॥ उतनोहिर्बुध्न्यः शृणोत्वजऽएकपात्पृथिवीसमुद्रः । विश्वेदेवाऽऋतावृधोहुवानास्तुतामन्त्राᳬं कविशस्ताऽअवन्तु ॥ ५३ ॥ इमागिरऽआदित्येभ्योघृतस्नूᳬं सनाद्राजभ्योजुह्वाजुहोमि । शृणोतुमित्रोऽअर्य्यमाभगोनस्तुविजातोवरुणोदक्षोऽअᳬंशः ॥ ५४ ॥ सप्तऽऋषयᳬं प्रतिहिताᳬं शरीरे सप्तरक्षन्तिसदमप्प्रमादम् । सप्तापᳬं स्वपतोलोकमीयुस्तत्रजागृतोऽ-

ऽअस्वप्नजौसत्रसदौचदेवौ ॥ ५५ ॥ उत्तिष्ठब्ब्रह्मणस्प्पतेदेवयन्तं-
स्त्वेमहे । उपप्प्रयन्तुमरुतंःसुदानवऽइन्द्रप्प्राशूर्ब्भवासचा ॥ ५६ ॥
प्रनूनम्ब्रह्मणस्प्पतिर्म्मन्त्रंव्वदत्युक्थ्यम् । यस्मिन्निन्द्रोव्वरुणोमित्त्रो
ऽअर्य्यमादेवाऽओकांᳬसिचक्क्रिरे ॥ ५७ ॥ ब्रह्मणस्प्पतेत्वमस्यय-
न्तासूक्तस्यबोधितनयञ्चजिन्व । व्विश्वन्तद्भद्रंय्यदवन्तिदेवाबृह-
द्वदेमव्विदथेसुवीराः । यऽइमाव्विश्वाव्विश्वकर्म्मायोनःपितान्न-
पतेन्नस्यनोदेहि[2] ॥ ५८ ॥ इति संहितायां चतुस्त्रिंशोऽध्यायः ।

१—यऽइमा, व्विश्वकर्म्मा विमनाः, यो नः पिता (शु० अ० १७ मं० १७, २६, २७)। २—अन्नपतेन्नस्य, (अ० ११ मं० ८३)।

अथ पञ्चत्रिंशोऽध्यायः

ओ३म् अपेतोयन्तुपणयोसुम्नादेवपीयवः । अस्यलोकः सुतावतः । द्युभिरहोभिरक्तुभिर्व्यक्तंयमोददात्ववसानमस्मै ॥ १ ॥ सवितातेशरीरेभ्यःपृथिव्याँल्लोकमिच्छतु । तस्मैयुज्यन्तामुस्रियाः ॥ २ ॥ व्वायुःपुनातुसवितापुनात्वग्नेर्भ्राजसासूर्यस्यव्वर्चसा । व्विमुच्यन्तामुस्रियाः ॥ ३ ॥ अश्वत्थेवोनिषदनम्पर्णेवोव्वसति-

१—'पणयो जहीमोऽम्बिके' ४।७६। पणयः जहीमः अम्बिके एतेभ्य एकारौकारेभ्यः परोऽकारोऽभिनिधीयत इति सूत्रार्थः। 'अत्रा जहीमोऽशिवाये २५।१०। अम्बेऽअम्बिकेऽम्बालिके २३।१८। इत्यादौ।

च्कृता । गोभाजऽइत्किलासथयत्सनवथपूरुषम् ॥ ४ ॥ सविताते
शरीराणिमातुरुपस्त्थऽआवपतु । तस्म्मैपृथिविशम्भव ॥ ५ ॥ प्रजा-
पतौत्वादेवतायामुपोदकेलोकेनिदधाम्म्यसौ । अपनःशोशुचदघम्
॥ ६ ॥ परम्मृत्योऽअनुपरेहिपन्थांय्यस्तेऽअन्न्यऽइतरोदेवयानात् ।
चक्षुष्म्मतेश्शृण्वतेतेब्ब्रवीमिमानः प्प्रजाꣳरीरिषोमोतव्वीरान् ॥ ७ ॥
शंव्वातःशꣳहितेघृणिःशन्तेभवन्त्विष्टकाः । शन्तेभवन्त्वग्नयः
पार्त्थिवासोमात्वाभिशूशुचन् ॥ ८ ॥ कल्प्पन्तान्तेदिशस्तुभ्य-
मापः शिवतमास्तुभ्यम्भवन्तुसिन्धवः । अन्तरिक्षꣳशिवन्तु-
भ्यङ्कल्प्पन्तान्तेदिशःसर्व्वाः ॥ ९ ॥ अश्म्मन्न्वतीरीयतेसꣳरभ-

द्ध्वमुत्तिष्ठतप्प्रतरतासखायः । अत्त्राजहीमोशिवाषेऽअसञ्छिवा-
न्न्वयमुत्तरेमाभिवाजान् ॥ १० ॥ अपाघमपकिल्विषमपकृत्यामपो
रपः । अपामार्गत्वमस्म्मदपदुःष्वप्न्यꣳसुव ॥ ११ ॥ सुमित्त्रिया-
नऽआपओषधयःसन्तुदुर्म्मित्त्रियास्तस्म्मैसन्तुषोस्म्मान्द्वेष्टिषञ्चव्व-
यन्द्विष्म्मः ॥ १२ ॥ अनड्वाहमन्न्वारभामहेसौरभेयꣳस्वस्तये ।
सनऽइन्द्रऽइवदेवेब्भ्योव्वह्निः सन्तारणोभव ॥ १३ ॥ उद्वयन्तमस-
स्प्परिस्वः पश्श्यन्तऽउत्तरम् । देवन्देवत्त्रासूर्य्यमगन्न्मज्ज्योतिरुत्तम-
म् ॥ १४ ॥ इमञ्जीवेब्भ्यः परिधिन्दधामिमैषान्नुगादपरोऽअर्त्थमेतम् ।
शतञ्जीवन्तुशरदः पुरूचीरन्तम्मृत्युन्दधताम्पर्व्वतेन ॥ १५ ॥ अग्न-

ऽआयूᳬंषिपिबस्ऽआसुवोर्ज्जमिषञ्चनः । आरेबाधस्वदुच्छुनाम् ॥१६॥
आयुष्म्मानग्नेहविषांवृधानोघृतप्प्रतीकोघृतयोनिरेधि । घृतम्पीत्वा
मधुचारुगव्व्यम्पितेवपुत्रमभिरक्षतादिमान्त्स्वाहा ॥ १७ ॥ परीमेगा-
मनेषतपर्य्यग्निमहृषत । देवेष्ष्वक्रतश्श्रवःकऽइमाँ२आदधर्षति ॥१८॥
क्रव्व्यादमग्निम्प्रहिणोमिदूरंय्यमराज्ज्यङ्गच्छतुरिप्प्रवाहः । इहैवायमि-
तरोजातवेदादेवेब्भ्योहव्व्यंव्वहतुप्प्रजानन् ॥ १९ ॥ व्वहव्वपाञ्जा-
तवेदः पितृब्भ्योयत्रैनान्वेत्थनिहितान्पराके । मेदसः कुल्ल्याऽउप-
तान्त्स्रवन्तुसत्याऽएषामाशिषःसन्नमन्ताᳬंस्वाहा ॥ २० ॥ स्योना-
नापृथिविनोभवानृक्षरानिवेशनी । यच्छानःशर्म्मसप्प्रथाः । अपनः

शोशुचदघम् ॥ २१ ॥ अस्मात्त्वमधिजातोसित्त्वदयञ्जायता-
म्पुनः । असौस्वर्गायलोकायस्वाहा ॥ २२ ॥ इति संहितायां
पञ्चत्रिंशोऽध्यायः ।

❀ अथ षट्त्रिंशोऽध्यायः ❀

ॐऋचंव्वाचम्प्रपद्येमनोयजुः प्रपद्येसामप्राणम्प्रपद्येचक्षुःश्रोत्र-
म्प्रपद्ये । व्वागोजःसहौजोमयिप्राणापानौ ॥ १ ॥ यन्मेछिद्द्र-
ञ्चक्षुषोहृदयस्यमनसोवातितृण्णम्बृहस्पतिर्म्मेतद्दधातु । शन्नोभवतु
भुवनस्ययस्पतिः ॥ २ ॥ भूर्भुवःस्वःतत्सवितुर्व्वरेण्यम्भर्गो
देवस्यधीमहि । धियोयोनःप्रचोदयात् ॥ ३ ॥ कयानश्चित्रऽआ-

भुवदूतीसदावृधः सखा । कयाशचिष्ठयावृता ॥ ४ ॥ कस्त्वासत्यो-
मदानाम्मऽहिष्ठोमत्सदन्धसः । दृढाचिदारुजेव्वसु ॥ ५ ॥ अभी-
षुणः सखीनामविताजरितॄणाम् । शतम्भवास्यूतिभिः ॥ ६ ॥ कया
त्वन्नऽऊत्याभिप्रमन्दसेव्वृषन् । कयास्तोतृभ्यऽआभर ॥ ७ ॥
इन्द्रोव्विश्वस्यराजति । शन्नोऽअस्तुद्विपदेशञ्चतुष्पदे ॥ ८ ॥
शन्नोमित्रः शंव्वरुणः शन्नोभवत्वर्य्यमा । शन्नऽइन्द्रोबृहस्पतिः शन्नो
व्विष्णुरुरुक्रमः ॥ ९ ॥ शन्नोव्वातः पवताᳩं शन्नस्तपतु-
सूर्य्यः । शन्नः कनिक्रदद्देवः पर्ज्जन्योऽअभिवर्षतु ॥ १० ॥ अहा-
निशम्भवन्तुनः शᳬरात्रीः प्रतिधीयताम् । शन्नऽइन्द्राग्नीभवतामवो-

भिः॑शन्न॑ऽइन्द्रावरु॑णारा॑तह॑व्या । शन्न॑ऽइन्द्रापूषणा॑व्वाज॑सातौश-
मिन्द्रासोमा॑सुवि॒ताय॒शंय्योः॑ ॥ ११ ॥ शन्नो॑दे॒वीर॒भिष्ट॑य॒ऽआपो॑
भवन्तुपी॒तये॑ । शंय्योर॒भिस्र॑वन्तुनः ॥ १२ ॥ स्यो॒नापृ॑थिविनोभवा-
नृक्ष॒रानि॒वेश॑नी । यच्छा॑नः॒शर्म्म॑स॒प्रथाः॑ ॥ १३ ॥ आपो॒हिष्ठामयो॒-
भुव॒स्तान॑ऽऊ॒र्ज्जे द॑धातन । म॒हेरणा॑य॒चक्ष॑से ॥ १४ ॥ योवः॑शि॒वत॑-
मो॒रस॒स्तस्य॑भाजयते॒हनः॑ । उ॒श॒तीरि॑वमा॒तरः॑ ॥ १५ ॥ तस्म्मा॒
ऽअर॑ङ्गमामवो॒यस्य॒क्षया॑य॒जिन्न्व॑थ । आपो॑ज॒नय॑थाचनः ॥ १६ ॥
द्यौः॒शान्ति॑र॒न्तरि॑क्ष॒ꣳशान्तिः॑ पृ॒थि॒वीशान्ति॒रापः॒शान्ति॒रोष॑धयः॒शा-
न्तिः॑ । व्वन॒स्पत॑यः॒शान्ति॒र्व्विश्श्वे॑दे॒वाः॒शान्ति॒र्ब्रह्म॒शान्तिः॒सर्व्व॒ꣳ

शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि ॥ १७ ॥ दृते दृꣳह मा
मित्रस्य मा चक्षुषा सर्वाणि भूतानि समीक्षन्ताम् । मित्रस्याहं चक्षु-
षा सर्वाणि भूतानि समीक्षे । मित्रस्य चक्षुषा समीक्षामहे ॥ १८ ॥
दृते दृꣳह मा । ज्योक्ते सन्दृशि जीव्यासं ज्योक्ते सन्दृशि जीव्यासम्
॥ १९ ॥ नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे । अन्याँस्ते अस्म-
त्तपन्तु हेतयः पावको अस्मभ्यꣳ शिवो भव ॥ २० ॥ नमस्ते अस्तु
विद्युते नमस्ते स्तनयित्नवे । नमस्ते भगवन्नस्तु यतः स्वः समीहसे
॥ २१ ॥ यतो यतः समीहसे ततो नो अभयं कुरु । शं नः कुरु प्रजाभ्यो
ऽभयं नः पशुभ्यः ॥ २२ ॥ सुमित्रिया न आप ओषधयः सन्तु

दुर्म्मित्रियास्तस्म्मैसन्तुयोस्म्मान्द्वेष्ट्टियञ्चव्वयन्द्विष्म्मः ॥ २३ ॥
तच्चक्षुर्द्देवहितम्पुरस्ताच्छुक्क्रमुच्चरत् । पश्येमशरदः शतञ्जीवेमश-
रदः शतᳬश्रृणुयामशरदः शतम्प्रब्ब्रवामशरदः शतमदीनाᳬस्याम
शरदः शतम्भूयश्चशरदः शतात् ॥ २४ ॥

इति संहितायां षट्त्रिंशोऽध्यायः ।

---

१. 'तकारवर्गश्चकारवर्गे चकारवर्गम्' (४।९५) तकारवर्गः पदान्तीयः चकारवर्गे प्रत्यये परे चकारवर्गमापद्यते । एवम्—'आराच्चिद्द्वेषः २०।५२। आच्छच्छन्दः १५।५।३, उज्जिहानाः १५।५। इत्यादौ । 'झकारादि ञकारादि च पदानामुदाहरणं संहितायां न विद्यते ।

❀ अथ सप्तत्रिंशोऽध्यायः ❀

ओँ देवस्यत्वासवितुःप्प्रसवेश्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् ।
आददेनारिरसि ॥ १ ॥ युञ्जतेमनऽउतयुञ्जतेधियोव्विप्प्राव्विप्प्रस्य
बृहतोव्विपश्चितः । व्विहोत्त्रादधेव्वयुनाविदेकऽइन्महीदेवस्यस-
वितुःपरिष्टुतिः ॥ २ ॥ देवीद्यावापृथिवीमखस्यवामद्यशिरोराद्ध्यास-
न्देवयजनेपृथिव्व्याः । मखायत्वामखस्यत्वाशीर्ष्णे ॥ ३ ॥ देव्व्योव्व-
म्न्योभूतस्यप्प्रथमजामखस्यवोद्यशिरोराद्ध्यासन्देवयजनेपृथिव्व्याः ।
मखायत्वामखस्यत्वाशीर्ष्णे ॥४॥ [शतम् १९००] इयत्यग्ग्रऽआसी-
न्मखस्यतेद्यशिरोराद्ध्यासन्देवयजनेपृथिव्व्याः । मखायत्वामखस्य

त्वाशीर्ष्णे ॥ ५ ॥ इन्द्रस्यौजस्त्थमखस्यंवोद्यशिरोराद्ध्यासन्देवयजनेपृथिव्व्याः । मखायंत्वामखस्यंत्वाशीर्ष्णे । मखायंत्वामखस्यंत्वा शीर्ष्णे । मखायंत्वामखस्यंत्वाशीर्ष्णे ॥ ६ ॥ प्रैतुब्ब्रह्मणस्प्पतिः प्रदेव्व्येतुसूनृता । अच्छावीरन्नर्य्यम्पङ्क्तिराधसन्देवायज्ञन्नयन्तुनः । मखायंत्वामखस्यंत्वाशीर्ष्णे । मखायंत्वामखस्यंत्वाशीर्ष्णे । मखायंत्वामखस्यंत्वाशीर्ष्णे ॥ ७ ॥ मखस्यशिरोसि मखायंत्वामखस्यंत्वा शीर्ष्णे । मखस्यशिरोसि । मखायंत्वामखस्यंत्वाशीर्ष्णे । मखस्यशिरोसि । मखायंत्वामखस्यंत्वाशीर्ष्णे । मखायंत्वामखस्यंत्वाशीर्ष्णे । मखायंत्वामखस्यंत्वाशीर्ष्णे । मखायंत्वामखस्यंत्वाशीर्ष्णे ॥ ८ ॥

अश्श्वस्यत्वाव्वृष्ण्णःशक्क्नाधूपयामिदेवयजनेपृथिव्व्याः । मखायत्वा
मखस्यत्वाशीर्ष्णे । अश्श्वस्यत्वाव्वृष्ण्णःशक्क्नाधूपयामिदेवयजने
पृथिव्व्याः । मखायत्वामखस्यत्वाशीर्ष्णे । अश्श्वस्यत्वाव्वृष्ण्णः
शक्क्नाधूपयामिदेवयजनेपृथिव्व्याः । मखायत्वामखस्यत्वाशीर्ष्णे । म-
खायत्वामखस्यत्वाशीर्ष्णे । मखायत्वामखस्यत्वाशीर्ष्णे । मखायत्वा-
मखस्यत्वाशीर्ष्णे ॥९॥ ऋजवेत्वासाधवेत्वासुक्षित्यैत्वा । मखायत्वा
मखस्यत्वाशीर्ष्णे । मखायत्वामखस्यत्वाशीर्ष्णे । मखायत्वामखस्य
त्वाशीर्ष्णे ॥१०॥ यमायत्वामखायत्वासूर्य्यस्यत्वातपसे । देवस्त्वास-
वितामद्ध्वानक्क्तुपृथिव्व्याःसᳪस्पृशस्प्पाहि । अर्चिरसिशोचिर-

सितपोसि ॥ ११ ॥ अनाधृष्टापुरस्तादग्नेराधिपत्यऽआयुर्म्मेदाᳫंपुत्रव-
तीदक्षिणतऽइन्द्रस्याधिपत्येप्प्रजाम्मेदाᳫं । सुषदापश्चाद्देवस्यसवितु-
राधिपत्येचक्षुर्म्मेदाऽआश्श्रुतिरुत्तरतोधातुराधिपत्येरायस्पोषम्मेदाᳫं ।
व्विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्यऽओजोमेदाव्विश्वाभ्योमाना
ष्ट्राभ्यस्पाहिमनोरश्वासि ॥ १२ ॥ स्वाहामरुद्भिःपरिश्श्रीय-
स्वदिवःसᳫंस्पृशस्पाहि । मधुमधुमधु ॥ १३ ॥ गर्ब्भोदेवानाम्पि-
तामतीनाम्पतिः प्प्रजानाम् । सन्देवोदेवेनसव्वित्रागतसᳫंसूर्य्येणरो-
चते ॥ १४ ॥ समग्निरग्निनागतसन्दैवेनसवित्रासᳫंसूर्य्येणारोचिष्ट ।
स्वाहासमग्निस्तपसागतसन्दैव्येनसवित्रासᳫंसूर्य्येणारूरुचत ॥१५॥

धर्त्तादिवोव्विभातितपसस्पृथिव्व्यान्धर्त्तादेवोदेवानाममर्त्यस्तपोजाः ।
व्वा चमस्म्मेनियच्छदेवायुवम् ॥ १६ ॥ अपश्यङ्गोपामनिपद्द्यमानमा
चपराचपथिभिश्श्चरन्तम् । ससद्ध्रीचीःसव्विषूचीर्व्वसानऽआवरी-
वर्त्तिभुवनेष्ष्वन्तः ॥ १७ ॥ व्विश्श्वासाम्भुवाम्पतेव्विश्श्वस्यमनस-
स्प्पतेव्विश्श्वस्यव्वचसस्प्पतेसर्व्वस्यव्वचसस्प्पते । देवश्श्रुत्वन्देवघ-
र्म्मदेवोदेवान्न्पाह्यत्रप्प्रावीरनुवान्देववीतये । मधुमाद्ध्वीब्भ्याम्मधु-
माधूचीब्भ्याम् ॥१८॥ हृदेत्वामनसेत्वादिवेत्वासूर्य्यायत्वा । ऊर्द्ध्वो
ऽअद्ध्वरन्दिविदेवेषुधेहि ॥ १९ ॥ पितानोसिपितानोबोधिनमस्तेऽअ-
स्तुमामाहिꣳसीः । त्वष्ट्रमन्तस्त्वासपेमपुत्त्रान्न्पशून्न्मयिधेहिप्प्रजा-

मस्म्मासुंधेह्यरिष्टाहह्ठसहपत्त्याभूयासम् ॥ २० ॥ अहं॑ केतुनांजुष-
ताᳬसुज्ज्योतिज्ज्योंतिषास्वाहां । रात्रिं॑ केतुनांजुषताᳬसुज्ज्योति-
ज्ज्योंतिषास्वाहां ॥ २१ ॥

इति संहितायां सप्तत्रिंशोऽध्यायः ।

ॐ अथ अष्टत्रिंशोऽध्यायः ॐ

ॐ देवस्यंत्वासवितुःप्प्रंसवेशिश्वनोंर्ब्बाहुब्भ्यांपूष्णोहस्ताब्भ्याम् ।
आददेदिंत्यैरास्स्नांसि ॥ १ ॥ इडऽएह्यदिंतऽएहिसरंस्वत्येहिं । असा[1]-

---

१. 'असौ च शाकटायनः' (शु० य० प्रा० अ० ४ सू० १२७) असावित्येतस्य पदस्य असस्थाने प्रत्यये वकारो न लुप्यते शाकटायनमतेन ।

वेह्यसावेह्यसावेहि ॥ २ ॥ अदित्यैरास्नासीन्द्राण्याऽउष्णीषः ।
पूषासिघर्म्मायदीष्व ॥ ३ ॥ अश्विभ्याम्पिन्वस्वसरस्वत्यैपिन्व-
स्वेन्द्रायपिन्वस्व । स्वाहेन्द्रवत्स्वाहेन्द्रवत्स्वाहेन्द्रवत् ॥ ४ ॥
यस्ते स्तनः शशयोयोमयोभूर्य्योरत्नधाव्वसुविद्यःसुदत्रः ।
येनविश्श्वापुष्ष्यसिव्वार्य्याणिसरस्वतितमिहधातवेकः । उर्व्वु-
न्तरिक्षमन्न्वेमि ॥ ५ ॥ गायत्रञ्छन्दोऽसित्रैष्टुभञ्छन्दोऽसि
द्यावापृथिवीभ्यान्त्वापरिगृह्णाम्म्यन्तरिक्षेणोपयच्छामि । इन्द्रा-
श्विनामधुनःसारघस्यघर्म्मम्पातव्वसवोयजतव्वाट् । स्वाहासूर्य्य
स्यरश्मयेव्वृष्टिवनये ॥ ६ ॥ समुद्रायत्वाव्वातायस्वाहासरिराय

त्वाव्वातायस्वाहा । अनाधृष्ष्यायत्वाव्वातायस्वाहाप्प्रतिधृष्ष्याय
त्वाव्वातायस्वाहा । अवस्यवेत्वाव्वातायस्वाहाशिमिदायत्वाव्वा
तायस्वाहा ॥ ७ ॥ इन्द्रायत्वाव्वसुमतेरुद्द्रवतेस्वाहेन्द्रायत्वादित्य
वतेस्वाहेन्द्रायत्वाभिमातिग्घ्नेस्वाहा । सवित्त्रेत्वऽऋभुमतेव्विभु
मतेव्वाजवतेस्वाहाबृहस्पतयेत्वाव्विश्श्वदेव्व्यावतेस्वाहा ॥ ८ ॥
यमायत्वाङ्गिरस्वतेपितृमतेस्वाहा । स्वाहाघर्म्मायस्वाहाघर्म्मःपित्त्रे
॥ ९ ॥ व्विश्श्वाऽआशादक्षिणसद्द्विश्श्वान्देवानयाडिह । स्वाहा
कृतस्यघर्म्मस्यमधोःपिबतमश्श्विना ॥१०॥ दिविधाऽइमंय्यज्ञमिमंय्य-
ज्ञन्दिविधाः । स्वाहाग्नयेयज्ञियायशंय्यजुर्ब्भ्यः ॥११॥ अश्श्विनाघर्म्म-

म्पातꣳहादूद्धीनमहर्द्दिवाभिरूतिभिः । तन्त्रायिणेनमोद्यावापृथिवी
भ्याम् ॥१२॥ अपातामश्विनाघर्म्ममनुद्यावापृथिवीऽअमꣳसाताम्।
इहैवरातयःसन्तु ॥१३॥ इषेपिन्वस्वोर्ज्जेपिन्वस्वब्रह्मणेपिन्वस्व
क्षत्रायपिन्वस्वद्यावापृथिवीभ्यांपिन्वस्व । धर्म्मासिसुधर्म्मामेन्न्य-
स्म्मेनृम्णानिधारयब्रह्मधारयक्षत्रन्धारयविशन्धारय ॥१४॥ स्वाहा-
पूष्णेशरसेस्वाहाग्रावभ्यꣳस्वाहाप्रतिरवेभ्यः । स्वाहापितृभ्यऽऊ-
र्ध्वबर्हिभ्योघर्म्मपावभ्यꣳस्वाहाद्यावापृथिवीभ्याꣳस्वाहाविश्वे-
भ्योदेवेभ्यः ॥ १५ ॥ स्वाहारुद्रायरुद्रहूतयेस्वाहासञ्ज्योति-
षाज्ज्योतिः । अहःकेतुनाजुषताꣳसुज्ज्योतिर्ज्ज्योतिषास्वाहा ।

रात्रिः केतुनाजुषताꣳ सुज्ज्योतिर्ज्योतिषा स्वाहा । मधुहुतमिन्द्र-
तमेऽअग्नावश्याम ते देव घर्म्म नमस्तेऽअस्तु मा मा हिꣳसीः ॥ १६ ॥
अभीमम्महिमा दिवं व्विप्रो बभूव सप्रथाः । उत श्रवसा पृथिवीꣳ सꣳ
सीदस्व महाँ२ असि रोचस्व देववीतमः । व्वि धूममग्ने अरुषम्मियेद्ध्य
सृज प्रशस्त दर्शतम् ॥ १७ ॥ या ते घर्म्म दिव्या शुग्या गायत्र्याꣳ हविर्द्धाने । सा तऽआप्यायतान्निष्ट्यायतान्तस्यै ते स्वाहा । या ते घ-
र्म्मान्तरिक्षे शुग्या त्रिष्टुब्भ्याग्नीध्रे । सा तऽआप्यायतान्निष्ट्यायता-
न्तस्यै ते स्वाहा । या ते घर्म्म पृथिव्याꣳ शुग्या जगत्याꣳ सदस्या ।
सा तऽआप्यायतान्निष्ट्यायतान्तस्यै ते स्वाहा ॥ १८ ॥ क्षत्रस्य त्वा

परस्पायुव्ब्रह्मणस्तन्न्वम्पाहि । व्विशस्त्वाधर्म्मणाव्वयमनुक्रामा-
मसुवितायनव्व्यंसे ॥ १९ ॥ चतुःस्रत्तिकुन्नाभिर्ऋतस्यसप्प्रथाः
सनोव्विश्श्वायुःसप्प्रथाःसनःसर्व्वायुःसप्प्रथाः । अपद्वेषो-
षोऽअपह्वरोन्न्यव्व्रतस्यसश्चिम ॥ २० ॥ घर्म्मैतत्तेपुरीषन्तेनव्वर्द्ध-
स्वचाचप्प्यायस्व । व्वर्द्धिषीमहिचव्वयमाचप्प्यासिषीमहि ॥ २१ ॥
अचिक्रदद्वृषाहरिर्म्महान्मित्रोनदर्शतः । सꣳसूर्य्येणदिद्युतदुदधि-
र्न्निधिः ॥ २२ ॥ सुमित्त्रियानऽआपऽओषधयःसन्तुदुर्म्मित्त्रियास्त-
स्म्मैसन्तुयोस्मान्द्वेष्टियञ्चव्वयंद्विष्म्मः ॥ २३ ॥ उद्वयन्तमस-
स्पपरिस्वःपश्यन्तऽउत्तरम् । देवन्देवत्राासूर्य्यमगन्न्मज्ज्योतिरुत्त-

मम् ॥ २४ ॥ एधोस्येधिषीमहिसमिदसितेजोसितेजोमयिधेहि ॥२५॥
यावतीद्यावापृथिवीयावच्चसप्तसिन्धवोवितस्थिरे । तावन्तमिन्द्र-
तेग्ग्रहमूर्जागृह्णाम्म्यक्षितम्मयिगृह्णाम्म्यक्षितम् ॥ २६ ॥ मयित्यदि-
न्द्रियम्बृहन्मयिदक्षोमयिक्रतुः । घर्म्मस्त्रिशुग्विराजतिविराजाज्ज्यो-
तिषासहब्रह्मणातेजसासह ॥ २७ ॥ पयसोरेतऽआभृतन्तस्य
दोहमशीमह्युत्तरामुत्तराᳬसमाम् । त्विषः संवृक्क्त्वेदक्षस्यतेसुषु-
म्मणस्यतेसुषुम्म्णाग्निहुतः । इन्द्रपीतस्यप्रजापतिभक्षितस्यमधुमतऽ-
उपहूतऽउपहूतस्यभक्षयामि ॥ २८ ॥

इति संहितायां अष्टत्रिंशोऽध्यायः ।

❀ अथ एकोनचत्वारिंशत्तमोऽध्यायः ❀

ॐ स्वाहाप्प्राणेभ्यꣳसाधिपतिकेभ्यः । पृथिव्यैस्वाहाग्नयेस्वाहा-
न्तरिक्षायस्वाहाव्वायवेस्वाहा । दिवेस्वाहासूर्यायस्वाहा ॥ १ ॥
दिग्भ्यःस्वाहाचन्द्रायस्वाहानक्षत्रेभ्यःस्वाहाद्भ्यःस्वाहाव्वरुणाय
स्वाहा । नाभ्यैस्वाहापूतायस्वाहा ॥ २ ॥ व्वाचेस्वाहाप्प्राणाय
स्वाहाप्प्राणायस्वाहा । चक्षुषेस्वाहाचक्षुषेस्वाहाश्श्रोत्रायस्वाहा
श्श्रोत्रायस्वाहा ॥ ३ ॥ मनसꣳकाममाकूतिंव्वाचःसत्यमशीय । पशू-
नाꣳरूपमन्नस्यरसोयशःश्रीःश्रयताम्मयिस्वाहा ॥ ४ ॥ प्रजापतिः

सम्भ्रियमाणꣳसम्म्राट्सम्भृतोव्वैश्श्वदेवः संꣳसन्नोघर्म्मः प्रवृक्तस्ते-
जऽउद्यतऽआश्श्विनः पयस्यानीयमानेपौष्ष्णोव्विष्ष्यन्दमानेमारुतः क्क्ल-
थन् । मैत्रः शरसिसन्ताय्यमानेव्वायव्व्योह्रियमाणऽआग्नेयोहूयमानो
व्वाग्घुतः ॥ ५ ॥ सविताप्प्रथमेहन्नग्निर्द्वितीयेव्वायुस्तृतीयऽआदि-
त्यश्चतुर्थेचन्द्रमाः पञ्चमऽऋतुः षष्ष्ठेमरुतः सप्प्तमेबृहस्पतिरष्ष्टमे ।
मित्त्रोनवमेव्वरुणोदशमऽइन्द्रऽएकादशेव्विश्श्वेदेवाद्द्वादशे ॥ ६ ॥
उग्ग्रश्श्चभीमश्श्चध्वान्तश्श्चधुनिश्श्च । सासह्वाँश्श्चाभियुग्ग्वाचव्वि-
क्षिपꣳस्वाहा ॥ ७ ॥ अग्निꣳहृदयेनाशनिꣳहृदयाग्ग्रेणपशुपतिङ्कृ-

त्स्नहृदयेनभवंयक्ना । शर्व्वम्मतस्नाभ्यामीशानम्मन्न्युनामहादेव-
मन्तः पर्शव्येनोग्ग्रन्देवंव्वनिष्ठुनाव्वसिष्ठहनुःशिङ्गीनिकोश्याभ्याम्
॥ ८ ॥ उग्ग्रंल्लोहितेनमित्रᳪ सौव्व्रत्येनरुद्द्रन्दौव्व्रत्येनेन्द्रम्प्प्रक्क्रीडेन
मरुतोबलेनसाद्ध्यान्प्प्रमुदा । भवस्यकण्ठ्यᳪ रुद्द्रस्यान्तःपर्श्व्य-
म्महादेवस्ययकृच्छर्व्वस्यव्वनिष्ठुःपशुपतेःपुरीतत् ॥ ९ ॥ लोमभ्यः
स्वाहालोमभ्यः स्वाहात्वचेस्वाहात्वचेस्वाहालोहितायस्वाहालोहिताय
स्वाहामेदोभ्यःस्वाहामेदोभ्यःस्वाहा । माᳪसेभ्यःस्वाहा
माᳪसेभ्यःस्वाहास्नावभ्यःस्वाहास्नावभ्यःस्वाहास्त्थभ्यःस्वा-

हास्थभ्य स्वाहा मज्जभ्य स्वाहा मज्जभ्य स्वाहा । रेतसे स्वाहा
पायवे स्वाहा ॥ १० ॥ आयासाय स्वाहा प्रायासाय स्वाहा संयासाय
स्वाहा वियासाय स्वाहोद्यासाय स्वाहा । शुचे स्वाहा शोचते स्वाहा
शोचमानाय स्वाहा शोकाय स्वाहा ॥ ११ ॥ तपसे स्वाहा तप्यते स्वाहा
तप्यमानाय स्वाहा तप्ताय स्वाहा घर्माय स्वाहा । निष्कृत्यै स्वाहा
प्रायश्चित्त्यै स्वाहा भेषजाय स्वाहा ॥१२॥ यमाय स्वाहान्तकाय स्वाहा
मृत्यवे स्वाहा । ब्रह्मणे स्वाहा ब्रह्महत्यायै स्वाहा विश्वेभ्यो देवेभ्यः
स्वाहा द्यावापृथिवीभ्याᳬ स्वाहा ॥ १३ ॥

इति संहितायामेकोन-चत्वारिंशत्तमोऽध्यायः ।

❀ अथ चत्वारिंशत्तमोऽध्यायः ❀

ॐ ईशावास्यमिदꣳसर्व्वंयत्किञ्चजगत्याञ्जगत् । तेनत्यक्तेन
भुञ्जीथामागृधःकस्यस्विद्धनम् ॥ १ ॥ कुर्व्वन्नेवेहकर्म्माणिजिजीवि-
षेच्छतꣳसमाः । एवन्त्वयिनान्यथेतोस्तिनकर्म्मलिप्यतेनरे ॥ २ ॥
असुर्य्यानामतेलोकाऽअन्धेनतमसावृताः । ताँस्तेप्रेत्यापिगच्छन्ति
येकेचात्महनोजनाः ॥ ३ ॥ अनेजदेकम्मनसोजवीयोनैनद्देवाऽआ-
प्नुवन्पूर्व्वमर्शत् । तद्धावतोन्न्यानत्येतितिष्ठत्तस्मिन्नपोमातरिश्वा
दधाति ॥ ४ ॥ तदेजतितन्नैजतितद्दूरेतद्वन्तिके । तदन्तरस्यसर्व्वस्य

तदु सर्वस्यास्य बाह्यतः ॥ ५ ॥ यस्तु सर्वाणि भूतान्यात्मन्नेवानुप-
श्यति । सर्वभूतेषु चात्मानं ततो न वि चिकित्सति ॥ ६ ॥ यस्मि-
न्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोकऽएक-
त्वमनुपश्यतः ॥ ७ ॥ स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्ध-
मपापविद्धम् । कविर्मनीषी परिभूः स्वयम्भूर्याथातथ्यतोऽर्थान्व्य-
दधाच्छाश्वतीभ्यः समाभ्यः ॥ ८ ॥ अन्धन्तमः प्र विशन्ति येऽसम्भू-
तिमुपासते । ततो भूयऽइव ते तमो यऽउ सम्भूत्याꣳ रताः ॥ ९ ॥ अन्यदे-
वाहुः सम्भवादन्यदाहुरसम्भवात् । इति शुश्रुम धीराणां ये नस्त-
द्विचचक्षिरे ॥ १० ॥ सम्भूतिं च विनाशं च यस्तद्वेदोभयꣳ सह ।

व्विनाशेनमृत्युन्तीर्त्वासम्भूत्यामृतमश्नुते ॥ ११ ॥ अन्धन्तमः प्र-
विशन्तियेविद्यामुपासते । ततोभूयऽइवतेतमोयऽउविद्यायाᳬरताः ॥ १२ ॥ अन्यदेवाहुर्व्विद्यायाऽअन्यदाहुरविद्यायाः । इति
शुश्रुमधीराणांय्येनस्तद्विचचक्षिरे ॥ १३ ॥ व्विद्याञ्चाविद्याञ्च
यस्तद्वेदोभयᳬसह । अविद्ययामृत्युन्तीर्त्वाव्विद्ययामृतमश्नुते
॥ १४ ॥ व्वायुरनिलममृतमथेदम्भस्मान्तᳬशरीरम् ॥ ॐ ३ क्रतो-
स्मर । क्लिबेस्मर । कृतᳬस्मर ॥ १५ ॥ अग्नेनयसुपथारायेऽअस्मा-
न्विश्वानिदेवव्वयुनानिव्विद्वान् । युयोध्यस्मज्जुहुराणमेनोभूयिष्ठान्तेनमऽउक्तिम्व्विधेम ॥ १६ ॥ हिरण्मयेनपात्रेणसत्यस्यापिहित-

स्मुखम् । योऽसावादित्ये पुरुषः सोऽसावहम् ॥१७॥ ओ३म् खं ब्रह्म ॥१८॥


इति संहितायां चत्वारिंशत्तमोऽध्यायः ।



१. 'तस्मिंल्लहलजिह्वामूलीयोपद्ध्मानीयनासिक्या न सन्ति माध्यन्दिनानाम् । लृकारो दीर्घः प्लुतश्चोक्तवर्जम् । ढकारष्टवर्गीयोऽकारश्च तत्प्रकृती ळ्ळकारौ क इति जिह्वामूलीयः प इत्युपध्मानीयः हुम् इति नासिक्यः एते वर्णा न सन्ति माध्यन्दिनानाम् । लृकारो दीर्घः लाजीञ्छाचीनित्यमादयो ये पठितास्तान्प्लुतान् वर्जयित्वा अन्ये प्लुता न सन्ति माध्यन्दिनानाम् । (शु० य० प्रा० सू० २९, ३०) ।



इस पुस्तक में सामवेदीय रुद्रों के मन्त्र संगृहीत हैं। अनेक ग्रन्थों का अवलोकन-आलोडन करके प्रत्येक मन्त्र का इस प्रकार प्रामाणिक हिन्दी भाष्य दिया गया है कि मन्त्र का यथार्थ भाव सुस्पष्ट हो जाता है। इससे प्रति मन्त्र का व्यवस्थित अनुवाद मन्त्रों के साथ रखा गया है। गान तथा पद पाठ भी प्रयत्नपूर्वक परम शुद्ध रूप में मन्त्रों के साथ दिये गए हैं। ४-००



सम्पादक : आचार्य श्री ऋषिशंकर अग्निहोत्री श्रीमाली

❀ इति ❀

शुक्लयजुर्वेद-संहिता

समाप्ता



प्रकाशकः

चौखम्बा विद्याभवन,